CC-0. In Public Domain. Digitization by eGangotri

FJAB-05

फलितज्योतिषम्, आचार्यसेतुः

पञ्चमपत्रम्

मुक्तस्वाध्यायपीठम्
(Institute of Distance Education)
राष्ट्रियसंस्कृतसंस्थानम्
(मानितविश्वविद्यालयः)

बृहत्संहिता

खण्डः
१

दैवज्ञलक्षणं रविचन्द्रचारश्च

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मुक्तस्वाध्यायपीठम्
(Institute of Distance Education)
राष्ट्रियसंस्कृतसंस्थानम्
(मानितविश्वविद्यालयः)

FJAB-05
बृहत्संहिता

फलितज्योतिषाचार्यसेतुः
पञ्चमपत्रम्

खण्डः

१

दैवज्ञलक्षणं रविचन्द्रचारश्च

प्रथमः पाठः	०५-१६
द्वितीयः पाठः	१७-३५
तृतीयः पाठः	३६-५१
चतुर्थः पाठः	५२-७१
पञ्चमः पाठः	७२-९२

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रधानसम्पादकः

प्रो॰ ए. पी. सच्चिदानन्दः
कुलपतिः, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

पाठलेखनम्

डॉ. निगमपाण्डेयः
अंशकालिक सहायकाचार्यः
राष्ट्रियसंस्कृतसंस्थानम् (मा.वि.वि.)
रणवीरपरिसरः (जम्मू)
(१-४ पाठाः)

श्री प्रवेशव्यासः
अंशकालिक सहायकाचार्यः
राष्ट्रियसंस्कृतसंस्थानम् (मा.वि.)
जयपुरपरिसरः (राजस्थानम्)
(५ पाठः)

सम्पादनम्

डा. श्यामदेवमिश्रः
वरिष्ठसहायकाचार्यः, मुक्तस्वाध्यायपीठम्
राष्ट्रियसंस्कृतसंस्थानम् (मा.वि.), नवदेहली

प्रबन्धसम्पादकः

डॉ. बिनोदकुमारसिंहः
कुलसचिवः
राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

पाठ्यक्रमसंयोजनम्

डा. श्यामदेवमिश्रः
वरिष्ठसहायकाचार्यः, मु.स्वा.पीठम्
राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

प्रकाशनम्

प्रो. रमाकान्तपाण्डेयः
निदेशकः, मुक्तस्वाध्यायपीठम्
राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

प्रकाशनवर्षम् : २०१४, पुनर्मुद्रणम् : २०१५

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

सर्वाधिकारः सुरक्षितः। नवदेहलीस्थ-राष्ट्रियसंस्कृतसंस्थानस्य लिखितरूपेणानुमतिम् अप्राप्य येन केनापि माध्यमेन अस्याः पाठ्यसामग्र्याः कञ्चिदप्यंशं पुनः प्रस्तोतुम् अनुमतिः नास्ति।

प्रयुक्तकागदम् – Agro-based environment Friendly.

पृष्ठविन्यासः

राजीवकुमारसिंहः
राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

श्री दीपककुमारमुदगलः
राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पत्रपरिचयः

भो छात्रः! आचार्यसेतुपाठ्यक्रमस्य ज्योतिषशास्त्रावगाहिन्याः पञ्चमपत्रस्य प्रथमखण्डे भवान् वराहमिहिराचार्यकृतः 'बृहत्संहिता' इत्याख्यं ग्रन्थं पठिष्यति। ग्रन्थोऽयं ज्योतिषशास्त्रस्य संहितास्कन्धान्तर्गतः परिगण्यते। भवान् जानाति यत् ज्योतिषशास्त्रं सिद्धान्त-संहिता-जातकेतित्रिभिः स्कन्धैः समन्वितं वर्तते। संहितास्कन्धे समष्टिगतं फलं वर्ण्यते अर्थात् नगरविशेषे, प्रान्तविशेषे, देशविशेषे, जातिविशेषे वा ग्रहाणां नक्षत्र-राशिषु सञ्चरणवशात् यः प्रभावः पतति तस्य अध्ययनं संहितास्कन्धे क्रियते। संहिताग्रन्थेषु अन्यतमः अतिमहत्त्वपूर्णः ग्रन्थः बृहत्संहिता इति वर्तते। ग्रन्थेऽस्मिन् शताधिका अध्यायाः वर्तन्ते। अस्य ग्रन्थस्य बृहत्स्वरूपं दृष्ट्वा अस्मात् ग्रन्थात् केचन अंशाः भवतः पाठ्यक्रमे निवेशिताः। येंऽशाः पाठ्यक्रमेऽस्मिन् निवेशिताः ते षड्भिः खण्डैः विभक्ताः। एतेषु खण्डेषु दैवज्ञस्य लक्षणम्, सूर्य-चन्द्र-राहु-बुध-गुरु-शुक्र-शनि-केतूनां नक्षत्रेषु सञ्चरणवशात् फलम्, अगस्त्यचारफलम्, नक्षत्रवशात् भूभागवर्गीकरणम्, वृष्टिविचारः, विविध-प्राकृतिकघटनानां वर्णनं तत्प्रभावश्च इत्येते विषयाः परिचर्च्यन्ते। पत्रस्यास्य स्वरूपमेवं वर्तते–

प्रथमः खण्डः – दैवज्ञलक्षणं रवि-चन्द्रचारश्च

प्रथम पाठः	–	उपनयनाध्यायः
द्वितीय पाठः	–	सांवत्सरलक्षणं पूर्वार्धम्
तृतीय पाठः	–	सांवत्सरलक्षणं उत्तरार्धम्
चतुर्थ पाठः	–	सूर्यचारः
पञ्चम पाठः	–	चन्द्रचारः

द्वितीयः खण्डः – राह्वादिग्रहचारवर्णनम्

षष्ठः पाठः	–	राहुचारः
सप्तमः पाठः	–	राहुचारः
अष्टमः पाठः	–	राहुचारः
नवमः पाठः	–	मङ्गलचारः
दशमः पाठः	–	बुधचारः
एकादशः पाठः	–	गुरुचारः पूर्वार्धम्
द्वादशः पाठः	–	गुरुचारः उत्तरार्धम्

तृतीयः खण्डः – शुक्रादिग्रहचारवर्णनम्

त्रयोदशः पाठः	–	शुक्रचारः पूर्वार्धम्
चतुर्दशः पाठः	–	शुक्रचारः उत्तरार्धम्
पञ्चदशः पाठः	–	शनिचारः
षोडशः पाठः	–	केतुचारः
सप्तदशः पाठः	–	केतुचारः
अष्टादशः पाठः	–	केतुचारः

अस्य पत्रस्य अध्ययनेन भवान् ग्रहाणां बिम्ब-वर्णादिवशात् नक्षत्र-राशिसञ्चरणवशाच्च फलम्, विविध नगर-प्रान्त-देशादीनां नक्षत्रप्रभाववशात् विभागः, वृष्टेः सम्भाव्यासम्भाव्य विचारः, विविधप्राकृतिकघटनानां दिग्दाह-भूकम्प-इन्द्रायुधादीनां शुभाशुभविचार इत्येतान् समष्टिगतफलान् ज्ञास्यति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

खण्डपरिचयः

ज्योतिषाचार्यसेतुपाठ्यक्रमस्य चतुर्थपत्रे प्रथमखण्डे भवतः स्वागतम्। यथा पत्रपरिचये भवता ज्ञातं यत् पत्रेऽस्मिन् षड् खण्डा वर्तन्ते। तेष्वयम् आदिमः खण्डः 'दैवज्ञलक्षणं रवि-चन्द्रचारश्च' इत्याख्यः। खण्डेऽस्मिन् पञ्च पाठाः वर्तन्ते।

प्रथमः पाठः	=	उपनयनाध्यायः
द्वितीयः पाठः	=	सांवत्सरलक्षणं पूर्वार्धम्
तृतीयः पाठः	=	सांवत्सरलक्षणं उत्तरार्धम्
चतुर्थः पाठः	=	सूर्यचारः
पञ्चमः पाठः	=	चन्द्रचारः

एतैः पाठैः स्फुटं भवति यत् खण्डेऽस्मिन् दैवज्ञस्य लक्षणं रविचन्द्रयोः चारश्च विशदतया परिचर्च्यते।

प्रथमः पाठ उपनयनाध्यायः ग्रन्थस्य आदिमः प्रास्ताविकसदृशो वर्तते। पाठेऽस्मिन् ग्रन्थस्य प्रयोजनं, ग्रन्थे निरूपितविषयाः इत्येतेषां विस्तरेण वर्णनमस्ति।

द्वितीयतृतीयपाठयोः सांवत्सरस्य लक्षणं निगद्यते। सांवत्सर अर्थात् यः संवत्सरं (कालं वा) जानाति सः सांवत्सरः कालज्ञः, दैवज्ञः, ज्योतिषी वा। तस्य सांवत्सरस्य स्वरूपं निर्विशेषम् उभयोः पाठयोः वर्ण्यते। सांवत्सरस्य स्वरूपं प्रकृतिः गुणाः दोषाश्च, सांवत्सरेण ज्ञातविषयाणां सामान्यपरिचयश्च अत्र उपस्थाप्यते। चतुर्थे सूर्यचार इत्याख्ये पाठे सूर्यग्रहस्य विविधनक्षत्र-राशिषु सञ्चरणवशात् तद्बिम्बस्वरूपवशात् यः प्रभावः पतति तस्य चर्चा विधीयते। पञ्चमे 'चन्द्रचार' इत्याख्ये पाठे चन्द्रस्य विविधनक्षत्र-राशिषु सञ्चरणवशात् तद्बिम्बस्वरूपवशात् यः प्रभावः पतति तस्य वर्णनम् अत्र उपस्थाप्यते।

इत्थम् अस्य खण्डस्य अध्ययनेन भवान् ग्रन्थेऽस्मिन् किं किं प्रतिपाद्यम् इत्यस्य ज्ञानेन सह सूर्य-चन्द्रसञ्चरणस्य फलमपि अवगमिष्यति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रथमः पाठः – "उपनयनाध्यायः"

पाठसंरचना

१.१ प्रस्तावना
१.२ उद्देश्यम्
१.३ मङ्गलाचरणम्
 १.३.१ श्लोकः
 १.३.२ अन्वयः प्रतिपदार्थश्च
 १.३.३ व्याख्या
१.४ ग्रन्थप्रयोजनम्
 १.४.१ श्लोकः
 १.४.२ अन्वयः प्रतिपदार्थश्च
 १.४.३ व्याख्या
 बोधप्रश्नाः
१.५ पौरुषेयापौरुषेययोः साम्यम्
 १.५.१ अन्वयः प्रतिपदार्थश्च
 १.५.२ व्याख्या
१.६ स्वग्रन्थस्य वैशिट्यम्
 १.६.१ श्लोकः
 १.६.२ अन्वयः प्रतिपदार्थश्च
 १.६.३ व्याख्या
१.७ स्वग्रन्थस्य परिचयः
 १.७.१ श्लोकः
 १.७.२ अन्वयः प्रतिपदार्थश्च
 १.७.३ व्याख्या
 बोधप्रश्नाः
१.८ जगदुत्पत्तिकथनम्
 १.८.१ श्लोकः
 १.८.२ अन्वयः प्रतिपदार्थश्च
 १.८.३ व्याख्या
१.९ ब्रह्मोत्पत्तिकथनम्
 १.९.१ श्लोकः
 १.९.२ अन्वयः प्रतिपदार्थश्च
 १.९.३ व्याख्या
१.१० ज्योतिषशास्त्रस्वरूपम्
 १.१०.१ श्लोकः
 १.१०.२ अन्वयः प्रतिपदार्थश्च
 १.१०.३ व्याख्या
 बोधप्रश्नाः
१.११ ग्रन्थ प्रशंसा
 १.११.१ श्लोकः
 १.११.२ अन्वयः प्रतिपदार्थश्च
 १.११.३ व्याख्या

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

१.१२ सारांशः
१.१३ शब्दावली
१.१४ सन्दर्भग्रन्थाः
१.१५ सहायकग्रन्थाः
१.१६ बोधप्रश्नोत्तराणि
१.१७ अभ्यासप्रश्नाः

१.१ प्रस्तावना

बृहत्संहितायाः प्रथमः पाठे भवतः स्वागतम् अस्ति। प्रथमे पाठे भवान् उपनयनाध्यायं पठिष्यति। उपनयनस्य तात्पर्य अस्ति यत् उप (समीप) नयननम् (गमनम्) समीप गमनम्। कस्य समीप गमनम्? तदा ग्रन्थसमीपे गमनम् अर्थात् बृहत्संहिताग्रन्थस्य परिचय इति आशयः। अस्मिन् पाठे सर्वप्रथमं मङ्गलाचरणम् अस्ति। मङ्गलाचरणे जगदात्मनः भगवतः सूर्यस्य स्तुतिः वतेते। बृहत्संहिताग्रन्थस्य प्रयोजनप्रसङ्गे आचार्यः कथयति यत् ब्रह्मणा वर्णितं शास्त्रं सत्यरूपं विस्तृतं च अस्ति। तत् शास्त्रं अहं सारभूतं कथयामि। पाठेऽस्मिन् पौरुषेयापौरुषेययोः ग्रन्थस्वरूपयोः साम्यम् कथम् अस्ति इति निरूप्यते। आचार्यस्य तात्पर्य वर्तते यत् अपौरुषेयशास्त्रे मनुष्यकृतशास्त्रे च भाषायाः भेदः अस्ति, परन्तु अर्थे भेदः नास्ति। पूर्वाचार्यैः वर्णितं शास्त्रं साररूपं बृहत्संहिता अस्ति। सारवत्वमेव अस्य ग्रन्थस्य वैशिष्ट्यम् अस्ति। अस्मिन् पाठे जगदुत्पत्तिकारणं भवान् सम्यक्तया पठिष्यति। जगदुत्पत्तिविषये कपिलस्य सांख्यदर्शनस्य वर्णनम् अस्ति। कणादस्य पदार्थस्य वर्णनं वर्तते। ज्योतिषशास्त्र-स्वरूपविषये तु विशेषोल्लेखः पाठेऽस्मिन् अस्ति।

१.२ उद्देश्यम्

अस्य पाठस्य अध्यनेन भवान्–

- भवान् ग्रन्थप्रयोजनं वक्तुं प्रभविष्यति।
- बृहत्संहिताग्रन्थस्य वैशिष्ट्यम् परिभाषितुं समर्थः भविष्यति।
- ग्रन्थपरिचयं निरूपयितुं शक्ष्यति।
- जगदुत्पत्तिविषयकान् विविधसिद्धान्तान् वक्तुं प्रभविष्यति।
- ज्योतिषशास्त्रस्वरूपं ज्ञात्वा तस्य भेदं प्रकटयितुं कुशलो भविष्यति।

१.३ मङ्गलाचरणम्

मङ्गलम् आचरणं मङ्गलाचरणम् अर्थात् कार्य निर्विघ्नपूर्वकं सम्पादनार्थं मङ्गलस्य कामना भवति। मङ्गलकामनां विहाय किमपि कार्यं कर्तुं न शक्यते। यतोहि ग्रन्थादौ मङ्गलाचरणं भवति।

१.३.१ श्लोकः

जयति जगतः प्रसूतिर्विश्वात्मा सहजभूषणं नभसः ।
द्रुतकनकसदृशदशशतमयूखमालार्चितः सविता ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

१.३.२ अन्वयः प्रतिपदार्थश्च

जगतः प्रसूतिर्विश्वात्मा सहजभूषणं नभसः द्रुतकनकसदृशदश-शतमयूखमालार्चितः सविता जयति।

प्रतिपदार्थः – जगतः प्रसूति = जगत् उत्पद्यते प्रसूयते अस्मात् इति जगतः प्रसूतिः। विश्वात्मा = विश्वस्य जंगमस्य स्थावररूपस्य च आत्मा। सहजभूषणं = अकृत्रिमलङ्करणम्। नभसः = आकाशस्य। द्रुतं = गलितं। कनकं = सुवर्णं। सदृशम् = तत्तुल्यम्। दशशतम् एकसहस्रं। मयूखाः = किरणाः। मालार्चितः = प्रचयः तयार्चितो मालार्चितः। सविता = सूर्यः। जयति = सर्वोत्कर्षेण वर्तते।

१.३.३ व्याख्या

अखिलब्रह्माण्डस्य उत्पादकः विश्वस्य आत्मा आकाशे अकृत्रिममलङ्करणं गलितं सुवर्णसदृशं, सहस्रकिरणैः संयुक्तं अभ्यर्चितं सूर्यं नमस्करोमि।

प्रसूयते उत्पद्यते अस्मात् जगत् इति जगतः प्रसूतिः तद्वशाद् वृष्टेः सम्भवः ततो अन्नं ततः प्रजा भवति। मनुना उक्तं यत्

अग्नौ हुताहुतिः सम्यगादित्यमुपतिष्ठते ।
आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा ॥

विश्वस्य जङ्गमस्य स्थावररूपस्य च आत्मा प्राणरूपेण हृदयान्तरस्थितः अस्ति।

१.४ ग्रन्थप्रयोजनम्

प्रयोजनं विना कार्यं नैव कर्तुं शक्यते। अतएव उच्यते यत् "प्रयोजनमनुद्दिश्य मन्दोऽपि न प्रवर्तते"।

१.४.१ श्लोकः

प्रथममुनिकथितमवितथमवलोक्य ग्रन्थविस्तरस्यार्थम् ।
नातिलघुविपुलरचनाभिरुद्यतः स्पष्टमभिधातुम् ॥

१.४.२ अन्वयः

प्रथममुनिकथितमवितथमवलोक्य ग्रन्थविस्तरस्यार्थम् नातिलघुविपुलरचनाभिः स्पष्टमभिधातुम् उद्यतः।

प्रतिपदार्थः – प्रथममुनि = प्रथमश्चासौ मुनिश्च प्रथममुनिर्ब्रह्मा, (तेन) कथितम् = उक्तम्, अवितथं = सत्यरूपं,अवलोक्य = विलोक्य, ग्रन्थः = पुस्तकम्, विस्तरस्यार्थम् = अतिविस्तीर्णशास्त्रं, नातिलघु = न स्वल्पः, विपुलः = अतिविस्तृतः रचनाभिः = वाच्यपदसन्निवेशैः, स्पष्टम् = स्फुटतरम् अभिधातुम् = वक्तुं, उद्यतः = प्रवृतः।

१.४.३ व्याख्या

प्रथमश्चासौ मुनिश्च प्रथममुनिर्ब्रह्मा तेन उक्त् यत् अर्थसहितं सत्यरूपं शास्त्रं अवलोक्य अहं न अधिकं विस्तृतं अपितु लघुरूपं सारभूतं ग्रन्थस्य (बृहत्संहितायाः)

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

स्पष्टप्रतिपादनकरणार्थं प्रवृत्तोऽस्मि। यतोहि संक्षिप्तग्रन्थस्य ग्रहणे धारणे च सुखम् अनुभूयते। यथा हस्तिवैद्यकस्य कर्ता वीरसोमेन उक्तं–

"समासोक्तस्य शास्त्रस्य सुखं ग्रहणधारणे"।

बोधप्रश्नाः

१. मङ्गलाचरणे कस्य स्तुतिः अस्ति?

२. मङ्गलाचरणम् कथं क्रियते?

३. जगतः प्रसूतिवशात् किम् भवति?

४. अन्नात् किम् भवति?

५. पाठोक्तप्रथममुनिना इत्यस्य तात्पर्यं किम्?

६. नातिलघुविपुलरचना कस्य विषये अस्ति?

१.५ पौरुषेयापौरुषेययोः साम्यम्

मुनिविरचितमिदमिति यच्चिरन्तनं साधु न मनुजग्रथितम्।
तुल्येऽर्थेऽक्षरभेदादमन्त्रके का विशेषोक्तिः॥

१.५.१ अन्वयः

का विशेषोक्तिः यत् मुनिविचरचितमिदमिति यच्चिरन्तनं साधु न मनुजग्रथितम् तुल्येऽर्थेऽक्षरभेदादमन्त्रके।

प्रतिपदार्थः – का विशेषोक्तिः = किं विशेषवचनम्, मुनिविरचितम् = ब्रह्मादिभिर्निबद्धं, इदं = यच्छास्त्रं, यच्चिरन्तनं = मुनिभिः प्रागेव विरचितं। साधु = सृष्ठु न मनुजग्रथितम् = यतः मनुष्येन न रचितम्, तुल्येऽर्थे = सदृशेऽर्थे, अक्षरभेदात् = वर्णनाम् अन्यत्वात्, अमन्त्रके = मन्त्रवर्जिते वेदात् व्यतिरिक्ते वाङ्मये।

१.५.२ व्याख्या

सम्प्रति वदन्ति जनाः यत् मनुष्यस्य रचनायाः अपेक्षा मुनिरचना एव श्रेष्ठतरः अस्ति। परन्तु एतद् न समीचीनम्। अस्य विषयस्य समाधानाय आचार्यः कथयति यत् वेदमन्त्रान् विहाय अन्येषु विषयेषु एवं वक्तुं न शक्यते। यतोहि यदि द्वयोः कयोश्चित् ग्रन्थयोः प्रतिपाद्यः विषयः एक एव तर्हि तयोः केवलं शब्दभेदः वाक्यभेदो वा भवितुमर्हति न तु अर्थभेद। अर्थभेदात् तु प्रतिपाद्य एव भिन्नः स्यात्। अतः तुल्यविषयप्रतिपादकयोः शास्त्रयोः मुनि-समान्यजनकर्तृकत्वात् तयोरन्तरस्य अवरत्वं श्रेष्ठत्वं वा न वक्तुं शक्यते। पुनः अग्रे आचार्यः कथयति यत् =

क्षितितनयदिवसवारो न शुभकृदिति पितामहप्रोक्ते।
कुजदिनमनिष्टमिति वा कोऽत्र विशेषो नृदिव्यकृते॥

अन्वयः – पितामहप्रोक्ते क्षितितनयदिवसवारो न शुभकृदिति कुजदिनमनिष्टमिति वा कोऽत्र विशेषो नृदिव्यकृते।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रतिपदार्थः – पितामहः = ब्रह्मा, प्रोक्ते = कथिते, क्षितितनयः = भौमः, दिवसः=वारः, न शुभकृत् = न शुभं फलं करोति न शुभकृत्, कुजः = मंगलः, दिनम् = वारः, अनिष्टम् = न इष्टम् अनिष्टम् अशुभं, नृ = मनुष्यः, दिव्यः = देवः, कृते = (तयोः) विरचिते।

व्याख्या – ब्रह्माद्वारा वर्णिते शास्त्रे यदि एवं स्यात् यत् "क्षितितनयदिवसवारो न शुभकृत्" अर्थात् भौमवासरः न शुभः। मनुष्यद्वारा वर्णिते शास्त्रे वर्तते यत् "कुजदिनमनिष्टम्" अर्थात् मंगलवारः न शुभः। प्रतीयते यत् उभयोः शब्दयोः भिन्नता अस्ति, परन्तु अर्थे भिन्नता नास्ति। शास्त्रं शब्दनिष्ठं नास्ति तत् अर्थनिष्ठं अस्ति। वेदमन्त्रम् अवश्यमेव शब्दनिष्ठम् अस्ति उदात्तादि तत्र तु शब्दभेदात् अर्थभेदः। अर्थात् "भद्रं कर्णेभिः शृणुयाम्" इत्यादिना वेदमन्त्रस्य योऽर्थः न तत् अर्थवत्वं किं वा क्रियाकारित्वं "शुभं श्रोतृभिः शृणुयाम्" इत्यनेन वाक्येन अनेन प्रकारेण वक्तुं शक्यते यत् वेदमन्त्रं विहाय अन्येषु शास्त्रेषु अर्थप्राधान्यं भवति, न तु शब्दप्राधान्यम् अर्थात् ब्रह्मकृतशास्त्रे तथा च मनुष्यकृतशास्त्रे भदो नास्ति।

१.६ स्वग्रन्थस्य वैशिष्ट्यम्

आचार्यः बृहत्संहिताग्रन्थस्य वैशिष्ट्यम् प्रतिपादयति।

१.६.१ श्लोकः

आब्रह्मादिविनिःसृतमालोक्य ग्रन्थविस्तरं क्रमशः।
क्रियमाणकमेवैतत् समासतोऽतो ममोत्साहः॥

१.६.२ अन्वयः

आब्रह्मादिविनिःसृतमालोक्य ग्रन्थविस्तरं क्रमशः क्रियमाणकमेवैतत् समासतोऽपि ममोत्साहः।

प्रतिपदार्थः – आब्रह्मादि = ब्रह्मादित आरभ्य, विनिःसृतं = सृतं निर्गतं, अवलोक्य = विलोक्य, ग्रन्थविस्तरं = विस्तीर्णशास्त्रं, क्रमशः = क्रमेण, क्रियमाणसमासतः = संक्षेपेणैतच्छास्त्रं क्रियमाणम्। मम = ग्रन्थकर्त्ता, उत्साहः = उल्लासः।

१.६.३ व्याख्या

आचार्यः वराहमिहिरः स्वग्रन्थस्य विशेषतां कथयति यत् आदौ ब्रह्मण आरभ्य ततः अयैः ज्योतिषशास्त्रप्रवर्तकैः व्यास-वसिष्ठादिभिः निर्मितं अतिविस्तृतशास्त्रं अवलोक्य तं शास्त्रं संक्षेपरूपेण कथयामि। आचार्यस्य तात्पर्यं अस्ति यत् पूर्वाचार्यैः यत् वर्णितं शास्त्रं वर्तते तत् एव साररूपेण बृहत्संहिता इति नाम्ना अत्र मया उपस्थाप्यते न तु नूतनतया किमपि उच्यते।

१.७ स्वग्रन्थस्य परिचयः

आचार्यः स्वग्रन्थपरिचयस्य सन्दर्भे कथति यत्

१.७.१ श्लोकः

वक्रानुवक्रास्तमयोदयाद्यास्ताराग्रहाणां करणे मयोक्ताः।
होरागतं विस्तरतश्च जन्मयात्राविवाहैः सह पूर्वमुक्तम्॥

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

१.७.२ अन्वयः

मया पूर्वं करणे ताराग्रहाणां वक्रानुवक्रास्तमयोदयाद्या उक्ताः होरागतं जन्म यात्राविवाहैः सह विस्तरतश्च पूर्वमुक्तम्।

प्रतिपदार्थः — मया = वराहमिहिराचार्येण, पूर्वं करणे = पञ्चसिद्धान्तिकेति करणग्रन्थे, ताराग्रहाणां = भौम-बुध-गुरु-शुक्र-शनिग्रहाणां, वक्रं = विपरीतगमनम्, अनुवक्रं = स्पष्टगतिः वक्रां गतिं त्यक्त्वा पुनः स्पष्टां गतिमाकाङ्क्षिताः अनुवक्रित इति उच्यते, अस्तमयम् = अस्तमयः तेषामेव ग्रहाणां सूर्यवशेन भवति, उदितः = आदित्यमण्डलादिविप्रकृष्टो यदा ग्रहः भवति तदा आकाशे दृश्यते स च उदित इति उच्यते एवं प्रकारेण विविधाः ग्रहास्थितयः वर्णिताः।

१.७.३ व्याख्या

आचार्येण पञ्चसिद्धान्तिका इत्याख्ये करणग्रन्थे ताराग्रहाणां वक्रानु वक्रास्तमयोदयाद्या विस्तारपूर्वकं कथितम्। अर्थात् भौमादिग्रहाणां विपरीतगमनं वक्रत्वं भवति। यथा यदा भौमादिको ग्रहो मेषस्थो मीनं याति स वक्रित इति कथ्यते। अनुवक्रं स्पष्टगतिम् इति कथ्यते। यथा वक्रां गतिं त्यक्त्वा पुनः स्पष्टां गतिमाक्षितः स अनुवक्रम् भवति। अस्तमयम् सूर्यवशेन भवति। यथा यः चन्द्रादिको ग्रहः सूर्यसमीपवर्ती भवति सः सूर्यकिरणाभिभूतो आकाशे लोकानां नायाति तद अस्तः इति कथ्यते। उदयं अपि सूर्यवशेन भवति। यदा स एव ग्रह सूर्यमण्डलाद्विप्रकृष्टो भवति तदा आकाशे दृश्यते स उदितः इति उच्यते। पञ्चताराग्रहेषु परस्परं युद्धं भवति। चन्द्रेण नक्षत्रैश्च सह समागमो भवति। पूर्वं करणग्रन्थे आचार्येण कथितम्। बृहज्जातकादिहोराग्रन्थैरपि पूर्वमेव जन्म-यात्राविवाहादि विषयाणां वर्णनं विस्तारेण कृतम्। अत्र प्रसङ्गवशात् ग्रहाणां उदयास्तं प्रस्तूयते-

दस्रेन्दवः शैलभुवश्च शक्राः खचन्द्राः तिथयः क्रमेणा।
चन्द्रादितः काललवा निरूक्ता ज्ञ शुक्रयोर्व्रक्रगयोर्द्विहीनाः॥

चन्द्रादि ग्रहाणां क्रमेण एते कालांशाः भवन्ति।

ग्रह	चन्द्रः	भौमः	बुधः	गुरुः	शुक्रः	शनिः
कालांशः	12	17	14	11	10	15

बोधप्रश्नाः

७. भाषाभेदात् अर्थे भेदः भवति वा न?

८. क्षितितनयस्य कः अर्थः?

९. वेदमन्त्रः शब्दनिष्ठो भवति वा अर्थनिष्ठः?

१०. पञ्चसिद्धान्तिका करणग्रन्थः अस्ति वा सिद्धान्तग्रन्थः?

११. पञ्चताराग्रहेषु के के ग्रहाः भवन्ति?

१२. समागमे कः हेतु?

१३. बुधग्रहस्य कालांशान् लिखत।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

१.८ जगदुत्पत्तिकथनम्

आचार्यः जगदुत्पत्तिविषये कथयति यत्।

१.८.१ श्लोकः

कपिलः प्रधानमाह द्रव्यादीन् कणभुगस्य विश्वस्य।
कालं कारणमेके स्वभावमपरे परे जगुः कर्म॥

१.८.२ अन्वयः

कपिलः अस्य विश्वस्य कारणं प्रधानम् आह। कणभुक् (अस्य विश्वस्य कारणं) द्रव्यादीन् (आह)। एके कालं कारणं जगुः अपरे स्वभावं कर्म (जगुः)।

प्रतिपदार्थः

कपिलः = सांख्याचार्यः, अस्य विश्वस्य = जगतः, कारणम् = उत्पत्तिकारणं, प्रधानम् = प्रकृति-पुरुषात्मकम्, आह = उवाच। कणभुक् = कणं चित्वा भुनक्ति यः सः कणभुक् कणादः वैशेषिकदर्शनप्रवर्तकः जगदुत्पत्तिकारणं, द्रव्यादीन = द्रव्यादिपदार्थान् जगाद, एके = केचन विद्वांसः कालमेव जगतः कारणं, जगुः = अकथयन्। अपरे = अन्ये स्वभावमेव = प्रकृतिमेव कारणं जगुः।

१.८.३ व्याख्या

जगदुत्पत्तिविषये सांख्याचार्येन कपिलेन पञ्चविंशतितत्वानि स्वीक्रियन्ते। तद्यथा पञ्चज्ञानेन्द्रियाणि श्रोत्रं, त्वक्, चक्षुषी, जिह्वा, नासिका इति पञ्चकर्मेन्द्रियाणि- वाक् पाणि, पाद, पायु, उपस्थ च इति भवन्ति। शब्दतन्मात्रं, स्पर्शतन्मात्रं, रूपतन्मात्रं, रसतन्मात्रं गन्धतन्मात्रं इति पञ्च तन्मात्राणि भवन्ति। एभ्य पञ्चभ्यः पञ्च महाभूतानि भवन्ति। यथा आकाश-वायु-अग्नि-जल-पृथिवीति। स्पष्टार्थ सारणी प्रस्तूयते –

कर्मेन्द्रियाणि	ज्ञानेन्द्रियाणि	तन्मात्राणि	महाभूतानि	मनः	प्रकृतिः	अहंकारः	महत्	पुरुषः
वाक् पाणी, पादौ, पायु उपस्थं	श्रोत्रं, त्वक्, चक्षुषी, जिह्वा, नासिका	शब्दः, स्पर्शः, रूपम्, रसः, गन्धः	आकाशः, वायुः, अग्निः, जलं, पृथिवी					
5	5	5	5	1	1	1	1	1

अस्ति यथा –

प्रकृतेर्महांस्ततोऽहङ्कारस्तस्माद् गणश्च षोडशकः।
तस्मादपि षोडशकात् पञ्चभ्यः पञ्च भूतानि॥

कणादः अस्य विश्वस्य द्रव्यादीन् पदार्थान् कारणं कथितवान्। द्रव्यगुणकर्मसामान्य-विशेषसमवायाः षट्पदार्थाः जगत्कारणत्वेन भवन्ति। द्रव्यं नवविधम्, आकाश-वायु-अग्नि-जल-पृथिवी-आत्मा-मन-काल-दिक् च इति प्रसिद्धम्। केऽपि पौराणिकाः कालं कारणं मन्यन्ते। अन्ये लौकायतिकाः स्वभावं जगतः कारणमिति मन्यते। मीमांसकाः जगतः कर्म कारणं मन्यन्ते। अर्थात् शुभेन कर्मेण शुभफलभोगी जायते अशुभेन विपरीतफलभोगी जायते। यथा-

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पूर्वजन्मार्जितं यच्च कर्म पुसां शुभाशुभम्।
तदेव सर्वजन्तूनां सृष्टिसंहारकारणम्॥

१.९ ब्रह्मोत्पत्तिकथनम्

जगदुत्पत्तिप्रसङ्गे आचार्यः ब्रह्मण उत्पत्तिमेवं कथयति–

१.९.१ श्लोकः

आसीत्तमः किलेदं तत्रापां तैजसेऽभवद्धैमे।
स्वर्भूशकले ब्रह्मा विश्वकृदण्डेऽर्कशशिनयनः॥

१.९.२ अन्वयः

इदं तमः आसीत् किल तत्रापां तैजसे हैमे स्वर्भूशकले अण्डे विश्वकृत्ब्रह्मा अर्कशशिनयनः अभवत्।

प्रतिपदार्थः – इदं = जगत्, तमः = अन्धकारमयम्, आसीत् = अभूत्, किल = निश्चयवाचकः, तत्र = तस्मिन् तमसि, अपाम् = जलं मध्ये, तैजसः = प्रकाशमये, हैमे = सुवर्णमये, स्वः = स्वर्गः, भू = पृथिवी, शकले = खण्डे, अण्डे = अण्डकारेः, विश्वकृद् = विश्वस्रष्टा, ब्रह्मा = पितामहः, अर्कः = सूर्यः, शशिः = चन्द्र, नयनः = नेत्रः अभवद् = सञ्जातः,।

१.९.३ व्याख्या

इदं जगत् अन्धकारमयम् आसीत्। तस्मिन् अन्धकारमये जगति जलम् आसीत्। जलमध्ये तेजोमयं सौवर्णाण्डम् अभवत्। अस्य अण्डस्य प्रथमखण्डे स्वर्गः द्वितीयखण्डे भूः अभवत्। तस्मिन्नखण्डे पितामहोऽभवत्। अस्य पितामहस्य ब्रह्मणः एकं नेत्रं सूर्यः अपरं चन्द्रोऽभवत्। इत्थं सूर्यचन्द्रनेलात्मकः ब्रह्मा अभवत्।

तदलमतिविस्तरेण प्रसङ्ग वादार्थनिर्णयोऽतिमहान् ।
ज्योतिःशास्त्राङ्गानां वक्तव्यो निर्णयोऽत्र मया ॥

अन्वयः – तद् अलमतिविस्तरेण प्रसङ्गवादार्थनिर्णयोऽतिमहान् अत्र मया ज्योतिःशास्त्राङ्गानां निर्णयो वक्तव्यो।

प्रतिपदार्थः – तद् = जगदुत्पत्तिविषये, अतिविस्तरेण = अतिविस्तारपूर्वकेन, अलम् = समाप्यते इति भावः, यतः प्रसङ्गवादार्थः = जगदुत्पत्तिप्रसङ्गविषये ये वादाः विचाराः तदर्थ निर्णयः, अतिमहान् = सामान्यतया न कर्तुं शक्यते अतः एतद्विषयकविचारैः अलम् (अतिविस्तरात्) सम्प्रति। ज्योतिःशास्त्रम् = ग्रहनक्षत्रादीनि तान्यधिकृत्य कृतं शास्त्रं ज्योतिषशास्त्रं ग्रहनक्षत्रयोगेन जगतः शुभाशुभसम्भवात्, तज्जयोतिषशास्त्रीयाङ्गानां = गणितसंहिताहोराशाखानां, निर्णयो = निश्चयो, मया = वराहमिहिरेण, वक्तव्यः = कथनीयः।

व्याख्याः – जगदुत्पत्तिविषये अतिविस्तारपूर्वकेन वक्तुं न शक्यते। यतोहि यदि प्रसङ्गावशात् वर्णनं क्रियते तदा अतिविस्तृतं भविष्यति। अत्र मया (वराहमिहिरेण) ज्योतिषशास्त्रस्य अङ्गानां विचारः क्रियते।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

१.१० ज्योतिषशास्त्रस्वरूपम्

१.१०.१ श्लोकः

ज्योतिःशास्त्रमनेकभेदविषयं स्कन्धत्रयाधिष्ठितं
तत्कात्स्न्योपिन यस्य नाम मुनिभिः सङ्कीर्त्यते संहिता।
स्कन्धेऽस्मिन् गणितेन या ग्रहगतिस्तन्त्राभिधानस्त्वसौ
होराऽन्योऽङ्गविनिश्चयश्च कथितः स्कन्धस्तृतीयोऽपरः।

१.१०.२ अन्वयः

ज्योतिःशास्त्रमनेकभेदविषयं स्कन्धत्रयाधिष्ठितं तत्कात्स्न्योपन यस्य संहिता नाम मुनिभिः सङ्कीर्त्यते स्कन्धेऽस्मिन् गणितेन या ग्रहगतिस्तन्त्राभिधानस्तु असौ होराऽन्योऽङ्गविनिश्चयश्च कथितः स्कन्धस्तृतीयोऽपरः।

प्रतिपदार्थः – ज्योतिःशास्त्रम् = ज्योतिषशास्त्रम्, अनेकभेदविषयम् = बहुप्रकारा अनेकभेदाः विषयाः यस्मिन् तत्, स्कन्धत्रयाधिष्ठितं = स्कन्धत्रयेण गणितहोरासंहिता शाखाख्येनाधिष्ठितं, तत्कात्स्न्योपनयस्य = तस्य ज्योतिःशास्त्रस्य निरवशेषेण, उपनयः = कथनं, संहिता नाम = संहिता इति नाम्ना कथ्यते, मुनिभिः = गर्गादिभिः, संङ्कीर्त्यते = कथ्यते, स्कन्धेऽस्मिन् = त्रिषु स्कन्धेषु प्रथमे गणितस्कन्धे, गणितेन = गणनेन, ग्रहगतिस्तन्त्राभिधानः = आदित्यादीनां प्रतिराशौ गमनं येन ज्ञायते तद् गणितं तस्य च तन्त्रमित्यपि संज्ञा, असौ = गणितस्कन्धस्तन्त्राभिधानः। होरा = प्रतिष्ठायात्राविवाहादीनां लग्नग्रहवशेन च शुभाशुभफलं जगति यथा निश्चीयते सा होरा, अन्योऽङ्गविनयश्चयश्च = द्वितीयोऽङ्गविनियश्चयः होराख्यः कथितः, स्कन्धस्तृतीयोऽपरः = अपरः तृतीयोऽयं स्कन्धः।

१.१०.३ व्याख्या

ज्योतिषशास्त्रे स्कन्धत्रयं वर्तते। सिद्धान्त संहिता होराचेति।

सिद्धान्तः – सिद्धान्तशब्दो गणितवाचकोऽस्ति। "गण्यते सङ्ख्यायते तद् गणितम्।" तत्प्रतिपादकत्वेन तत्संज्ञं शास्त्रमुच्यते"। यत्र त्रुट्यादितः प्रलयान्तकालकलना क्रियते स एव सिद्धान्तः। अर्थात् यत्र युग-वर्ष-अयन-ऋतु-मास-पक्ष-होरा-मुहूर्त-नाडी-विनाडी-प्राण-त्रुट्यादी ज्ञानं क्रियते स सिद्धान्तः। सिद्धान्तस्कन्धोऽपि त्रिविधः सिद्धान्त=तन्त्र=करणभेदात्।

(क) सिद्धान्त– "सृष्ट्यादेर्यद्ग्रहज्ञानं सिद्धान्तः स उदाहृतः" सिद्धान्तग्रन्थेषु कल्पादितः कल्पान्तं यावद् ग्रहगणितं भवति।

(ख) तन्त्र– "युगादितो यत्र ग्रहज्ञानं तन्त्रं तन्निगद्यते" अर्थात् युगादितो ग्रहानयनं क्रियते तत् तन्त्रसंज्ञकं भवति।

(ग) करणम्– "शकाद् यत्र ग्रहज्ञानं करणं तत् प्रकीर्तितम्" यत्र अभीष्टशकादितो ग्रहज्ञानं क्रियते तत् करणम् भवति।

संहिता– "संकीर्त्यते संहिता इति" यत्र जीवनपयोगिविविधप्रश्नविचारः क्रियते सा संहिता भवति। संहितासकन्धे संर्वेषां विषयाणां समावेशोऽस्ति। स्कन्धोऽयं ज्योतिषशास्त्रस्य ज्ञानकोशोऽस्ति।

होरा– होरास्कन्धे जन्मकुण्डलीविचारः संस्कारादिमुहूर्तग्रन्थाः, नष्टजातकविषयाः, प्रश्नशास्त्रीयग्रन्थाः जातकग्रन्थाश्च सम्मिलिताः सन्ति।

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

१.११ ग्रन्थप्रशंसा

आचार्यः बृहत्संहिताग्रन्थस्य प्रशंसामेवं करोति—

१.११.१ श्लोकः

प्रश्नप्रतिप्रश्नकथाप्रसङ्गान् स्वल्पोपयोगान् ग्रहसम्भवांश्च।
सन्त्यज्य फल्गूनि च सारभूतं भूतार्थमर्थैः सकलैः प्रवक्ष्ये॥

१.११.२ अन्वयः

प्रश्नप्रतिप्रश्न कथाप्रसङ्गान् स्वल्पोपयोगान् ग्रहसम्भवांश्च सन्त्यज्य फल्गुनि च सारभूतं भूतार्थमर्थैः सकलैः प्रवक्ष्ये।

प्रतिपदार्थः — प्रश्नः = जिज्ञासा, प्रतिप्रश्न = उत्तरम्, कथा = आख्यायिका, प्रसङ्गान् = सन्दर्भान्, स्वल्पः = अतिन्यूनः, ग्रहसम्भवः = सूर्यादीनाम् उत्पत्तयः, फल्गुनि = असारपदार्थाः, सन्त्यज्य = सन्त्यक्त्वा, सारभूतम् = संक्षेपरूपम्, भूतार्थ = दृष्टप्रत्ययं, सकलैः = समग्रैः, प्रवक्ष्ये = कथयिष्ये।

१.११.३ व्याख्या

ग्रहोत्पत्तिसन्दर्भे प्रश्नानां उत्तराणां, आख्यायिकानां तु अत्र प्रायः न कुत्रचिद् उपयुज्यन्ते। अतः सर्वान् अवशिष्यान् सन्त्यज्य यत् सारभूतं श्रेष्ठं लोकप्रत्यक्षजनकम् अहं अत्र कथयिष्ये।

बोधप्रश्नाः

१४. कपिलः कस्य दर्शनस्य प्रवर्तकः?

१५. सांख्ये कानि तत्वानि भवन्ति?

१६. द्रव्यादीन् पदार्थान् कः स्वीकरोति?

१७. ज्योतिषशास्त्रे कति स्कन्धाः सन्ति?

१.१२ सारांशः

अस्मिन् पाठे मुख्यरूपेण उपनयनाध्यस्य परिचयं भवान् ज्ञातवान् अस्ति। ग्रन्थकारः मङ्गलाचरणे निर्विघ्नतया ग्रन्थसमाप्तिकामनया सूर्यं प्रणमति। ततः ग्रन्थप्रयोजनं विस्तारपूर्वकम् प्रतिपादितवान् अस्ति। ग्रन्थकारः जगदुत्पत्तिविषये कपिलाचार्यस्य सांख्यदर्शनस्य वर्णनं कृतवान्। कणादस्य पदार्थद्रव्ययोः विषयेऽपि वर्णनं प्रतिपादितवान्। ज्योतिषशास्त्रस्वरूपमपि भवान् ज्ञातवान् यत् ज्योतिषे सिद्धान्त=संहिता=होरेति स्कन्धत्रयं वर्तते। तेषां परिचयः सम्यक्रूपेण भवान् ज्ञातवान् अस्ति।

१.१३ शब्दावली

१.	नभः	=	आकाशः।
२.	जगत्	=	संसारः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

३.	सविता	=	सूर्यः।
४.	प्रथमः	=	आद्यः।
५.	साधु	=	शोभनम्।
६.	मनुजः	=	मनुष्यः।
७.	तुल्यम्	=	सादृश्यम्।
८.	क्षितितनयः	=	मंगलः।
९.	पितामहः	=	ब्रह्मा।
१०.	नृ	=	मनुष्यः।
११.	दिव्यः	=	देवसम्बन्धिः।
१२.	प्रधानम्	=	महत्वपूर्णम्।
१३.	अपरः	=	अन्यः।
१४.	अनुवक्रः	=	सरलागतिः।
१५.	पूर्वमुक्तम्	=	पूर्वकथितम्।
१६.	ताराग्रहाः	=	भौमः, बुधः, गुरुः, शुक्रः, शनिः।

१.१४ सन्दर्भग्रन्थाः

१. **बृहत्संहिता (वराहमिहिरः)**, डॉ. सुरकान्त झा चौखम्बा संस्कृतसीरीज आफिसः वाराणसी।

१.१५ सहायकग्रन्थाः

१. **सूर्यसिद्धान्तः**, कपिलेश्वरशास्त्री चौखम्बा संस्कृतसंस्थानम् वाराणसी।

२. **संस्कृत हिन्दीकोशः**, वामन शिवराम आपटे, मोतीलाल बनारसीदास पब्लिशर्स प्रा. लि. दिल्ली।

३. **सांख्यतत्त्वकौमुदी**, चौखम्बा संस्कृतसंस्थानम् वाराणसी।

४. **बृहत्संहिता**, आचार्य नागेन्द पाण्डेयः, सम्पूर्णानन्द=संस्कृत=विश्वविद्यालयः वाराणसी।

५. **सिद्धान्तसिरोमणिः**, वापूदेवशास्त्री, सम्पूर्णनन्दसंस्कृत विश्वविद्यालयः वाराणसी।

१.१६ बोधप्रश्नोत्तराणि

१. सूर्यस्य।

२. विघ्ननिवारणार्थं।

३. वृष्टिः।

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

४. प्रजा।

५. ब्रह्मा।

६. बृहत्संहिता।

७. न।

८. मंगलः।

९. शब्दनिष्ठः।

१०. करणग्रन्थः।

११. भौमः, बुधः, गुरुः, शुक्रः, शनिः।

१२. चन्द्रः।

१३. १४।

१४. सांख्यदर्शनस्य।

१५. पञ्चविंशतितत्त्वानि।

१६. कणादः।

१७. त्रयः।

१.१७ अभ्यासप्रश्नाः

१. ग्रन्थप्रयोजनं लिखत।

२. पौरुषेयापौरुषेययोः सम्यम् कथं क्रियते?

३. ग्रन्थस्य वैशिष्ट्यम् लिखत।

४. ग्रहस्य कालांशान् लिखत।

५. जगदुत्पत्तिविचारं कुरूत।

६. मङ्गलाचरणस्य व्याख्यां लिखत।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

द्वितीयः पाठः – "दैवज्ञलक्षणम्"

पाठसंरचना

२.१ प्रस्तावना
२.२ उद्देश्यम्
२.३ दैवज्ञलक्षणम्
२.३.१ अभिजातादिगुणोपेतः
२.३.२ शुचिर्दक्षादिगुणयुक्तः
बोधप्रश्नाः
२.३.३ ग्रहगणितवेत्ता
२.३.४ चतुर्विधकालमानज्ञः
२.३.४.१ सौरमानम्
२.३.४.२ चान्द्रमानम्
२.३.४.३ नाक्षत्रमानम्
२.३.४.४ सावनमानम्
२.३.५ षट्यब्दादिकालवित्
बोधप्रश्नाः
२.३.६ अयन-सममण्डलादिज्ञाननिपुणः
२.३.७ शीघ्रमन्दोच्चादिज्ञानभिज्ञः
बोधप्रश्नाः
२.३.८ ग्रहणादिज्ञाता
२.३.९ ग्रहभ्रमणकक्षादिमानवेत्ता
२.३.१० भूभगणादिज्ञानपटुः
बोधप्रश्नाः
२.३.११ नानाप्रश्नभेदोपलब्धिज्ञः
२.३.१२ गर्गोक्तदैवज्ञलक्षणम्
बोधप्रश्नाः
२.४ सारांशः
२.५ शब्दावली
२.६ सन्दर्भग्रन्थाः
२.७ सहायकग्रन्थाः
२.८ बोधप्रश्नोत्तराणि
२.९ अभ्यासप्रश्नाः

२.१ प्रस्तावना

बृहत्संहितायाः द्वितीये पाठे भवतः स्वागतम् अस्ति। प्रथमे पाठे भवान् ग्रन्थस्य मङ्गलाचरणं ग्रन्थस्य वैशिष्ट्यं च ज्ञातवान्। ततः ज्योतिषशास्त्रस्वरूपं पौरुषेयापौरुषेययोः साम्यम् कथं विधीयत इत्यपि अधितवान् भवान्। सम्प्रति अस्मिन् पाठे भवान् दैवज्ञलक्षणं पठिष्यति। दैवज्ञस्य लक्षणानि बहूनि सन्ति। दैवं भाग्यं जानाति इति दैवज्ञः। दैवज्ञः कीदृशः तदा शास्त्रज्ञः भवति। परन्तु शास्त्रज्ञस्तु सर्वे दैवज्ञाः न भवन्ति परं लक्षणमपि अपेक्षते। लक्षणं यथा– दर्शनीयः, सुखजनकः, अलङ्कारयुक्तः, सत्यवादी अनिन्दकश्च। स्कन्धत्रये के के स्कन्धाः भवन्ति। तेषां वर्णनं भवान् पठिष्यति। अयनांशविषये भवान् सम्यक्रूपेण पठिष्यति। सूर्यसिद्धान्तः अयनांशस्य दोलागतिः वर्णयति परन्तु मुञ्जालादिभिः चक्रभ्रमणं

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मन्यते। भवान् ग्रहभ्रमणम् अपि पठिष्यति। सर्वे ग्रहाः स्वगतिवशात् भ्रमन्ति। ग्रहगतिस्तु द्विधा भवतः। प्रथमस्तु योजनात्मकं भ्रमणं, द्वितीयस्तु अंशात्मकं भ्रमणं भवति। मुख्यतः ग्रहणं सूर्यचन्द्रयोः भवति। सूर्यग्रहणं आमावस्यायां भवति। परन्तु प्रत्येकं अमावस्यायां न भवति यदि अमावस्यायां शराभावो भवति तदा सूर्यग्रहणं भवति। चन्द्रग्रहणं पूर्णिमायां भवति। चन्द्रग्रहणे छादकः भूभा छाद्यश्चन्द्र भवति। ततः गर्गोक्तदैवज्ञलक्षणं भवान् पठिष्यति।

२.२ उद्देश्यम्

अस्य पाठस्य अध्ययेन भवान्–

- अभिजातादिगुणोपेतस्य, दैवज्ञस्य लक्षणं वक्तुं शक्ष्यति।
- चतुर्विधकालमानज्ञानं कर्तुं प्रभविष्यति।
- अयनसममण्डलादि लक्षणं वक्तुं शक्ष्यति।
- भूभ्रमणादिस्वरूपं वक्तुं सक्षमः भविष्यति।
- गर्गोक्तदैवज्ञलक्षणं निरूपयितुं सक्षमः भविष्यति।

२.३ दैवज्ञलक्षणम्

२.३.१ अभिजातादिगुणोपेतः

आचार्यः अभिजातादिगुणसम्पन्नदैवज्ञस्य लक्षणम् एवं कथयति–

तत्र सांवत्सरोऽभिजातः प्रियदर्शनो विनीतवेशः सत्यवागनसूयकः समः सुसंहितोपचितगात्रसन्धिरविकलश्चारुकरचरणनखनयनचिबुकदशनश्रवणललाट-भ्रूत्तमाङ्गो वपुष्मान् गम्भीरोदात्तघोषः। प्रायः शरीराकारानुवर्तिनो हि गुणा दोषाश्च भवन्ति।

शब्दार्थः – सांवत्सर = दैवज्ञः, ज्योतिषशास्त्रस्य ज्ञाता, अभिजातः = कुलीनः दैवज्ञकुलप्रसूतः, प्रियदर्शनः = दर्शने सुखजनकः, विनीतवेषः = सरलवेषः, अलङ्कारयुक्तः। सत्यवाक् = सत्यभाषी, अनुसूयकः = अनिन्दकः, समः = रागद्वेषरहितः, सुसंहतः = अतिसंलग्नः, उपचितः = मांसलः, गात्रसन्धिः = बाहु-हस्त-उरु-जानु-गुल्प-पादेषु-सन्धयो गात्रसन्धिः, अविकलः = परिपूर्णावयवः, करौ = हस्तौ, चरणौ = पादौ, नखाः, नयन = नेत्रे, चिशेकम् = अध-राधोभागः, दशना = दन्ताः, श्रवणौ = कर्णौ, ललाटं = तिलकधारणस्थानं भ्रुवौ = नयनोपरि रोमलेखे, उत्तमाङ्गः = श्रेष्ठानि अङ्गानि यस्य सः श्रेष्ठाङ्गः, वपुष्मान् = श्रेष्ठैरङ्गैर्युक्तं वपुः यस्य सः वपुष्मान्, गम्भीरोदात्तघोषः = गभीरं उदात्तं मृदुश्च खः (स्वनं) ध्वनिर्वा यस्य सः गभीरोदात्तघोषः, प्रायः = बाहुल्येन शरीराकारानुवत्तिनः = शरीरस्य अकारः शरीराकारः तम् अनुवर्तन्ते शरीरकारानुवर्तिनः।

व्याख्या – सांवत्सरः। संवत्सरं जानातीति सांवत्सरः। आचार्यः दैवज्ञस्य लक्षणं कथयति। यत्– दैवज्ञः उच्चवर्गप्रसूतः, दर्शनीयः सुखजनकः, अलंकारयुक्तवेषः, सत्यभाषी, अनिन्दकः, रागद्वेषरहितः जातकं प्रति शत्रुत्व-मित्रत्वभादरहित इति अर्थः मांसलयुक्तशरीरत्र बाहु-हस्त-उरू-जानु-गुल्फ-पादेषु पुष्पसन्धियुक्तः, परिपूर्णावयवः अर्थात्, करौ, चरणौ, नखाः नयने दन्ताः कर्णौ ललाटं भ्रुवौ, शिरः प्रभृत्यङ्गानि दर्शनीयानि यस्य, शोभनं शरीरं यस्य गम्भीरोदात्तघोषः स्यात्। शरीरेण सादृशाः गुणदोषाः भवन्ति। अर्थात् निर्दोषं शरीरं गुणाः अनुवर्तन्ते। सदोषं शरीरं दोषा अनुवर्तन्ते।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

२.३.२ शुचिर्दक्षादिगुणयुक्तः

तत्र गुणाः शुचिर्दक्षः प्रगल्भो वाग्मी प्रतिभानवान् देशकालवित् सात्विको न पर्षद्भीरुः सहाध्यायिभिरनभिभवनीयः कुशलोऽव्यसनी शान्तिकपौष्टिकाभिचारस्नानविद्याभिज्ञै विबुधार्चनव्रतोपवासनिरतः स्वतन्त्राश्चर्योत्पादितप्रभावः पृष्टाभिधाय्यन्यत्र दैवात्ययाद् ग्रहगणितसंहिताहोराग्रन्थार्थवेत्तेति।

शब्दार्थः – शुचिः = शास्त्रोक्तशौचानुष्ठाता। दक्षः = प्रवीणः कुशलः, प्रगल्भः = पटु चतुरो वा। वाग्मी = वार्तालापे चतुरः। प्रतिभानवान् = प्रत्युत्पन्नमतिर्यश्च प्रतिभानवान्। देशकालवित् = सर्वदेशेषु व्यवहारज्ञः कालस्वरूपज्ञश्च। सात्विकः = निर्मलचित्तः। न पर्षदभीरुः = सभायां अभीरुस्त्यक्तभयः। सहाध्यायिभिः = सार्द्धं पठनं कृतं यैः ते सहाध्यायिनः तैः सहाध्यायिभिः अनभिभवनीयः = समानतन्त्रैः अनभिभवनीयो ज्ञेयः। कुशलः = शिक्षितः। अव्यसनी = गीत वाद्यनृत्यस्त्रीद्यूतनिद्रादिषु व्यसनेषु असक्तः। शान्तिकविद्याभिज्ञः = ग्रहादिविविधकारकैः जन्यउत्पातस्य प्रतीकारार्थं वेदोक्तमन्त्रपाठ-विनियोगानुष्ठाता। पौष्टिकविद्याभिज्ञः = आयुर्धनादिषु अधिकरणं पौष्टिकविद्या तद्भिज्ञः। अभिचारविद्याविज्ञः = वेताल-उत्थापन-मारण-उच्चाटन-विद्वेष-वशीकरण-स्तम्भन-चालनादि-कमभिचारविद्याभिज्ञः। स्थानविद्याविज्ञः = नित्यनैमित्तिककाम्यक्रियासु योग्यायोग्यस्थानचयने कुशलः। विबुधा = देवाः, अर्चनम् = पूजा, आवाहनम्, व्रतम् = चन्द्रायेणादिव्रतम्, उपवासः = व्रतम्, निरतः = सक्तः, अर्कचन्द्रग्रहणः-ग्रहसमागम-ग्रहयुद्धप्रभृतयः याः घटनास्ताभिः, आश्चर्यम् = कुतूहलम्, उत्पादितः = जनितः, यः प्रभावः = तेन स्वतन्त्रम्, पृष्टाभिधायी = परिपृष्टस्य अर्थस्य अभिधायकः वक्ता, दैवात्ययाद् = दिव्यान्तरिक्षभौमेषु उत्पातेषु यद्भाग्यशुभं = दैवात्ययः तत् निवारणायते देवात्ययाद् इति। ग्रहगणिते = पञ्चसिद्धान्तिकायां। संहितायां = फलग्रन्थे, होरायां = जातकादौ ग्रन्थवेत्ता = ग्रन्थस्य अर्थज्ञः।

व्याख्या – आचार्यः शुचिर्दक्षादिगुणयुक्तानां दैवज्ञानां लक्षणानि कथयति। सः कीदृशः भवितव्यः? इति जिज्ञासायाम् उच्यते – सः सात्विकः, चतुरः, सभायां वक्तुं शक्तः, वार्तालापे निपूर्णः प्रत्युत्पन्नमतिसम्पन्नः, सर्वदेशेषु, व्यवहारज्ञः, कालस्वरूपज्ञः, भयहर्षशोकादिभिः, अनभिभवनीयः, सभायां भयरहितः, सहाध्ययनीयः सर्वशास्त्रेषु कुशलः, गीत-वाद्य-नृत्य-स्त्री-द्यूत-द्युनिद्रादिषु व्यसनेषु असक्तः, शान्तिक-पौष्टिक-अभिचार-स्नानविद्याभिज्ञः, उत्पातप्रतीकारार्थं वेदोक्तमन्त्रपाठविनियोगानुष्ठाता, आयुर्धनादिषु अधिकरणं तदभिज्ञः, वेताल-उत्थापन-मारण-उच्चाटन-विद्वेषण-वशीकरण-स्तम्भनादीनाम् ज्ञाताभिचारविद्यानां तद्भिज्ञ। नित्य-नैमित्तिक-काम्यक्रियासु पटुः, देवार्चनभिज्ञः अर्थात् आवाहन-स्नान-माल्यानुलेपन-धूप-उपहार-वाद्य-गायन-नृत्य-स्तोत्रपाठादिकानां ज्ञाता, चान्द्रायणादिविविधव्रतज्ञानीं, एकादशी प्रदोषादिव्रतेषु सक्तः, सूर्यचन्द्रग्रहण-ग्रहसामागम-युद्धानां, दिव्यान्तरिक्षभौमोत्पातादीनाम् अशुभानां शान्त्यादिकज्ञाता भवेत्।

पञ्चसिद्धान्तिका-ज्ञाता भवेत्। सूर्यसिद्धान्तादिसिद्धान्तग्रन्थानाम् अर्थज्ञः, नारदसंहिताभद्रबाहुसंहितादिसंहिताग्रन्थानाम् अर्थज्ञः, बृहत्जातक-पाराशरहोराशास्त्र-लघुजातकादि होराग्रन्थानाम् अर्थवेत्ता स्यात् इति एतानि लक्षणानि दैवज्ञस्य सन्ति।

बोधप्रश्नाः

१. सांवत्सरस्य अर्थः कः?

२. दैवज्ञस्य कीदृशः वेषः?

३. शरीरसादृशं किं भवति?

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

४. सात्त्विकस्य कः अर्थः?

५. बृहज्जातकः ज्योतिषशास्त्रस्य कस्मिन् स्कन्धे परिगणितः अस्ति?

६. पञ्चसिद्धान्तिका कस्मिन् स्कन्धे परिगणितः अस्ति?

२.३.३ ग्रहगणितवेत्ता

तत्र ग्रहगणिते पौलिशरोमकवासिष्ठसौरपैतामहेषु पञ्चस्वेतेषु सिद्धान्तेषु युगवर्षायनर्तुमासपक्षाहोरात्रयाममुहूर्त्तनाडीप्राणत्रुटि त्रुट्याद्यवयवादिकस्य कालस्य क्षेत्रस्य च वेत्ता।

शब्दार्थः – ग्रहगणिते = सिद्धान्तगणिते, पौलिशरोमकवासिष्ठसौरपैतामहाः = एते सिद्धान्ताः पञ्चसिद्धान्तिकायां वर्णिताः सन्ति। युगानां = कृत-त्रेता-द्वापर-कलीनां प्रामणज्ञः। वर्ष = सौरवर्षम्। अयनम् = दक्षिणायनम् उत्तरायणम्। ऋतवः = षड् ऋतवः भवन्ति। मासः = चैत्रादिकः। पक्षः = मासार्धं पञ्चदशदिनानि, शुक्ल कृष्णपक्षौ। अहोरात्रम् = षष्टिःघंटिकाः। यामः = अहोरात्रस्य अष्टमो भागः, दिनस्य चतुर्थः भागः रात्रेश्च चतुर्थः भागः। मुहूर्तम् = दिनस्य पञ्चदशांशः, रात्रेश्च पञ्चदशांशः। नाडी = अहोरात्रषष्ट्यंशः। प्राणः = एकस्य श्वासस्य निर्गमप्रवेशकालः, त्रुटिः = चक्षुर्निमेषद्वयम्, त्रुट्याद्यवयवः = त्रुट्यादिसूक्ष्मा अवयवाः।

व्याख्या – दैवज्ञस्य लक्षणप्रसङ्गे आचार्यः कथयति यत् पुलिशसिद्धान्तः, रोमकसिद्धान्तः वासिष्ठसिद्धान्तः सूर्यसिद्धान्तः, पैतामहसिद्धान्तः एतेषु पञ्चसु सिद्धान्तेषु भिज्ञः। आचार्यस्य तात्पर्यम् अस्ति यत् स्वरचिते पञ्चसिद्धान्तिकाग्रन्थे पूर्वोक्ताः पुलिशादिपञ्चसिद्धान्ताः सन्ति। पञ्चसिद्धान्तिकायाम् आचार्यः वराहः कथयति। यत्–

पौलिशरोमकवासिष्ठसौरपैतामहस्तु सिद्धान्ताः।
पञ्चेभ्यो द्वावाद्यौ व्याख्यातौ लाटदेवेन॥
पौलिशकृतोऽस्फुटः असौ तस्यासन्नस्तु रोमकप्रोक्तः।
स्पष्टतरः सावित्रः परिशेषौ दुरविभ्रष्टौ॥

एतेषु सिद्धान्तग्रन्थेषु विविधकालमानानि वर्णितानि सन्ति। तेषां युग-वर्षप्रभृति कालमानानां वेत्ता ज्योतिषी भवेत्। तत्र चतुर्णां युगानां कृतत्रेताद्वापरकलीनां प्रमाणज्ञः। अर्थात् खखखदन्ताब्धयः ४३२००० कलियुगप्रमाणं भवति। तदेव द्विगुणं द्वापरप्रमाणं, त्रिगुणं त्रेताप्रमाणं तथा चतुर्गुणं कृतयुगप्रमाणं भवति। एतैः सर्वैः एकीकृत्य चतुर्युगप्रमाणं भवति। ब्रह्मसिद्धान्ते–

खचतुष्टयरदवेदा ४३२०००० रविवर्षाणां चतुर्युगं भवति।
सन्ध्यासन्ध्यांशैः सह चत्वारि पृथक् कृतादीनि॥
युगदशभागो गुणितः कृतं चतुर्भिस्त्रिभिर्गुणस्त्रेता।
द्विगुणो द्वापरमेकेन सङ्गुणः कलियुगं भवति॥

$$\frac{4320000\times4}{10} = 1728000$$ कृतप्रमाणम्

$$\frac{4320000\times3}{10} = 1296000$$ त्रेताप्रमाणम्

$$\frac{4320000\times2}{10} = 864000$$ द्वापरप्रमाणम्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

$$\frac{4320000 \times 1}{10} = 432000$$ कलिप्रमाणम्

तथा च पुलिशसिद्धान्ते दिव्येन मानेन पठ्यन्ते।

अष्टचत्वारिंशत् पादविहिना क्रमात् कृतादीनाम्।
अब्दास्ते शतगुणिता ग्रहतुल्ययुगं तदेकत्वम्॥

$48 \times \frac{1}{4} = 12$

$48-12 = 36$

$36-12 = 24$

$24-12 = 12$

$48 \times 100 = 4800$

$36 \times 100 = 3600$

$24 \times 100 = 2400$

$12 \times 100 = 1200$

इदम् प्रमाणं दिव्यमाने भवति।

दैवज्ञः वर्षप्रमाणं जानीयात्। तद् वर्षप्रमाणं किम्? यावता कालेन सूर्यो द्वादश राशीन् मेषादिमीनान्तं भुङ्क्ते तद् वर्षम्। तेन सौरवर्षप्रमाणेन युगसंख्यामानम् भवति। ततः मास-प्रमाणज्ञः। रविः यावता कालेन एकराशिं भुङ्क्ते तत्तुल्यः कालः मासः भवति। ततः अयनप्रमाणं जानीयात्। तद् अयनप्रमाणं किं? सूर्यः मकरादिषड्राशि पर्यन्तं यया चलति तया उत्तरायणं तथा कर्कादिषड्राशिपर्यन्तं दक्षिणायनञ्च भवति। दैवज्ञः ऋतु प्रमाणं जानीयात्। तद् ऋतुप्रमाणं किम्? शिशिरादयः षड् ऋतवः भवन्ति। ते च मासद्वयात्मकाः भवन्ति। यथा मकरकुम्भस्थे सूर्ये शिशिरः। मीनमेषस्थे सूर्ये वसन्तः। वृषमिथुनस्थे सूर्ये ग्रीष्मः। कर्कसिंहस्थे सूर्ये वर्षा। कन्यातुलास्थे सूर्ये शरद्। वृश्चिकधन्विस्थिते सूर्ये हेमन्तः। यथा-

उदगयनं मकरादावृतवः शिशिरादयश्च सूर्यवशात्।
द्विभवनकालसमानां दक्षिणमयनं च कर्कटकात्॥

ततः दैवज्ञः मासप्रमाणं जानीयात्। तत् मासप्रमाणं किं? त्रिंशद्दिनात्मकानां एकः मासः भवति। ततः पक्षप्रमाणं जानीयात्। तदा पक्षप्रमाणं किं? मासार्धं पक्षः भवति। अर्थात् पञ्चदशदिनानां शुक्लपक्षः पञ्चदशदिनानां कृष्णपक्षः। ततः अहोरात्रप्रमाणं जानीयात्। अहोरात्रप्रमाणं किं? षष्टिघट्यात्मकम् अहोरात्रं भवति। ततः यामप्रमाणं जानीयात्। यामप्रमाणं किं? अहोरात्रस्य अष्टमः भागः याम इति कथ्यते। अर्थात् दिनस्य चतुर्थभागः, रात्रेश्च चतुर्थभागः यामः भवति। ततः नाडीप्रमाणं जानीयात्। नाडीप्रमाणं किं? तदा अहोरात्रस्य षष्ट्यंशः नाडी भवति। ततः प्राणप्रमाणं जानीयात्। प्राणप्रमाणं किं? श्वासनिर्गमप्रवेशकालात्मकः प्राणः भवति। ततः त्रुट्यादिप्रमाणं जानीयात् तत् त्रुटयादिप्रमाणं किं? सूच्या पद्मपत्रभेदनकालप्रमाणम् त्रुटिः इति कथ्यते।

सूच्या भिन्ने पद्मपत्रे त्रुटिरित्यभिधीयते।

प्रसङ्गवशात् श्लोकः प्रस्तूयते। यथा-

षट् प्राणस्तु विनाडी तत्षष्ट्या नाडिका दिनं षष्ट्या।
एतासां तत्त्रिंशन्मासस्तैर्द्वादशभिरब्दः॥

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

षष्ट्या तु तत्पराणां विकला तत्षष्टिरपि कला तासाम्।
षष्ट्यांशस्ते त्रिंशद्राशिस्ते द्वादश भचक्रम्॥

६ प्राणाः	=	१ विनाडी
६० विनाडी	=	१ नाडी
६० नाडी	=	१ दिनम्
३० दिनम्	=	१ मासः
१२ मासाः	=	१ वर्षम्
६० तत्पराः	=	१ विकला
६० विकला	=	१ कला
६० कला	=	१ अंशः
३० अंशाः	=	१ राशि
१२ राशिः	=	१ भगणम्

दैवज्ञानाम् एतानि लक्षणानि भवितव्यानि।

२.३.४ चतुर्विधकालमानज्ञः

चतुर्णां च मानानां सौरसावननाक्षत्रचान्द्राणामधिमासकावमसम्भवस्य च कारणाभिज्ञः। सौरादीनां च मानानामसदृशसद्वशयोग्यायोग्यत्वप्रतिपादनपटुः।

२.३.४.१ सौरमानम्

आचार्यः दैवज्ञस्य लक्षणप्रसङ्गे कथयति यत्, दैवज्ञः सौरमानं जानीयात्। तद् सौरमानं किम्? सूर्यः यावता कालेन अंशमेकं भुंक्ते तत्सौरं दिनं भवति। तत्र सूर्यस्य राशिप्रवेशकालाद् द्वितीयराशिप्रवेशकालं यावत् एकः सौरमासः भवति। अर्थात् प्रथमसंक्रान्तः द्वितीयसंक्रान्तिपर्यन्तम् एकः सौरमासः भवति। यथा- **संक्रान्त्या सौर उच्यते।** यदि सूर्यः एकस्य भचक्रस्य राशिचक्रस्य यावता कालेन भोगं करोति तावान् कालः सौरवर्षं कथ्यते। यथा- **रवेश्चक्रभोगोऽर्कवर्षं प्रदिष्टम्।**

२.३.४.२ चान्द्रमानम्

ततः दैवज्ञः चान्द्रमानं जानीयात्। तत् चान्द्रमानं किम्? प्रतिदिनं सूर्यचन्द्रयोः गत्यन्तरांशमितं चान्द्रमानं भवति। अर्थात् चन्द्रः अमान्ते सूर्येण सह योगं कृत्वा स्वाधिकगत्या सूर्यात् अग्रे सञ्चरितः यावन्मितं पूर्वदिशं याति तावन्मितं चान्द्रमानं भवति। द्वादशांशानां एका तिथिः भवति। रविचन्द्रयोः गत्यन्तरांशैः द्वादशभिः एकैका तिथिः भवति। तत् एवैकैकं चान्द्रदिनं भवति। यावत् रविचन्द्रयोः अन्तरांशाः भगणांशः 360^0 तुल्याः तावत् तिथयः स्त्रिंशत् भवन्ति। अतः

$$३६०^0 \div ३० = १२^0$$

सौरसावननाक्षत्रचान्द्रैस्तु मानवानां नित्यशो व्यवहारः दृश्यते। यथा–

वर्षायनर्त्तुयुगपूर्वकमत्र सौरात्।
मासास्तथा च तिथयस्तुहिनांशुमानात्।
यत् कृच्छ्रसूतकचिकित्सकवासराद्यम्।
तत्सावनाच्च घटिकादिकमार्क्षमानात्॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ततः दैवज्ञः अधिमाससमानं जानीयात्। तत् अधिमाससमानं किम्? यदि एकस्मिन् चान्द्रे मासे सूर्यसंक्रान्तेः अभावः भवति तदा अधिमासः भवति। महायुगे चन्द्रभगणा ५७७५३३३६ रविभगणाः ४३२००००।

५७७५३३३६-४३२०००० = ५३४३३३३६ चान्द्रमासाः
४३२०००० × १२ = ५१८४००००
५३४३३३३६-५१८४०००० = १५९३३३६ अधिमासाः

ततः दैवज्ञः क्षयमानं जानीयात्। क्षयमानं किम्? तिथ्यन्तकालाद् यावता अन्तरेण सूर्योदयो भवति तावान् कालः क्षयसंज्ञकः। यथा- **तिथ्यन्तसूर्योदययोस्तु मध्ये सदैव तिष्ठत्यवमावशेषम्** क्षयशेषो वर्धितो यद् एकतिथितुल्यः भवति तद् एकस्या तिथेः क्षयः भवति। यथा-

असंक्रान्तिमासोऽधिमासस्फुटः स्यात्।
द्विसंक्रान्तिमासोक्षयाख्यः कदाचिद्॥
क्षयः कार्तिकादित्रये नान्यतः स्याद्।
तदा वर्षमध्येऽधिमासद्वयञ्च॥

ततः आचार्यः दैवज्ञस्य लक्षणप्रसङ्गे कथयति यत् दैवज्ञः सौरादीनां मानानां योग्यायोग्यत्वं जानीयात्। अर्थात् यावता कालेन सूर्यः राशिद्वादशकं भुङ्क्ते तावान् कालः सूर्यमानेन वर्ष भवति। द्वादशराशयः द्वादशमासा एव। सौरमानं सावनदिनानां **३६५।१५।३०।२२।३०** भवति। सावनं मानं सूर्योदयात् स्वोदयात् वा सूर्योदयं स्वोदयं यावत् षष्ट्यधिकेन दिनशतत्रयेण **३६०** भवति। ततः दैवज्ञः योग्यायोग्यत्वं जानीयात्। तत् किं नाम योग्यायोग्यत्वं? सौरं मानं क्वं योग्यं क्व वा अयोग्यं अप्रयोज्यं वा तेन यत् निश्चीयते तत् योग्यायोग्यत्वं अर्थात् सौरमानेन वर्ष-अयन-ऋतु-युगानां गणना क्रियते इत्थं सौरमानस्य भवन्ति तत्र योग्यत्वं अन्यत्र न। सावनमानेन यज्ञ-व्रत-उपवास-चिकित्सा-सूतकादिज्ञानं सावनमानेन कार्यमतस्तस्य तत् योग्यं अन्यत्र न। यथा-

मानानि सौरचान्द्रार्क्षसावनानि ग्रहानयनमेभिः।
चारैः पृथक् चतुर्भिः संव्यवहारश्च लोकस्य॥
युगवर्षविषुवदयनर्त्वहर्निशा वृद्धिहानयः सौरात्।
तिथिकरणाधिकमासोनशत्रपूर्वक्रियाश्चान्द्रात्॥
यज्ञसवनप्रमाणग्रहगत्युपवाससूतकचिकित्साः।
सावनमानाज्ज्ञेयाः प्रायश्चित्ताः क्रियाश्चान्याः॥

२.३.४.३ नाक्षत्रमानम्

दैवज्ञः नाक्षत्रमानं जानीयात्। तद नाक्षत्रमानं किं? नक्षत्रोदयद्वयान्तर्गतः कालः नाक्षत्रं दिनं भवति। अर्थात् किमपि नक्षत्रमुदयानन्तरं प्रवहगत्या पुनर्यावता कालेन उदेति तावान् कालो हि नाक्षत्रं दिनं भवति। यथा सूर्यसिद्धान्ते-

भचक्रभ्रमणं नित्यं नाक्षत्रं दिनयुच्यते।
नक्षत्रनाम्ना मासास्तु ज्ञेयाः पर्वान्तयोगतः॥

पूर्णिमान्तेषु यस्य यस्य नक्षत्रस्य योगो भवति तत् तत् नक्षत्रसंज्ञाया मासाः अवगन्तव्याः। यथा- अश्विनीसंयुक्ता पूर्णिमा यस्मिन् मासे सः मासः अपि आश्विनः। कृत्तिकासंयुक्ता पूर्णमासी कार्तिकी मासः अपि कार्त्तिकः। एवं मृगशीर्षेण मार्ग शीर्षः।

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पुष्येण पौषः। मघया माघः। फाल्गुन्या फाल्गुनः। चित्रया चैत्रः। विशाखया वैशाखः। ज्येष्ठया ज्येष्ठः। आषाढया आषाढः। श्रवगेन श्रावषः। भाद्रपदेन भाद्रपदो मासः। एवं द्वादश मासाः भवन्ति।

२.३.४.४ सावनमानम्

ततः दैवज्ञः सावनमानं जानीयात्। तद् सावनमानं किं? प्रथमसूर्योदयात् द्वितीयसूर्योदयपर्यन्तं एकं सावनं दिनं भवति। यथा–

उदयादुदयं भानोः सावनं तत् प्रकीर्तितम्।
सावनानि स्युरेतेन यज्ञकालविधिस्तु तैः॥
सूतकादिपरिच्छेदो दिनमासाब्दपास्तथा।
मध्यमा ग्रहभुक्तिस्तु सावनेनैव गृह्यते॥

सावनदिनैः यज्ञकालस्य व्यवहारः कार्यः क्रियते। जननमरणयोः अशौचनिर्णयः चिकित्सितचान्द्रायणव्रतयोः निर्णयः सावनमानेनैव क्रियते।

२.३.५ षट्यब्दादिकालवित्

आचार्यः वराहमिहिरः कथयति यत्–

षष्ट्यब्दयुगवर्षमासदिनहोराधिपतीनां प्रतिपत्तिच्छेदवित्।

शब्दार्थः – षष्ट्यब्दः = षष्टिवर्षाणि, प्रतिपत्तिः = प्रवर्तनं छेदः = निवृत्तिः।

व्याख्या – आचार्यः अन्यलक्षणानि कथयति यत् सांवत्सरः किं किं जानीयात्। तदा षष्ट्यब्दं जानीयात्। किं नाम षष्ट्यब्दं षष्टि वर्षाणि यस्मिन् काले तत् कालचक्रं षष्ट्यब्दं भवति। षष्ट्यब्दस्य प्रारम्भो कस्मिन् काले अभवत्। आचार्यः बृहस्पतिचारे कथयति यत् बृहस्पतिः माघमासे धनिष्ठानक्षत्रे सर्वप्रथम उदितः सञ्जातः। तस्मात् कालात् प्रभवनामकः षष्ट्यब्दस्य आरम्भः सञ्जातः। यथा–

आद्यं धनिष्ठां शमभिप्रवृत्तो माघे यदा यात्युदयं सुरेज्यः।
षष्ट्यब्दपूर्वः प्रभवः स नाम्ना प्रपद्यते भूतहितस्तदाब्दः॥

अस्मिन् षष्ट्यब्दान्तर्गते द्वादशयुगानि भवन्ति। तानि नाम्ना– विष्णुः गुरुः, इन्द्रः, अग्निः, त्वष्टा, अहिर्बुध्न्यः, पितृदेवः, विश्वेदेवः, सोमः, इन्द्राग्निः, अश्विनौ, सूर्यः इति सन्ति। दैवज्ञः वर्षपतिं जानीयात्। किं नाम वर्षपतिः? यदा अहर्गणे २२२६ योज्यं एवं २५२० इत्यनेन भक्तं इत्थं या लब्धिः सा ३६० संख्यया भक्तं तद् गतवर्षं भवति। शेषसंख्यां ३६० तः संशोध्य शेषतु गतदिनादि भवन्ति। तस्यां 7 भक्तं लब्धिः सूर्यादिक्रमेण वर्षपतिः भवति। ततः मासपतिं जानीयात्। मासपतेः अपि सावनेनैव मानेन प्रवृत्तिनिवृत्ती भवतः। सूर्यसिद्धान्ते अस्ति यत्–

मासाब्ददिनसङ्ख्याऽऽप्तं द्वित्रिघ्नं रूपसंयुतम्।
सप्तोद्धृतावशेषौ तु विज्ञेयौ मासवर्षपौ॥

अहर्गणे त्रिंशता भक्ता यत् लब्धं तत् द्विगुणम् कृत्वा एकेन सहितं कार्यम्। सप्तभक्तं यः अवशेषः स मासपतिः भवति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

$$\frac{\text{अहर्गणः}}{30} = \text{लब्धिः}$$

$$\frac{\text{लब्धिः}\times 2+1}{7} = \text{शेषं मासपतिः भवति।}$$

ततः दिनपतिहोरापत्यौ जानीयात्। परन्तु दिनपतिहोराधिपत्योः आचार्याणां निश्चयो नास्ति। कैश्चिद् औदायिको वारपतिः मन्यते। कैश्चिद् माध्याह्निको वारपतिः मन्यते। कैश्चिद् अस्तमयिको वारपतिः मन्यते तदा अन्ये आर्द्धरात्रिकं वारपतिं स्वीकुर्वन्ति। यथा–

द्युगणाद्दिनवारपतिर्द्युगणोऽपि हि देशकालसम्बन्धः।
लाटाचार्येणोक्तो यवनपुरेऽर्द्धास्तगे सूर्ये॥
रव्युदये लङ्कायां सिंहाचार्येण दिनगणोऽभिहितः।
यवनानां निशि दशभिर्गतैर्मुहूर्तैश्च तद्गुणा॥
लङ्कार्द्धरात्रसमये दिनप्रवृत्तिं जगाद चार्यभटः।
भूयः स एव चार्कोदयात् प्रभृत्याह लङ्कायाम्॥

दिनाधिपस्तु सावनेनैव मानेन सूर्योदयात् स्वीक्रियते। होराधिपत्यानयने तत्र वारपतेः आरम्भात् यावतीनां घटीनां दिनगतानां रात्रिगतानां वा कालहोरा ज्ञातुमिष्यते ताः घटिका अभीष्टकाले एकीकृत्य यावत्यो भवन्ति ताः द्विगुणाः कार्याः। ततः ताः पञ्चभिर्विभज्य अपहृत्य अवशेषः अङ्कसमो दिनपात्प्रभृति इष्टे काले होराधिपतिः भवति।

बोधप्रश्नाः

७. पञ्चसिद्धान्तिकायां कति सिद्धान्ताः सन्ति?

८. पञ्चसिद्धान्तिका कस्य रचना अस्ति?

९. सौरमाने चतुर्युगमानं किम्?

१०. ऋतुसंख्यां लिखत?

११. उत्तरायणः कदा भवति?

२.३.६ अयन-सममण्डलादिज्ञाननिपुणः

सिद्धान्तभेदोऽप्ययननिवृत्तौ प्रत्यक्षं सममण्डललेखासम्प्रयोगाभ्युदितांशकानां छायाजलयन्त्रदृग्गणितसाम्येन प्रतिपादनकुशलः।

शब्दार्थः – आचार्यः दैवज्ञस्य लक्षणे कथयति यत् सः अयनादिज्ञाननिपुणः स्यात्। दैवज्ञः पौलिशादिसिद्धान्तानां भेदप्रतिपादनं जानीयात्।यथा– पौलिशकृतोस्फुटो असौ तस्यासन्न स्तु रोमकः प्रोक्तः।

स्पष्टतरः सावित्रः परिशेषौ दूरविभ्रष्टौ।

अर्थात् पौलिशसिद्धान्तः अस्पष्टः तस्य आसन्नः रोमकसिद्धान्तः सौरसिद्धान्तस्तु स्पष्टतरः पैतामहवशिष्टसिद्धान्तौ तु भ्रष्टौ। अनेन प्रकारेण यः प्रतिपादयति स सिद्धान्तभेदः अर्थात् सिद्धान्तवेत्ता भवति।

अयनयोः दक्षिणोत्तरयो निवर्तने प्रतिपादने कुशलः। यथा– कस्मिंश्चित्

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सिद्धान्ते यावद्भिः दिनैः यावतीभिः घटिकाभिः यावत् अयनचलनम्। अन्यस्मिन् सिद्धान्ते तस्मात् भिन्नं अयनचलनकालः अयनचलनप्रवृत्तिर्वा प्रतिपादितः तत्तत्सिद्धान्तानुसारम् अयनचलनप्रतिपादने कुशलः स्यात्। सूर्यसिद्धान्तेन अयनस्य दोला चलनं मन्यते। अन्यसिद्धान्ताः चक्रगतिं स्वीकुर्वन्ति। सूर्यसिद्धान्ते अस्ति यत् नाडीक्रान्तिवलययोः सम्पातविन्दोः अयनं उभयतो यदा अष्टोत्तरशतमंशं चलति तदा तस्यैको भगणः। अर्थात् तस्य एकस्मिन् भगणे १०८ अंशाः भवन्ति। एवं एकस्मिन् महायुगे ६०० भगणाः। अतो महायुगे तदंशाः ६००x१०८=६४८००। एताः कलाः = ३८८८०००। महायुगे सौरवर्षाणि ४३२००००।

अतः अयनस्य वार्षिकी गतिः = $\frac{3888000}{4320000}$ = 0154 चतुश्पञ्चाशद्विकला आयाति।

सममण्डलरेखासम्प्रयोगाभ्युदितांशकानां च प्रतिपादने कुशलः। अर्थात् अस्मिन् इष्टदिने भगवतो सूर्यस्य एतावतीभिः दिनघटिकाभिः सममण्डले पूर्वापररेखायां प्रवेशः भवति तावतीभिः च शेषाभिः। तासां प्रतिपादने कुशलः।

२.३.७ शीघ्रमन्दोच्चादिज्ञानभिज्ञः

सूर्यादीनां च ग्रहाणां शीघ्रमन्दयाम्योत्तरनीचोच्चगतिकारणभिज्ञः।

शब्दार्थः – सूर्यादीनां = सूर्यचन्द्रभौमबुधगुरुशुक्रशनिग्रहाणाम्, शीघ्रः=अतिवेगः, मन्दः = अल्पः, याम्योत्तरम् = दक्षिणम् उत्तरञ्च।

व्याख्या – आचार्यः दैवज्ञस्य लक्षणं कथयति यत् दैवज्ञः सूर्यादीनां ग्रहाणां शीघ्र-मन्द-याम्य उत्तर-नीच-उच्चगतीनां कारणं जानीयात्। तेषां कः शीघ्रः कः मन्दः? तत्र सर्वग्रहेभ्य चन्द्रमाः शीघ्रः ततो मन्दो बुधः ततः शुक्रः ततः सूर्यः ततः मंगलः ततः गुरुः ततः शनिः भवति तथा सर्वग्रहेभ्यो मन्दः शनैश्चरः ततः शीघ्रः गुरुः ततः मंगलः ततः सूर्यः ततः शुक्रः ततः बुधः ततः चन्द्रमा शीघ्रतमो भवति। यः भूमेः आसन्नः भ्रमति स शीघ्रः यः भूमेः दूरः भ्रमति सः मन्दः भवति। अर्थात् यस्य कक्षा महती सः मन्दः यस्य कक्षा लघ्वी सः शीघ्रः। यथा–

भानामधः शनैश्चरबृहस्पतिकुजार्कशुक्रबुधचन्द्राः।
तेषामधश्च भूमिर्दृढीभूता खमध्यस्था॥

प्रसङ्गवशात् कक्षाक्रमः प्रस्तूयते।



दैवज्ञः याम्योत्तरगतिकारणं जानीयात्। तत् किं नाम याम्योत्तरगतिः? यदि मेषादितः कन्यान्तं यावद् यः ग्रहः भ्रमति स उत्तरां गतिम् आश्रितो भवति। यदि तुलादितः मीनान्तं यावद् यः ग्रहः भ्रमति स दक्षिणां गतिम् आश्रित्य भ्रमति। यथा–

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मेषादेः कन्यान्तं समुदगयनमण्डलार्धमपयातम्।
तौल्यादेर्मीनान्तं शेषार्धं दक्षिणेनैव॥

एतत् सूर्यस्य दक्षिणोत्तरगतिकारणम्। चन्द्रादिकः तु सूर्यभ्रमणप्रदेशानुसारेण कान्तिवृत्तानुसारेण वा स्वभ्रमप्रदेशात् स्वकक्षातो वा स्वविक्षेपवशेन दक्षिणेनोत्तरेण वा भवति। क्रान्तिवृत्त एव सूर्यस्य तु विक्षेपाभावः। अन्येषां ग्रहाणां क्रान्तिवृत्तात् क्रान्तिरूपमन्तरम्। उभयोः विक्षेपक्रान्त्योः संस्कारेण अर्थात् समदिक्त्वे योगेन तथा विपरीतदिशि वियोगेन स्फुटशरः तस्मात् ग्रहस्य उत्तर दक्षिणं वा उत्तरं स्फुटं ज्ञायते। यस्य क्रान्तिरुत्तरा स उत्तरां गतिमाश्रितः भवति यस्य दक्षिणा स दक्षिणां गतिमाश्रितः भवति। अथवा मकरादौ राशिषट्के स्थितः उत्तरां गतिमाश्रितो भवति कर्कटादौ राशिषट्के दक्षिणां दिशं भ्रमति। एवं ग्रहाणां याम्योत्तरा गतिः भवति। ततः दैवज्ञः नीचोच्चगतिकारणं जानीयात्। तत् किं नाम नीचोच्चगतिः? तत्र स्वभ्रमणप्रदेशात् कदाचित् ग्रह उपरि स्थितो भवति कदाचिद् अधःस्थः भवति। यत्र मध्यमः ग्रहः भवति तत् कक्षामण्डलम्। यत्र स्पष्टग्रहः भवति तत् प्रतिमण्डलम्। सूर्यचन्द्रौ मन्दप्रतिमण्डले भ्रमतः। मंगलबुधगुरूशुक्रशनिग्रहाणामानयनं मन्दशीघ्रप्रतिमण्डलयोः भ्रमणात् ज्ञायते। तत्र कक्षामण्डलादुपरि स्थितः ग्रहः यदा भवति तदा द्रष्टुः अतिदूरत्वात् स्वल्पबिम्बो दृश्यते। यदा कक्षामण्डलाद् अधःस्थितः भवति। तदा भूमेः आसन्नत्वात् महान् प्रमाणः दृश्यते।



बोधप्रश्नाः

१२. अयनः कतिधा भवति?

१३. सममण्डलस्य अपरनाम किम्?

१४. मन्दगतिकारकः ग्रहः कः?

१५. शीघ्रगतिकारकः ग्रहः कः?

१६. सूर्यचन्द्रौ कस्य मण्डले भ्रमतः?

२.३.८ ग्रहणादिज्ञाता

सूर्याचन्द्रमसोश्च ग्रहणे ग्रहणादिमोक्षकालदिक्प्रमाणस्थितिविमर्दवर्णादिश नामनागतग्रहसमागमयुद्धानामादेष्टा।

शब्दार्थः – मोक्षकालः = ग्रहणसमाप्तिकालः, दिग्ज्ञानम् = दिशाज्ञानम्, प्रमाणम् = ग्रहणप्रमाणम्, स्थितिसंज्ञः = ग्रहणे ग्राह्यग्राहककयोः स्पर्शकालात् मोक्षकालपर्यन्तं कालः स्थितिसंज्ञः। विमर्दसंज्ञः = सर्वग्रहणे = सम्मीलनकालादुन्मीलनकालान्तं विमर्दसंज्ञः, वर्णः = ग्रहणे गृहीतस्य बिम्बस्य वर्णः। ग्रहसमागमः = भौमादिपञ्चताराग्रहाणां चन्द्रेण सह संयोगः। युद्धम् = पञ्चताराग्रहाणां परस्परं युद्धः भवति।

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

व्याख्या – दैवज्ञस्य लक्षणप्रसङ्गे आचार्यः कथयति यत् दैवज्ञः ग्रहणं जानीयात्। किं नाम ग्रहणं ग्राहको यदा ग्राह्यं वस्तु गृह्णाति तदा ग्रहणम्। सर्वेषां ग्रहाणां ग्रहणं भवति, परन्तु सूर्याचन्द्रमसोः ग्रहणं मानवानां कृते दृष्टगोचरं भवति। चन्द्रग्रहणं तु पूर्णिमायां भवति। चन्द्रग्रहणे ग्राह्यश्चन्द्रः ग्राहको राहुसंज्ञा भूच्छाया प्रसिद्धा। सूर्यग्रहणं अमावस्यायां भवति। सूर्यग्रहणे ग्राह्यो: सूर्यः ग्राहकश्चन्द्रः भवति। ग्रहणे पञ्चावयवाः भवन्ति।

१. स्पर्शः

२. सम्मिलनकालः

३. मध्यः

४. उमिलनकालः

५. मोक्षकालः

ततः दैवज्ञः मोक्षकालं जानीयात्। मध्यग्रहणकालिके तिथ्यन्ते स्फुटप्रग्रहणस्थिततयर्धं विशोध्य ग्रहणादिः स्पर्शकालो वा भवति। तत्रैव मोक्षकालिकं स्फुटस्थित्यर्द्धं संयोज्य मोक्षकालो भवति। ततः दैवज्ञः दिग्ज्ञानं जानीयात्। ग्रहणे कस्यां दिशि स्पर्शः कस्यां वा दिशि मोक्षः इत्यत्र उच्यते। चन्द्रग्रहणे पूर्वस्यां दिशि स्पर्शः, पश्चिमदिशि मोक्षः भवति। ततः दैवज्ञः प्रमाणज्ञानं जानीयात्। परिलेखकरणात् प्रमाणज्ञानं भवति। ततः स्थितिकालं जानीयात्। तत् स्थितिकालं किम्? ग्रहणे ग्राह्यग्राहकयोः स्पर्शकालात् मोक्षकालपर्यन्तं कालः स्थितिसंज्ञः। स्पर्शकालात् मध्यग्रहणं स्थित्यर्धम्। ततः दैवज्ञः विमर्दकालं जानीयात्। तत् विमर्दकालं किं? सर्वग्रहणे सम्मीलनकालात् उन्मीलनकालं यावत् विमर्दसंज्ञः। सम्मीलनात् मध्यग्रहणान्तं स्पार्शिकं विमर्दार्धम्। मध्यग्रहणात् उन्मीलनान्तं मौक्षिकं विमर्दार्धम् भवति। ततः वर्णज्ञानं जानीयात्। वर्णज्ञानं कथं जानीयात्? तदा ग्रहणे ग्राहकस्य बिम्बस्य वर्णः भवति। स धूम्रकृष्णताम्रकपिल इति भवति। यथा–

आद्यन्तयोः स धूम्रः कृष्णः खण्डग्रहेऽर्धतोऽभ्यधिके।
ग्रासे च कृष्णताम्रः सर्वग्रहे कपिलवर्णः॥

अर्थात् ग्रहणस्य आद्यन्तयोः धूम्रवर्णः, खण्डग्रहणे कृष्णवर्णः अर्धाधिकं ग्रासं यदि स्यात् तदा कृष्णवर्णः ताम्रवर्णः च भवति। सर्वग्रहणे कपिलवर्णः भवति।

ततः दैवज्ञः समागमं जानीयात्। समागमस्तु चन्द्रकारणात् भवति। अर्थात् भौमादीनां ग्रहाणां चन्द्रमसा सह एकराशिगमनं भवति। तयोश्च अन्तरं एतावद्भिः हस्तैः अङ्गुलैः वा भेदः समागमो वा भविष्यति। एतदपि गणितसिद्धम्। ग्रहयोः विक्षेपौ ज्ञात्वा ततः तयोः विक्षेपयोः एकदिक्कयोः अन्तरं कार्यं भिन्नदिक्कयोः योगः। ततः तस्माद् अन्तराज्ञाद् योगाद् वा ग्रहमानैक्यार्धं विशोधयेत् यदि न शुद्धयति तदा भेदसमागमः भवति। ततः दैवज्ञः ग्रहयुद्धं जानीयात्। ग्रहयुद्धं कथं भवति। भौमादिग्रहाणां एकराशिगतानां दक्षिणोत्तरसंस्थानवशेन ग्रहयुद्धं भवति। एतान् लक्षणान् दैवज्ञं जानीयात्।

२.३.९ ग्रहभ्रमणकक्षादिमानवेत्ता

प्रत्येकग्रहभ्रमणयोजनकक्ष्याप्रमाणप्रतिविषययोजनपरिच्छेदकुशलः।

शब्दार्थः – प्रत्येकम् = एकमेकं प्रत्येकस्य। ग्रहभ्रमणम् = ग्रहस्य भ्रमणयोजनानि। कक्ष्याप्रमाणम् = ग्रहस्य कक्ष्यायोजनानि। परिच्छेदकुशलः = व्योजनात्मकं मानस्य ज्ञानकुशलः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

व्याख्या – आचार्यः दैवज्ञस्य लक्षणप्रसङ्गे कथयति यत् दैवज्ञः ग्रहभ्रमणयोजनप्रमाणं जानीयात्। सर्वप्रथमं योजनप्रमाणज्ञानं क्रियते। यथा–

योजनमष्टौ क्रोशाः क्रोशश्चत्वारि करसहस्राणि।
हस्तः शङ्कुद्वितयं द्वादशभिः सोऽङ्गुलैः शङ्कुः॥

४ क्रोशाः	=	१ योजनम् –लीलावत्यनुसारेण
८ क्रोशाः	=	१ योजनम्
४००० हस्ताः	=	१ क्रोशः
२ शङ्कु	=	१ हस्तः
१२ अङ्गुलाः	=	१ शङ्कुः

ग्रहभगणाः अत्र प्रस्तूयन्ते–

परिवर्त्तैरयुतगुणैर्द्विस्त्रिकृतैर्भास्करो युगं भुङ्क्ते।
रसदहनहुतवहानलशरमुनिवनेन्द्रियैश्चन्द्रः॥
वेदाश्विवसुरसाङ्कलोचनदस्रैरवनिसूनुः।
अम्बरगगनवियन्मुनिगुणविवरनगेन्दुभिः शशिसुतश्च॥
आकाशलोचनेक्षणसमुद्रषट्कानलैर्जीवः।
अष्टवसुहुतवहानलयमखनगैर्भार्गवश्चापि॥
कृतरसशरर्त्तुमनुभिः सौरो बुधभार्गवौ दिवाकरवत्॥

एकस्मिन् महायुगे–

सूर्यभगणाः	=	४३२००००
चन्द्रभगणाः	=	५७७५३३३६
भौमभगणाः	=	२२९६८२४
बुधभगणाः	=	१७९३७०००
गुरुभगणाः	=	३६४२२०
शुक्रभगणाः	=	७०२२३८८
शनिभगणाः	=	१४६५६४

बुधशुक्रयोः भागणसंख्या सूर्यवत् भवति। ततः दैवज्ञः कक्षाप्रमाणं जानीयात्। अत्र ग्रहाणां कक्ष्याप्रमाणं प्रस्तूयते। यथा–

रविकक्ष्या खखार्थरूपाग्निगुणाब्धयः।
चन्द्रकक्ष्या शून्यखखजिनाग्नयः॥
भौमकक्ष्या मुन्यग्निनन्दषट्काब्धिरूपवसवः॥

बुधशीघ्रकक्ष्या भवरदाब्धिदिशः।
बृहस्पतिकक्ष्या वेदर्त्वगार्थमुनिविश्वार्थाः॥

शुक्रशीघ्रकक्ष्या रदर्त्वब्धिषडङ्गाश्विनः।
सौरकक्षा गोऽग्न्यगशशिमुनिरसागार्काः॥

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ग्रहकक्षामानम्–

सूर्यकक्ष्याप्रमाणम्	= ४३३१५००
चन्द्रकक्ष्याप्रमाणम्	= ३२४०००
भौमकक्ष्याप्रमाणम्	= ८१३६९३७
बुधशीघ्रकक्ष्याप्रमाणम्	= १०४३२११
गुरुकक्ष्याप्रमाणम्	= ५१३७५७६४
शुक्रशीघ्रकक्ष्याप्रमाणम्	= २६६४६३२
शनिकक्ष्याप्रमाणम्	= १२७६७१७३९

दैवज्ञः योजनपरिच्छेदज्ञानं जानीयात्। किं नाम योजनपरिच्छेदः? इतः समुद्र एतावद्योजनसङ्ख्यः तस्माद्देशादयं देश एतावन्ति योजनानि तत्र जानीयात्। यथा अभीष्ट देशद्वयस्य अक्षभागानाम् अन्तरं कृत्वा यद् भवति तेन स्वराश्विखशरान् ५०२७ सङ्गुण्य खर्त्वग्नि ३६० भिर्विवर्जयेत् लब्धम् इष्टदेशयोः अन्तरयोजनानि।

$$\frac{\text{अक्षांशान्तर} \times 5027}{360}$$ = लब्धि इष्टदेशयोः योजनान्तरं भवति।

२.३.१० भूभगणादिज्ञानपटुः

भूभगणभ्रमणसंस्थानाद्यक्षावलम्बकाहर्ख्यासिचरदलकालराश्युदयच्छाया–नाडीकरणप्रभृतिषु क्षेत्रकालकरणेष्वभिज्ञः।

व्याख्या– दैवज्ञस्य लक्षणप्रसङ्गे आचार्यः कथयति यत् दैवज्ञः भूभगणसंस्थानं जानीयात्। अत भुवः स्थिति प्रस्तूयते। भूः गोलाकारा खमध्यस्थिता नक्षत्रपञ्जरमध्यगता च ध्रुवतारकद्वयप्रतिवद्धा तिष्ठति। स च भूगोलः समन्तात्तरु–नगर–सरित्–समुद्रादिभिः व्याप्तः। तस्योपरि मध्यभागे मेरौ देवाः तस्मादधः दक्षिणध्रुवे दैत्या च निवसन्ति। एवं इयं भूः गोलकारा खमध्यगा तिष्ठति। यथा–

मध्ये समन्तादण्डस्य भूगोलो व्योम्नि तिष्ठति।
विभ्राणः परमां शक्तिं ब्रह्मणो धारणात्मिकाम्॥

ततः दैवज्ञः नक्षत्रचक्रस्य भ्रमणसंस्थानं च जानीयात्। यथा भपञ्जरः (भचक्रं) ध्रुवयोः नियमितः प्रवहाऽनिलेन भ्राम्यमाणः। भुवं परितः भ्रमति। यथा–

मेरोः सममुपरि वियत्यक्षो व्योम्नि स्थितो ध्रुवोऽधोऽन्यः।
तत्र निवद्धो मरुता प्रवहेण भगणः॥

अर्थात् मेरोरुपरि ध्रुवस्य अक्षः अस्ति। अन्यः अपरः ध्रुवः अधोभागे अवस्थितः। अनयोर्मध्ये नक्षत्रचक्रं प्रवहवायुद्वारा भ्रमणं करोति। ततः दैवज्ञः अक्षांशज्ञानं जानीयात्। तत् किं नाम अक्षांशः? अक्षांशः ध्रुवोन्नतिः। अर्थात् निरक्षखमध्यस्वखमध्ययोरन्तरं याम्योत्तरवृत्ते अक्षांशः भवति। अक्षांशज्ञानं तु गणितद्वारा भवति। यथा सूर्यसिद्धान्ते–

शङ्कुच्छायाहते त्रिज्ये विषुवत्कर्णभाजिते।
लम्बाक्षज्ये तयोश्चापे लम्बाक्षौ दक्षिणौ सदा॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

छायया त्रिज्ये गुणिते पलकर्णेन भक्ते तदा अक्षांशः भवति।

$$\frac{\text{पलभा} \times \text{त्रिज्या}}{\text{पलकर्णः}} = \text{अक्षज्या तत् चापं अक्षांशः।}$$

ततः दैवज्ञः लम्बांशज्ञानं जानीयात्। तत् किं नाम लम्बांशः? स्वखमध्यध्रुवयोरन्तरं याम्योत्तरवृत्ते लम्बांशः भवति। लम्बांशज्ञानम् अपि गणितद्वारा भवति। यथा–

शङ्कुना त्रिज्यां संगुण्य तत् गुणनफलं यदि पलकर्णेन विभज्यते तदा लम्बांशः भवति।

$$\frac{\text{शङ्कु} \times \text{त्रिज्या}}{\text{पलकर्णः}} = \text{लम्बज्या तत् चापं लम्बांशः।}$$

अहर्व्यासम् अपि जानीयात्। किं नाम अहर्व्यासः। अहोरात्रव्यासः द्युव्यासः अहर्व्यासः इत्युच्यते। ग्रहस्य इष्टक्रान्तित्रिज्येयोः वर्गान्तरमूलं द्विगुणितं द्युव्यासः अहर्व्यासः वा भवति।

$$\sqrt{\text{इष्टक्रान्ति}^2 - \text{त्रिज्या}^2} \times 2 = \text{द्युव्यासः।}$$

यथा– क्रान्तित्रिज्या कृत्योरन्तरपदं द्विगुणं दिनव्यासः। ततः चरदलकालं अपि जानीयात्। तत् किं नाम चरदलकालः? स्वदेशनिरक्षदेशदिनरात्र्योः अन्तरं चरदलकालः भवति। चरदलकालस्तु पलभायाः भवति। अर्थात् १०, ८, १०/३ क्रमेण पलभया क्रमेण व्युत्क्रमेण च गुणितं चरखण्डः भवति। यथा यदि पलभा ५।४५ तदा चरखण्डमानं किम्।

५।४५ x १०	५।४५ x ८	५।४५ x १०
५०। ४५०	४०। ३६०	$\frac{50\text{। } 450}{3}$
$\frac{71\text{। } 420}{57\text{। } 30}$	$\frac{61\text{। } 360}{46\text{। } 00}$	१९।००

ततः राश्युदयम् अपि जानीयात्। मेषादिराशीनां उदयमानं निरक्षदेशे निश्चितम् अस्ति। स्वेदशीयम् उदयप्रमाणं तु भिन्नं भिन्नं भवति। निरक्षदेशे राश्युदयमानं विविधग्रन्थेषु एवम् अस्ति यत्–

मे	२७८	मी
वृ	२९९	कु
मि	३२३	म
क	३२३	ध
सिं	२९९	वृ
क	२७८	तु

ततः छायाज्ञानं जानीयात्। विषुवदिवसमध्याह्ने द्वादशाङ्गुलस्य शङ्कोश्छाया विषुवतीच्छाया भवति। ततः नाडीज्ञानं जानीयात्। नाडीज्ञानं कथं क्रियते? नाडीज्ञानाय सर्वप्रथमं शङ्कुच्छायां दृष्ट्वा कालानयनं छायातो क्रियते। कालात् च छायानयनं भवति। ततः

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

क्षेत्रकालज्ञानं जानीयात्। क्षेत्रकालज्ञानं तु इष्टकाले तात्कालिकं लग्नं दृष्ट्वा सूर्यं च इदं लग्नं कियतीनां घटिकानां दिनगतानां रात्रिगतानां वा रात्रिशेषण ज्ञानेन सूर्यस्य ज्ञानं भवति।

बोधप्रश्नाः

१७. सूर्यग्रहणः कदा भवति?

१८. चन्द्रग्रहणे छाद्यः कः भवति?

१९. स्पर्शकालात् मोक्षकालपर्यन्तं किं भवति?

२०. सर्वग्रहणे कः वर्णः भवति?

२१. शङ्कुप्रमाणं लिखत?

२२. मेषराशेः उदयमानं लिखत?

२.३.११ नानाप्रश्नभेदोपलब्धिज्ञः

नानाचोद्यप्रश्नभेदोपलब्धिजनितवाक्सारो निकषसन्तापाभिनिवेशैः कनकस्येवाधि- कतरममलीकृतस्य शास्त्रस्य वक्ता तन्त्रज्ञो भवति।

शब्दार्थः – नानाचोद्यप्रश्नभेदोपलब्धि = विविधप्रकारकाः ये चोद्याः बुद्धिप्रेरकाः प्रश्नाः तेषां प्रश्नानां ये भेदाः प्रकाराः तेषां विविधप्रश्नभेदाम् उपलब्धिः उत्तरेण, जनितवाक्सारो यत् वाचः सारं सारगर्भितत्वं तेन युक्तः दैवज्ञो भवेत्। किञ्च, निकषसन्तापाभि- निवेशैः = निकषोपले निर्घर्षणे यः तापः तान्य तापाय अभिनिवेशेन-संयोगेन कनकस्य इव सुवर्णस्य समम्, अधिकतरममलीकृतस्य = इतोऽपि निर्दुष्टं यच्छात्रं तस्य शास्त्राय वक्ता तन्त्रज्ञो = दैवज्ञो भवति।

व्याख्या – आचार्यः दैवज्ञस्य लक्षणप्रसङ्गे कथयति यत् स्वर्णस्तु स्वभावादेव निर्मलं भवति परन्तु पाषाणतले निर्घर्षणं क्रियते तथा च अग्नौ परितापनं क्रियते तदा अत्यधिकं निर्मलतरं भवति। अनेन प्रकारेण शास्त्रस्य निर्घर्षणं भूयः भूयः कर्त्तव्यः। तथा च नानाचोद्यप्रश्नभेदोपलब्धिजनितवाक्सारः अर्थात् अगस्त्य उत्तरस्यां न दृश्यते यतः स खमध्यात् स्वक्रान्त्या दक्षिणे गतः ध्रुवकविक्षेपवशात्। गोलवासनया विविधप्रश्नभेदैः परिहारो दीयते स नानाचोद्यप्रश्नभेदानामुलब्धि कथ्यते। जनितवाक्सारो अर्थात् विविधप्रश्नभेदोपलब्ध्या उत्पनः सम्मतः एव जनित वाक्सारो भवति। अनेन प्रकारेण दैवज्ञेन भवितव्यः।

२.३.१२ गर्गोक्तदैवज्ञलक्षणम्

न प्रतिबद्धं गमयति वक्ति न च प्रश्नमेकमपि पृष्टः।
निगदति न च शिष्येभ्यः स कथं शास्त्रार्थविज्ज्ञेयः।

अन्वयः – प्रतिबद्धं न गमयति न च पृष्टः प्रश्नमेकमपि वक्ति न च शिष्येभ्यः निगदति स कथं शास्त्रार्थविज्ज्ञेयः।

शब्दार्थः – प्रतिबद्धं = शास्त्रसम्मतार्थं न, गमयति = प्रतिपादयति। पृष्टः = प्रश्ने कृते सति, न एकमपि प्रश्नं वक्ति = उत्तरयति। निगदति = पाठयति, सः कथं शास्त्रार्थवित् = शास्त्रवेत्ता पण्डितः, ज्ञेयः।

व्याख्या – आचार्यः दैवज्ञस्य लक्षणं कथयति यत् यः नरः शास्त्रानुकूलम्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अर्थं न प्रतिपादयति अर्थात् शास्त्रसम्मतम् अर्थं विहाय सारहीनार्थं प्रतिपादयति। एकस्य अपि प्रश्नस्य उत्तरं न ददाति। छात्रेभ्यः न पाठयति। स कथं शास्त्रज्ञः भवितुमर्हति। स मूर्खः भवति न पण्डितः। अस्य तात्पर्यम् अस्ति यत् दैवज्ञेन न केवलं शास्त्रज्ञः भवितव्यः अपितु अध्यापकोऽपि भाव्यः।

बोधप्रश्नाः

२३. कनकशब्दस्य कः अर्थः?

२४. गमयति इति शब्दस्य कोऽर्थः?

२.४ सारांशः

अस्मिन् पाठे भवता बृहत्संहिताग्रन्थस्य दैवज्ञलक्षणं अधीतम्। आचार्येन सम्यक्रूपेण दैवज्ञलक्षणं अस्मिन् पाठे प्रतिपादितम्। भवान् पठितवान् यत् दैवज्ञः कुलीनः उद्भटः अलङ्कारयुक्तः सत्यभाषी, अनिन्दकः, रागद्वेषरहितः च भवितव्यः। तस्य शरीरं मांसलयुक्तं बाहु-हस्त-ऊरु-जानु-गुल्फ-चरण-नख-नयन-दन्तप्रभृत्यङ्गानि दर्शनीयानि यस्य नरस्य भवति सः कुशलदैवज्ञः भवति। भवान् स्कन्धत्रयं पठितवान्। स्कन्धत्रये सिद्धान्त, संहिता, होरा इति भवन्ति। त्रुट्यादितः प्रलयान्तकालगणना क्रियते स सिद्धान्तः भवति। सिद्धान्तग्रन्थे पञ्चसिद्धान्तिका प्रसिद्धम् अस्ति। पञ्चसिद्धान्तिकायां रोमकः सौरः पैतामहः वाशिष्ठः पौलिशः इति पञ्च सिद्धान्ताः सन्ति। भवान् सौर-सावन-नाक्षत्र चान्द्रमानं पठितवान्। युग- वर्ष-अयन-ऋतु संक्रान्ति इति सौरमानेन, सूतक-चिकित्सित् वासर इति सावनमानेन, घटिकादिमानं नाक्षत्रमानेन एवं मास-तिथि-पक्ष इति चान्द्रमानेन भवान् षष्टिसंवत्सरमानम् अपि पठितवान्। बृहत्पतेर्मध्यमराशिभोगात् संवत्सरं ज्ञातव्यमित्यपि अधीतवान्। स एव गौरववत्सरः इत्यपि ज्ञातः। ततः भवान् ग्रहाणां शीघ्रमन्दयाम्योत्तरनीचोच्चगतिकारणम् अपि अधीतवान्। ग्रहेषु शीघ्रगतिकः कः अल्पगतिकः कः इत्यपि भवता अधीतवान्। याग्योत्तरगतिं भवान् पठितवान् यदि मेषादितः कन्यान्तं यावद् ग्रहः भ्रमति स उत्तरदिशि एवं यदि तुलादितः मीनान्तं यावद् भ्रमति तर्हि सः दक्षिणदिशि भ्रमति। भवान् ग्रहणविषयं अधीतवान्। सर्वग्रहणे पञ्चावयवाः भवन्ति; स्पर्श-सम्मीलन-मध्य-उन्मीलन-मोक्ष इति। ग्रहणस्य वर्णसंदर्भे अपि पठितवान्। ग्रहणस्य आद्यन्तयो धूम्रवर्णः भवति। सर्वग्रहणे कपिलवर्णः भवति। भवान् ग्रहभ्रमणम् अपि पठितवान् सर्वेषां ग्रहाणां महायुगे भगणमानं ग्रहकक्षामानम् अपि अधीतवान्। ततः गर्गोक्तदैवज्ञलक्षणम् अपि पठितवान्।

२.५ शब्दावली

१.	सांवत्सरः	=	दैवज्ञः।
२.	जनसूयकः	=	अनिन्दकः।
३.	उत्तमाङ्गम्	=	श्रेष्ठाङ्गम्।
४.	भ्रुवौ	=	नयनोपरि रोमलेखः।
५.	श्रवणौ	=	कर्णौ।
६.	दशनाः	=	दन्ताः।
७.	दक्षः	=	चतुरः।

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

८.	सात्त्विकः	=	निर्मलचित्तः।
९.	निरतः	=	सक्तः।
१०.	ग्रन्थवेत्ता	=	ग्रन्थस्य अर्थज्ञः।
११.	महायुगं	=	चतुर्युगम्।
१२.	प्राणः	=	श्वासनिर्गमप्रवेशः।
१३.	क्षयं	=	अवमः।
१४.	संशोध्यं	=	ऋणं।
१५.	शङ्कुः	=	१२ अङ्गुलात्मकः।

२.६ सन्दर्भग्रन्थः

१ **बृहत्संहिता, डॉ. सुरकान्त झा,** प्रकाशकः – चौखम्बासंस्कृतसीरीज, वाराणसी।

२ **सिद्धान्तशिरोमणिः, पं. केदारदत्तजोशी,** प्रकाशकः– मोतीलाल–बनारसीदासः, प.प्रा.लि. दिल्ली।

३ **सूर्यसिद्धान्तः, श्री कपिलेश्वरशास्त्री,** प्रकाशकः– चौखम्बासंस्कृतसंस्थानम्, वाराणसी।

२.७ सहायकग्रन्थाः

१ **सूर्यसिद्धान्तः, प्रो. रामचन्द्रपाण्डेयः,** प्रकाशकः– चौखम्बासुरभारतीप्रकाशनम्, वाराणसी।

२ **ज्योतिर्विज्ञानशब्दकोषः, डॉ. सुरकान्तझाः,** प्रकाशकः– चौखम्बा–कृष्णदास–अकादमी, वाराणसी।

३ **संस्कृतहिन्दीकोशः, डॉ. वामनशिवराम आपटे,** प्रकाशकः– मोतीलाल–बनारसीदासः, प.प्रा. लि., दिल्ली।

४ **ग्रहलाघवम्, केदारदत्तजोशी,** प्रकाशकः– मोतीलालबनारसीदासः, प.प्रा. लि. दिल्ली।

२.८ बोधप्रश्नोत्तराणि

१. दैवज्ञः।

२. उद्भटः।

३. गुणदोषाः भवन्ति।

४. निर्मलचित्तः।

५. होरास्कन्धे।

६. सिद्धान्तस्कन्धे।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

७. पञ्च।

८. वराहमिहिरस्य।

९. ४३२००००।

१०. षड्।

११. मकराशेः।

१२. द्विधा।

१३. पूर्वापरः।

१४. शनिः।

१५. चन्द्रः

१६. मन्दप्रतिमण्डले।

१७. अमावस्यायाम्।

१८. चन्द्रः।

१९. स्थितिकालः।

२०. कपिलवर्णः।

२१. १२ अङ्गुलम्।

२२. २७८।

२३. स्वर्णम्।

२४. प्रतिपादयति।

२.९ अभ्यासप्रश्नाः

१. अभिजातादिगुणोपेतदैवज्ञस्य लक्षणं लिखत्।

२. शान्तिकपौष्टिकाभिचारस्नानविद्याभिज्ञस्य दैवज्ञस्य लक्षणं वर्णयत।

३. स्कन्धत्रये के के सिद्धान्ताः सन्ति लिखत्।

४. राश्युदयमानं सम्यकरूपेण लिखत्।

५. शीघ्रमन्दोच्चज्ञानं कथं क्रियते।

६. सूर्यचन्द्रयो ग्रहणं लिखत्।

७. गगोक्तदैवज्ञस्य लक्षणं लिखत।

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तृतीयः पाठः – 'दैवज्ञप्रशंसा नक्षत्रसूचकस्य निन्दा संहितापदार्थनिरूपणञ्च'

पाठसंरचना

३.१ प्रस्तावना
३.२ उद्देश्यम्
३.३ ज्यौतिषशास्त्रप्रशंसा
३.४ विष्णुगुप्तोक्तज्यौतिषशास्त्रस्य प्रशंसा
३.५ आचार्यकथने दैवज्ञप्रशंसा
बोधप्रश्नाः
३.६ गर्गोक्तदैवज्ञप्रशंसा
३.७ दैवज्ञमहत्त्वम्
बोधप्रश्नाः
३.८ पूजितदैवज्ञस्य प्रशंसा
३.९ अयोग्यदैवज्ञस्य लक्षणम्
३.१० अप्रष्टव्यजनकथनम्
३.११ नक्षत्रसूचकस्य आलोचना
बोधप्रश्नाः
३.१२ होरापदार्थनिरूपणम्
३.१३ यात्राभेदनिरूपणम्
३.१४ संहिताशास्त्रस्य प्रशंसा
३.१५ संहितापदार्थनिरूपणम्
३.१६ तिथिनक्षत्रश्रवणफलम्
बोधप्रश्नाः
३.१७ सारांशः
३.१८ शब्दावली
३.१९ सन्दर्भग्रन्थाः
३.२० सहायकग्रन्थाः
३.२१ बोधप्रश्नोत्तराणि
३.२२ अभ्यासप्रश्नाः

३.१ प्रस्तावना

वृहत्संहितायाः तृतीये पाठे भवतः स्वागतमस्ति। द्वितीये पाठे भवान् दैवज्ञस्य लक्षणम् पठितवान्।

३.२ उद्देश्यम्

अस्य पाठस्य अध्ययेन भवान् –

- दैवज्ञस्य स्वल्पकथने कुशलो भविष्यति।
- दैवज्ञस्य महत्त्वप्रतिपादने पटुः भविष्यति।
- विविधमतोक्तदैवज्ञप्रशंसां वक्तुं क्षमो भविष्यति।
- अयोग्यदैवज्ञस्य स्वरूपं प्रकटयितुं शक्ष्यति।
- होरास्कन्धान्तर्गतविषयाणां निरूपणे पटुः भविष्यति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

➢ संहिताशास्त्रीयविषयान् वक्तुं प्रभविष्यति।

३.३ ज्यौतिषशास्त्रप्रशंसा

आदौ ज्योतिषशास्त्रस्य माहात्म्यं प्रशात्तिः निगद्यते यत् ज्योतिषशास्त्रीयविषयाणां सम्यज्ञानेन तस्य मनुष्यस्य पण्डितस्य ज्योतिर्विदः वाणी सर्वदा फलप्रदा भवति। सः यद् वक्ति तत्फलति। तदेव प्रतिपादयन् आचार्यः कथयति यत्–

तन्त्रे सुपरिज्ञाते लग्ने छायाम्बुयन्त्रसंविदिते।
होरार्थे च सुरूढे नादेष्टुर्भारती वन्ध्या॥

अन्वयः – तन्त्रे सुपरिज्ञाते लग्ने छायाम्बुयन्त्रसंविदिते होरार्थे च सुरूढे आदेष्टुर्भारती वन्ध्यान।

प्रतिपदार्थः – तन्त्रे = गणितस्कन्धे, सुपरिज्ञाने = सुष्ठु सवासनिके विदिते। लग्ने = इष्टसमये। छाया = पलभा। अम्बुयन्त्रम् = जलयन्त्रम्। संविदिते = सम्यग्ज्ञाते। होरार्थे = जातकशास्त्रस्य अर्थे। सुरूढे = सुस्थिरे। आदेष्टुः = उपदेशकर्तुः। भारती = वाग्। वन्ध्या निष्फला न भवति।

व्याख्या – आचार्यः ज्योतिषवाक्प्रशंसां कथयति। येन छायाजलयन्त्रद्वारा लग्नज्ञानं क्रियते। सः गणितस्कन्धस्य ष्णातः भवति। अथ च यः जातकशास्त्रस्य सिद्धान्तान् सम्यक्तया अवगम्य तस्मिन् निष्णातो भूत्वो ग्रहनक्षत्रवशात् फलादेशं कथयति तस्य वचनं कदापि निष्फलं न भवति। अर्थ तस्य वाचमनुधावति। अर्थात् सः यत् वदति तन्नृतं सत्यं भवति। ज्योतिषशास्त्रस्य एतादृगेव माहात्म्यं वर्तते।

३.४ विष्णुगुप्तोक्तज्यौतिषशास्त्रस्य प्रशंसा

अप्यर्णवस्य पुरुषः प्रतरन् कदाचि-
दासादयेदनिलवेगवशेन पारम्।
न त्वस्य कालपुरुषाख्यमहार्णवस्य
गच्छेत्कदाचिदनृषिर्मनसापि पारम्॥

अन्वयः – अपि अर्णवस्य प्रतरन् पुरुषः कदाचिद् अनिलवेगवशेन पारम् आसादयेद् त्वस्य कालपुरुषाख्यमहार्णवस्य अनृषिः मनसापि कदाचित् पारं न गच्छेत्।

प्रतिपदार्थः – अपि = सम्भावनार्थे। अर्णवस्य = समुद्रस्य। प्रतरन् = उल्लङ्घयन्। पुरुषः = मनुष्यः। अनिलवेगवशेन = वायुवेगसाहाय्येन। पारम् = अपरतीरं। आसादयेत् = प्राप्नुयात्। तु = किन्तु। कालपुरुषाख्यः = कालरूपश्चासौ पुरुषः कालपुरुषः तदाख्यः यः पुरुषः। महार्णवस्य = महार्णवस्तस्य महासमुद्रस्य। अनृषिः = अतपस्वी असाधुपुरुषः। मनसा = चित्तेन। अपि = निःसंशयेन। कदाचित् = कथमपि। पारम् न गच्छेत् = सम्पूर्णज्ञानं न प्राप्नुयात्।

व्याख्या – आचार्यः विष्णुगुप्तोक्तज्योतिषशास्त्रस्य प्रशंसा करोति। आचार्यः कथयति यत् यदि कदाचित् मनुष्यः वायुवेगेन समुद्रं पारं कर्तुं शक्नोति, परं कालपुरुषस्वरूपतः ज्योतिषशास्त्रस्य महासमुद्रं मुनिं विहाय यः कोऽपि मनुष्यः (ज्योतिषशास्त्राध्ययने तपः न आचरितः एतादृशः सामान्यः) मनसा अपि पारं कर्तुं न शक्नोति। अस्य शास्त्रस्य कियद् गाम्भीर्यम् इति मनसा न चिन्तायितुं शक्नोति।

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

३.५ आचार्यकथने दैवज्ञप्रशंसा

जगति प्रसारितमिवालिखितमिव मतौ निषिक्तमिव हृदये।
शास्त्रं यस्य सभगणं नादेशा निष्फलास्तस्य॥

अन्वयः – जगति प्रसारितमिव मतौ अलिखितमिव निषिक्तमिव हृदये सभगणं शास्त्रं यस्य तस्य आदेशा निष्फलाः न।

प्रतिपदार्थः – जगति = संसारे। प्रसारितम् = विस्तारितम्। मतौ = बुद्धे। अलिखितमिव = चित्रमिव। निषिक्तमिव = प्रक्षिप्तमिव। शास्त्रं = ज्योतिषशास्त्रम्। सभगणम् = भगणसहितं गणितेनयुक्तम्। यस्य = दैवज्ञस्य। तस्य = दैवज्ञस्य। आदेशा = उक्तयः। निष्फला = असत्यरूपा। न = न भवति।

व्याख्या – संसारे विस्तारितमिव बुद्धावालिखितं चित्रितमिव हृदये प्रक्षिप्तमिव दैवज्ञस्य उक्तयः निष्फलाः न भवन्ति। अर्थात् सत्यरूपा भवन्ति। एतद् उक्तं भवति–त्रिस्कन्धस्य मुनिरिव वाणी सत्यरूपा भवति। आचार्यस्य तात्पर्यम् अस्ति यत् ये ज्योतिषशास्त्रस्य त्रयाणां स्कन्धानां ज्ञातारः सन्ति तेषां ज्योतिर्विदाम् उक्तयः कथमपि निष्फलाः न भवन्ति, सर्वदा सत्यरूपाः भवन्ति।

बोधप्रश्नाः

१. तन्त्रस्य किं तात्पर्यम्?

२. भारतीशब्दस्य कोऽर्थः?

३. महार्णवस्य अर्थं लिखत।

४. कस्य आदेशाः निष्फला न भवति?

३.६ गर्गोक्तदैवज्ञप्रशंसा

कृत्स्नाङ्गोपाङ्गकुशलं होरागणितनैष्ठिकम्।
यो न पूजयते राजा स नाशमुपगच्छति॥

अन्वयः – यो राजा कृत्स्नाङ्गोपाङ्गकुशलं होरागणितनैष्ठिकं न पूजयते स नाशम् उपगच्छति।

प्रतिपदार्थः – कृत्स्नानि = निरवशेषाणि। उपाङ्गम् = अङ्गस्य अवयवः। कुशलः = दक्षः प्रवीणः। होरा = जातकशास्त्रम्। गणितं = गणितशास्त्रं स्कन्धो वा। नैष्ठिकम् = निष्ठावान् तं। नाशम् = विनाशम्। उपगच्छति = प्राप्नोति।

व्याख्या – आचार्यः गर्गोक्तकृतां दैवज्ञप्रशंसां व्याकरोति यत् यानि ज्योतिःशास्त्रस्य अङ्गानि सन्ति। तेषु पुरुषलक्षणं स्त्रीलक्षणं, दीपलक्षणं दन्तलक्षणं काष्ठलक्षणं ग्रहगणितं च सन्ति। एतेषां ज्ञाता दैवज्ञः भवति। दैवज्ञं यो राजा न पूजयते स नाशं प्राप्नोति। अर्थात् गर्गाचार्यस्य तात्पर्यम् अस्ति यत् राजा दैवज्ञं सर्वदा पूजनीयः।

३.७ दैवज्ञमहत्त्वम्

दैवज्ञप्रशंसां विधाय सम्प्रति आचार्यः तस्य दैवज्ञाय महत्त्वं प्रतिपादयति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वनं समाश्रिता येऽपि निर्ममा निष्परिग्रहाः।
अपि ते परिपृच्छन्ति ज्योतिषां गतिकोविदम्॥

अन्वयः – येऽपि वनं समाश्रिता निर्ममा निष्परिग्रहाः ते अपि ज्योतिषां गतिकोविदं परिपृच्छन्ति।

प्रतिपदार्थः – ये = तपस्विनः। अपि = अन्ये तु पृच्छन्ति एव ते तपस्विन अपि कदाचित् (सम्भावनायाम्)। समाश्रिता = वसन्ति। निर्ममा = निरहङ्काराः। निष्परिग्रहाः = स्त्रीवर्जिताः। ज्योतिषां = ज्योतिषशास्त्रम्। गतौ = गमने। कोविदम् = विज्ञम्। परिपृच्छन्ति = ज्ञातुमिच्छन्ति।

व्याख्या – वराहमिहिराचार्यः दैवज्ञस्य महत्त्वं स्थापयन् कथयति यत् तपस्विनः अरण्यं वसन्ति। ते निरहङ्काराः, स्त्रीवर्जिताः अर्थात् परिग्रहणस्य भावेन निरस्ताः भवन्ति। परिगृहीतस्य गृहस्थस्य सपत्नी-पुत्रादिविषयिणी चिन्ता भवत्येन तया चिन्तया ग्रस्ताः ते भविष्यं ज्ञातुमुत्सकाः सन्त ज्योतिषीं पृच्छन्ति किन्तु तपस्विनस्तु सर्वविधबन्धनेन सम्बधेन ऐहिकप्रपञ्चेन मुक्ताः सर्वदा मोक्षकामाः तपस्यायाम् एव निरताः भवन्ति किन्तु कदाचित् कौतूहलवशात् तेऽपि शुभम् अशुभं फलं ज्योतिर्विदं पृच्छन्ति। आचार्यस्य तात्पर्यम् अस्ति यत् संसारेऽस्मिन् ये मानवाः सन्ति ते दैवज्ञं विना नैव तिष्ठन्ति। अतः दैवज्ञस्य तिरां महत्त्वं इह वर्तते।

अप्रदीपा यथा रात्रिरनादित्यं यथा नभः।
तथाऽसांवत्सरो राजा भ्रमत्यन्ध इवाध्वनि॥

अन्वयः – अप्रदीपा यथा रात्रिरनादित्यं यथा नभः तथाऽसांवत्सरो राजा भ्रमत्यन्धः इवाध्वनि।

प्रतिपदार्थः – अप्रदीपा = दीपरहिता। रात्रिः = निशा। अनादित्यम् = सूर्यरहितम्। नभः=आकाशः। सांवत्सरः = दैवज्ञः। राजा = नृपः। भ्रमति = परिभ्रमति। अन्धः = नेत्रहीनः।

व्याख्या – आचार्यः दैवज्ञस्य प्रशंसा सन्दर्भे कथयति यत् यथा तमसावृतत्वात् रात्रिः दीपरहिता न शोभाम् आप्नोति। आकाशः सूर्यरहितः न शोभां आप्नोति। तथा तेन प्रकारेण दैवज्ञरहितः राजा न शोभते। न केवलं यावत्सर्वत्र च संशयत्वाद् भ्रमति यथा नेत्रहीनः पथि परिभ्रमति। आचार्यस्य तात्पर्यम् अस्ति यत् राज्ञा सर्वदा दैवज्ञस्य परामर्श स्वीकृत्य कार्यं कर्तव्यम्।

मुहूर्त्ततिथिनक्षत्रमृतवश्चायने तथा।
सर्वाण्येवाकुलानि स्युर्न स्यात् सांवत्सरो यदि॥

अन्वयः – मुहूर्त्ततिथिनक्षत्रमृतवश्चायने तथा सर्वाण्येवाकुलानि स्युः यदि सांवत्सरो न स्यात्।

प्रतिपदार्थः – मुहूर्त्तः = गृहप्रवेश-वधूप्रवेशादिमुहूर्त्तः। तिथिः = नन्दाभद्राजयारिक्तापूर्णेति शुभाशुभतिथयः। नक्षत्रम् = अश्विन्यादि नक्षत्राणि। ऋतवः = वसन्तादिऋतु। अयनम् = सौम्यायनं याम्यायनम्। सर्वाण्येवाकुलानि = एतानि सर्वाणि अज्ञानात् अव्यवस्थितानि। स्युः = भवेयुः। सांवत्सरः = दैवज्ञः। न स्यात् = न भवेत्।

व्याख्या – आचार्यः दैवज्ञस्य प्रशंसाप्रसङ्गे कथयति यत् गृहप्रवेश-वधूप्रवेशादिमुहूर्ताः, नन्दाभद्रारिक्ताजयापूर्णाः तिथयः, अश्विन्यादिनक्षत्राणि, वसन्तादिऋतवः, उत्तरायणदक्षिणायनौ एतानि सर्वाणि अज्ञातानि भविष्यन्ति, यदि कदाचिद् दैवज्ञः न स्यात्। आचार्यस्य तात्पर्यम्

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अस्ति यत् ये मुहूर्तादयः सन्ति ते दैवज्ञं विना सुव्यवस्थतरूपेण न भवितुं शक्नुवन्ति।

तस्माद्राज्ञाधिगन्तव्यो विद्वान् सांवत्सरोऽग्रणीः।
जयं यशः श्रियं भोगान् श्रेयश्च समभीप्सता।।

अन्वयः – तस्मात् जयं यशः श्रियं भोगान् श्रेयश्च समभीप्सता राज्ञा विद्वान् सांवत्सरोऽग्रणीः अधिगन्तव्यो।

प्रतिपदार्थः – तस्मात् = पूर्वोक्तद्धेतो। जयम् = शत्रुविजयम्। यशः = ख्यातिः। श्रियम् = लक्ष्मीम्। भोगान् = उपभोगान्। श्रेयः = कल्याणम्। समभीप्सता = आप्राप्तुमिच्छता। राज्ञा = नृपेण। विद्वान् = पण्डितः। सांवत्सरः = दैवज्ञः। अग्रणी = प्रधानः। अधिगन्तव्यो = अधिगमनीयः।

व्याख्या – आचार्यः दैवज्ञस्य महत्त्वं वर्णयति। तस्मात् पूर्वोक्तकारणेन राज्ञा श्रेष्ठस्य विद्वान्दैवज्ञस्य अधिगमनं कर्तव्यम्। कीदृशेन राज्ञा? शत्रुविजयं, कीर्तिं, लक्ष्मीं उपभोगान् आरोग्यं आप्राप्तुम् इच्छिता। आचार्यस्य तात्पर्यम् अस्ति यत् राज्ञानं यशः, श्रियं प्राप्त्यर्थं दैवज्ञस्य सान्निध्यं प्राप्तव्यम्।

नासांवत्सरिके देशे वस्तव्यं भूतिमिच्छता।
चक्षुर्भूतो हि यत्रैष पापं तत्र न विद्यते।।

अन्वयः – भूतिं इच्छिता नासांवत्सरिके देशे वस्तव्यं यत्रैष चक्षुर्भूतो हि पापं तत्र न विद्यते।

प्रतिपदार्थः – भूतिम् = समृद्धिम्। इच्छिता = कामयता। नासांवत्सरिके देशे = दैवज्ञवर्जिते देशे। न वस्तव्यम् = न निवसनीयम्। हि = यस्मात्। यत्र यस्मिन्। चक्षुर्भूतो = प्रकाशकः स्यात्। न विद्यते = न भवति।

व्याख्या – वराहमिहिराचार्यः दैवज्ञस्य महत्त्ववर्णनक्रमे कथयति यत् समृद्धिं इच्छिता नरेण दैवज्ञवर्जिते स्थाने न निवसनीयम्। यस्मिन् देशे एषः दैवज्ञः नेत्रसादृशः सर्वेषु विषयेषु प्रकाशकः योग्यायोत्वस्य शुभाशुभत्वस्य सूचकः स्यात् तस्मिन् देशे पापः न भवति। आचार्यस्य तात्पर्यम् अस्ति यत् यस्मिन् देशे दैवज्ञः न स्यात् तस्मिन् देशे नरेण न निवसनीयम्।

न सांवत्सरपाठी च नरकेषूपपद्यते।
ब्रह्मलोकप्रतिष्ठां च लभते दैवचिन्तकः।।

अन्वयः – सांवत्सरपाठी नरकेषु न उपपद्यते दैवचिन्तकः ब्रह्मलोकप्रतिष्ठां लभते च।

प्रतिपदार्थः – सांवत्सरपाठी = संवत्सरमधिकृत्य कृतं शास्त्रं सांवत्सरं तत्पठनशीलः सांवत्सरपाठी। नरकेषु नोपपद्यते = नरकान् न प्राप्नोति। दैवचिन्तकः = कालविद्। ब्रह्मलोके = धातृभवने। प्रतिष्ठां = स्थितिं परमपदं मोक्षम्। लभते = प्राप्यते।

व्याख्या – आचार्यः दैवज्ञस्य महत्त्वं प्रतिपादयति। संवत्सरम् अधिकृत्य कृतं शास्त्रं सांवत्सरं तत् पठनशीलः सांवत्सरपाठी अर्थात् कालवेत्ता (अत्र संवत्सर उपलक्षणमेव वर्तते) दैवविद् नरकान् न प्राप्नोति। यतो हि कालविद् धातृभवने स्थितिं प्राप्नोति। आचार्यस्य तात्पर्यम् अस्ति यत् दैवज्ञः सर्वदा पुण्यात्मा भवति। यतो हि सः अस्मिन् संसारे ये मानवाः सन्ति, तेषां सर्वदा कल्याणस्य कामनां करोति। अनेन प्रकारेण दैवज्ञः नरकान् न प्राप्नोति, स सर्वदा ब्रह्मलोकं प्राप्नोति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

बोधप्रश्नाः

५. दैवज्ञं यो राजा न पूजयते सः किं प्राप्नोति?

६. तपस्विनः किं पृच्छन्ति?

७. दीपरहिता रात्रिः किं आप्नोति?

८. ऋतुसंख्यां लिखत।

९. राज्ञा किम् अधिगमनं कर्तव्यम्?

१०. यस्मिन् देशे दैवज्ञः न भवति तत्र किं भवति?

११. दैवज्ञचिन्तकः किं प्राप्नोति?

३.८ पूजितदैवज्ञस्य प्रशंसा

ग्रन्थतश्चार्थतश्चैतत्कृत्स्नं जानाति यो द्विजः।
अग्रभुक् स भवेच्छ्राद्धे पूजितः पङ्क्तिपावनः॥

अन्वयः – ग्रन्थतश्चार्थतश्चैतत्कृत्स्नं जानाति यो द्विजः स श्राद्धे अग्रभुक् पूजितः पङ्क्तिपावनः भवेत्।

प्रतिपदार्थः – ग्रन्थतः = शास्त्रतः। अर्थतः = व्याख्यानात्। कृत्स्नम् = निरवशेषम्। द्विजो = ब्राह्मणो। जानाति = वेत्ति। श्राद्धे = पितृतर्पणे। अग्रभुक् = प्रथमभोजी। पूजितः = अर्चितः। पङ्क्तिपावनः = यस्यां पङ्क्त्याम् उपविशति तां पवित्रीं करोति स पङ्क्तिपावनः।

व्याख्या – आचार्यः पङ्क्तिपावनदैवज्ञस्य प्रशंसां करोति। पङ्क्तिपावनः कथं भवति? आचार्यः कथयति यत् यः ब्राह्मणः ग्रन्थतः निहितार्थं सम्पूर्णरूपेण जानाति सः पितृतर्पणे प्रथमभोजी भवति। स च पूजितः पङ्क्तिपावनः भवति। आचार्यस्य तात्पर्यम् अस्ति यत् ब्राह्मणदैवज्ञः सर्वदा पूजितः। तथा च पङ्क्तिपावनः भवति। अर्थात् यस्यां पङ्क्त्याम् उपविशति तां पुनाति सः पङ्क्तिपावनः भवति।

म्लेच्छा हि यवनास्तेषु सम्यक् शास्त्रमिदं स्थितम्।
ऋषिवत्तेऽपि पूज्यन्ते किं पुनर्दैवविद्द्विजः॥

अन्वयः – म्लेच्छा यवानास्तेषु शास्त्रमिदं सम्यक् स्थितम् हि ऋषिवत्तेऽपि पूज्यन्ते किं पुनर्दैवविद्द्विजः।

प्रतिपदार्थः – म्लेच्छा = नीचजातयः। यवनाः = यवनदेशवासिनः। सम्यक् = स्पष्टतया। इदं शास्त्रम् = ज्योतिःशास्त्रम्। ऋषिवत् = मुनिवत्। पूज्यन्ते = अभ्यर्च्यन्ते। द्विजः = ब्राह्मणः।

व्याख्या – आचार्यः दैवज्ञस्य प्रशंसाक्रमे कथयति यत् ये यवनाः सन्ति ते म्लेच्छाः भवन्ति परन्तु तेऽपि ये ज्योतिषशास्त्रस्य सम्यक्रूपेण ज्ञानं प्राप्तवन्तः ते निःसंशयेन। ऋषितुल्याः मन्यन्ते पूज्यन्ते आद्रियन्ते। पुनः यः ब्राह्मणदैवज्ञः वर्तते, तस्मै किं निगदितम्। आचार्यस्य कथनम् अस्ति यत् ज्योतिर्विदः सर्वदा ऋषितुल्यः पूज्याः भवन्ति।

यस्तु सम्यग्विजानाति होरागणितसंहिताः।
अभ्यर्च्य स नरेन्द्रेण स्वीकर्तव्यो जयैषिणा॥

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अन्वयः – यस्तु होरागणितसंहिता सम्यग्विजानाति स जयैषिणा नरेन्द्रेण अभ्यर्च्य स्वीकर्तव्यो।

प्रतिपदार्थः – यः = दैवज्ञः। होरा = जातकस्कन्धं। गणितः = सिद्धान्तस्कन्धं। संहिता = भूकम्पादिसम्बन्धिशास्त्रं। सम्यक् = स्पष्टतया। विजानाति = जानाति। सः = दैवज्ञः। जयैषिणा = विजयं प्राप्तुं इच्छिता। नरेन्द्रेण = राज्ञा। अभ्यर्च्यः = सम्पूज्यः। स्वीकर्तव्यः = आत्मसात् कार्यः।

व्याख्या – आचार्यः दैवज्ञस्य प्रशंसाक्रमे कथयति यत् यः दैवज्ञः सम्यक्रूपेण ज्योतिषशास्त्रस्य त्रिस्कन्धं अर्थात् सिद्धान्तसंहिताहोरां जानाति। स च विजयं प्राप्तुं इच्छिता नरेन्द्रेण सम्पूज्य स्वीकर्तव्यः। आचार्यस्य तात्पर्यम् अस्ति यत् यः दैवज्ञः ज्योतिषशास्त्रं सम्यक्रूपेण जानाति सः नरेन्द्रेणापि पूजितो भवति।

न तत्सहस्त्रं करिणां वाजिनां च चतुर्गुणम्।
करोति देशकालज्ञो यथैको दैवचिन्तकः॥

अन्वयः – करिणां सहस्त्रं वाजिनां च चतुर्गुणं न तत् करोति यथा देशकालज्ञो एको दैवचिन्तकः।

प्रतिपदार्थः – करिणाम् = हस्तिनाम्। सहस्त्रम् = दशशतानि। वाजिनाम् = अश्वानाम्। चतुर्गुणम् = चतुस्सहस्राणि। न तत् करोति = कार्यं न कुर्वन्ति। देशकालज्ञः = देशकालयोः ज्ञाता। दैवचिन्तकः = सांवत्सरिकः।

व्याख्या – वराहमिहिराचार्यः दैवज्ञस्य प्रशंसाक्रमे कथयति यत् हस्तिनां दशशतानि तथा अश्वानां चत्वारि सहस्राणि तत् कार्यं न कर्तुं प्रभवन्ति यत् योग्यायोग्य स्थानस्य शुभाशुभकालस्य च पण्डितः दैवचिन्तकः एक एव कार्यं करोति। आचार्यस्य तात्पर्यम् अस्ति यत् यस्मिन् देशे दैवज्ञः वसति तस्मिन् देशे राजा विजयी भवति। यतो हि दैवज्ञः मुहूर्तशकुनयात्रादीनां ज्ञाता भवति।

न तथेच्छति भूपतेः पिता जननी वा स्वजनोऽथवा सुहृत्।
स्वयशोऽभिविवृद्धये यथा हितमाप्तः सबलस्य दैववित्॥

अन्वयः – सबलस्य भूपतेः स्वयशोऽभिविवृद्धये यथा आप्तः दैववित् हितं न पिता जननी वा स्वजनोऽथवा सुहृत्।

प्रतिपदार्थः – सबलस्य = बलसहितस्य। भूपतेः = राज्ञः। स्वयशोऽभिविवृद्धये = आत्मीयकीर्तिवृद्ध्यर्थम्। आप्तः = शास्त्रज्ञाततत्त्वार्थः। दैववित् = दैवज्ञः। हितम् = श्रेयम्। न पिता = न जनकः। न जननी = न माता। स्वजनः = बन्धुजनः। सुहृत् = हितमिच्छतीति सुहृत्।

व्याख्या – आचार्यः यशस्विदैवज्ञस्य प्रशंसां करोति। सः कथयति यत् स्वकीर्तिविस्तारार्थं शास्त्रज्ञानसम्पन्नः दैवज्ञः बलसहितस्य राज्ञः कृते यथा श्रेय आकाङ्क्षते। तथा न जनकं हितम् इच्छति, न माता हितम् इच्छति न बन्धुजनः न मित्रं च हितम् इच्छति। आचार्यस्य तात्पर्यम् अस्ति यत् अये मातृ-पितृ-बान्धवस्तु हितामिच्छन्ति परन्तु दैवज्ञस्तु कालदर्शके भवति। अतः सः शुभाशुभकालं सुविचार्य कुटुम्बापेक्षया समधिकतरं हिताकाङ्क्षी भवति।

३.९ अयोग्यदैवज्ञस्य लक्षणम्

ग्रन्थोऽन्यथाऽन्यथार्थं करणं यश्चान्यथा करोत्यबुधः।
स पितामहमुपगम्य स्तौति नरो वैशिकेनार्याम्॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अन्वयः – यः नरो ग्रन्थोऽन्यथाऽन्यथार्थं करणं च अन्यथा करोत्यबुधः स पितामहमुपगम्य वैशिके नार्यां स्तौति।

प्रतिपदार्थः – नरः = मनुष्यः। ग्रन्थः = शास्त्रः। अन्यथा = भिन्नम्। अन्यथार्थम् = अन्यं भिन्नमर्थं। करणम् = गणितकर्मः। अन्यथा = भिन्नार्थम्। अबुधः = मूर्खः। पितामहम् = ब्रह्मणम्। उपगम्य = समीपं गत्वा। वैशिकेन = वैश्यात्वेन। आर्यां = मातरम्। स्तौति = श्लाघयति।

व्याख्या – वराहमिहिराचार्यः अयोग्यदैवज्ञस्य लक्षणं वर्णयति। सः कथयति यत् यः मनुष्यः भिन्नस्य शास्त्रस्य भिन्नम् अर्थं करोति अर्थात् तद्ग्रन्थसम्बद्धं ग्रन्थसम्मतम् अर्थं न करोति। गुणकार-भागहारादिकम् अन्यथास्थितमन्यथा करोति। सः मूर्खः पितरं समीपं गत्वा वैश्यात्वेन मातरं स्तौति। अनेन आचार्यः मूर्खस्य उपहासं करोति। आचार्यस्य तात्पर्यम् अस्ति मूर्खदैवज्ञः सर्वदा अनिष्टकारी भवति।

३.१० अप्रष्टव्यजनकथनम्

कुहकावेशपिहितैः कर्णोपश्रुतिहेतुभिः।
कृतादेशो न सर्वत्र प्रष्टव्यो न स दैववित्॥

अन्वयः – कुहकावेशपिहितैः कर्णोपश्रुतिहेतुभिः कृतादेशो न सर्वत्र प्रष्टव्यो न स दैववित्।

प्रतिपदार्थः – कुहकेन = इन्द्रजालेन। आवेशेन = देवतादिदेहप्रवेशेन पिहितः = प्रच्छन्नोऽदृश्यशरीरः, कुत्रचित् सुषिरे भित्त्यादिके आभ्यन्तरस्थितयाऽव्यक्त्या सम्भाषते। कर्णोपश्रुत्वा = कश्चित् मन्त्रविशेषं जपन् कर्णे यथेष्टं कथयति लोके कर्णपिशाचिकेति प्रसिद्धा। कृतादेशः = आदेशः कृतो येन।

व्याख्या – वराहमिहिराचार्यः अप्रष्टव्यजनदैवज्ञस्य निन्दां करोति। स कथयति यत् यः दैवज्ञः इष्टजालेन देवतादिदेहप्रवेशेन कर्णपिशाचकेन च भविष्यफलं कथयति। तं प्रति प्रश्नः न प्रष्टव्यः। यतो हि सः दैवज्ञः न भवति। सः मायया फलादेशं करोति। आचार्यस्य तात्पर्यम् अस्ति यत् स्पष्टरूपेण यः ज्योतिर्विद् भवति सः शास्त्रानुसारेण फलादेशं कथयति। सः मायया न कथयति।

३.११ नक्षत्रसूचकस्य आलोचना

अविदित्वैव यच्छास्त्रं दैवज्ञत्वं प्रपद्यते।
स पङ्क्तिदूषकः पापो ज्ञेयो नक्षत्रसूचकः॥

अन्वयः – यः शास्त्रम् अविदित्वैव दैवज्ञत्वं प्रपद्यते स पङ्क्तिदूषकः पापो नक्षत्रसूचकः ज्ञेयो।

प्रतिपदार्थः – यः = नरः। शास्त्रम् = ज्योतिषशास्त्रम्। अविदित्वैव = अज्ञात्वैव। दैवज्ञत्वम् = ज्योतिषिकत्वम्। प्रपद्यते = अङ्गीकरोति। पङ्क्तिदूषकः = पङ्क्तिं दूषयति अपवित्रीं करोति। पापः = पापात्मा। नक्षत्रसूचकः = नक्षत्रपिशुनः। ज्ञेयः = ज्ञातव्यः।

व्याख्या – आचार्यः नक्षत्रसूचकस्य आलोचनां करोति। सः कथयति यत् यः नरः ज्योतिषशास्त्रम् अज्ञात्वैव ज्योतिषिकत्वम् अङ्गीकरोति सः पङ्क्तिं दूषयति, सः पापात्मा भवति तथा च नक्षत्रसूचकः भवति। आचार्यस्य तात्पर्यम् अस्ति यत् यः नरः ज्योतिषशास्त्रस्य ज्ञानं

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विना आत्मानं दैवज्ञरूपेण मिथ्याप्रचारं करोति मिथ्या भाषणं फलादेशं वा करोति, सः दैवज्ञस्य शास्त्रस्य च प्रतिष्ठां नाशयति।

नक्षत्रसूचकोद्दिष्टमुपावासं करोति यः।
स व्रजन्त्यन्धतामिस्रं सार्धमृक्षविडम्बिना॥

अन्वयः – यः नक्षत्रसूचकोद्दिष्टमुपावासं करोति स अन्धतामिस्रं सार्धमृक्षविडम्बिना व्रजन्ति।

प्रतिपदार्थः – नक्षत्रसूचकः = नक्षत्रपिशुनः। उद्दिष्टम् = कथनम्। उपवासम् = व्रतपर्वादि उपवासम्। अन्धतामिस्रम् = अन्धतामिश्रनामकं नरकम्। सार्धमृक्षविडम्बिना = धूर्तः अज्ञानी नक्षत्राधारितस्य ज्योतिषशास्त्रस्य अज्ञानात् विडम्बनम् उपहासं यः करोति सः ऋक्षविडम्बी तेन सार्ध सह सार्धमृक्षविडम्बी तेन सार्धमृक्षविडम्बिना।

व्याख्या – आचार्यः नक्षत्रसूचकस्य आलोचनक्रमे कथयति यत् ये नराः नक्षत्रसूचकवचनात् व्रतोपवासं कुर्वन्ति ते नराः धूर्तेन ऋक्षविडम्बिना सह अन्धतामिस्रनामके नरके गच्छन्ति। आचार्यस्य तात्पर्यं वर्तते यत् नक्षत्रसूचकस्य वचनं सर्वदा विनष्टकारी भवति।

नगरद्वारलोष्टस्य यद्वत्स्यादुपयाचितम्।
आदेशस्तद्वदज्ञानां यः सत्यः स विभाव्यते॥

अन्वयः – नगरद्वारलोष्टस्य यद्वत्स्यादुपयाचितम् आदेशस्तद्वदज्ञानां यः सत्यः स विभाव्यते।

प्रतिपदार्थः – नगरद्वारे = पुरद्वारे। लोष्टो = मृत्खण्डः उपयाचितम् = प्रार्थितम्। आदेशः = वार्ताकथनम्। तद्वदज्ञानां = मूर्खाणाम्। विभाव्यते = प्रतिभाति।

व्याख्या – आचार्यः पुनः नक्षत्रसूचकस्य आलोचनां करोति। स कथयति यत् यथा नगरद्वारसमीपे मृत्खण्डः स्यात् तस्य अर्चनं यदा कदा सत्यरूपं भवेत्। तथैव मूर्खाणां दैवज्ञानाम् आदेशः यदा कदा सत्यमिव प्रतिभाति। आचार्यस्य तात्पर्यम् अस्ति यत् मूर्खदैवज्ञानां फलादेशकथनं यदा कदा सत्यं भवति। परन्तु ते दैवज्ञाः न भवन्ति। अर्थात् मूर्खाः भवन्ति।

सम्पत्त्या योजितादेशस्तद्विच्छिन्नकथाप्रियः।
मत्तः शास्त्रैकदेशेन त्याज्यस्तादृङ्महीक्षिता॥

अन्वयः – सम्पत्त्या योजितादेशस्तद्विच्छिन्नकथाप्रियः मत्तः शास्त्रैकदेशेन तादृङ्महीक्षिता त्याज्यः।

प्रतिपदार्थः – सम्पत्त्या योजितादेशः = अर्थदानेन यः आदेशे योजितः। यथा पूर्वमेवं मया अमुकस्य कथितमेतत्स देववदैश्वर्यं प्राप्स्यति। तद्विच्छिन्ना = ज्योतिःशास्त्रवर्जिता अन्या कथाप्रिया यस्य सः। शास्त्रैकदेशेन = शास्त्रस्य एकं प्रकरणं ज्ञात्वा। मत्तः = उन्मत्तः। महीक्षिता = राज्ञा। त्याज्यः = त्यक्तव्यः।

व्याख्या – आचार्यः अविदग्धदैवज्ञस्य वर्णनं करोति। आचार्यः कथयति यत् यः दैवज्ञः सम्पत्त्या फलादेशं करोति अर्थात् परोक्षफलादेशवशात् प्रभावम् उत्पादयति। यः दैवज्ञः ज्योतिःशास्त्रस्य असम्बद्धविषयेषु संलग्नं भवति। शास्त्रस्य प्रकरणमेकं ज्ञात्वा य उन्मत्तः भवति। तादृशः दैवज्ञः राज्ञा त्यक्तव्यः। आचार्यस्य तात्पर्यं वर्तते यत् धूर्तदैवज्ञस्य संरक्षणम् भूपतिना कथमपि न कर्तव्यम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

बोधप्रश्नाः

१२. अग्रभुक्शब्दस्य कोऽर्थः?

१३. यवनाः किं भवन्ति?

१४. नरेन्द्रेण किं स्वीकर्तव्यम्?

१५. करि इत्यस्य कोऽर्थः?

१६. दैवज्ञः कस्य हितम् इच्छति?

१७. नक्षत्रसूचकस्य वचनं किं भवति?

१८. कीदृशः दैवज्ञः न संरक्षणीयः?

३.१२ होरापदार्थनिरूपणम्

होराशास्त्रेऽपि च राशिहोराद्रेष्काणनवांशकद्वादशभागत्रिंशद्भागबलाबलपरिग्रहो ग्रहाणां दिक्स्थानकालचेष्टाभिरनेकप्रकारबलनिर्धारणं प्रकृतिधातुद्रव्यजातिचेष्टादि-परिग्रहो निषेकजन्मकालविस्मापनप्रत्ययादेशसद्योमरणायुर्दायदशान्तर्दशाष्टकवर्ग-राजयोगचन्द्रयोगद्विग्रहादियोगानां नाभसादीनां च योगानां फलान्याश्रय-भावावलोकननिर्याणगत्यनूकानि तत्कालप्रश्नशुभाशुभनिमित्तानि विवाहादीनां च कर्मणां करणम्।।

व्याख्याः – आचार्यः वराहमिहिरः होरास्कन्धस्य सम्यक्रूपेण प्रतिपादनं करोति। ज्योतिषशास्त्रे स्कन्धत्रयं वर्तते। स्कन्धत्रये सिद्धान्त, संहिता, होरा इति सन्ति। सम्प्रति होरास्कन्धस्य वर्णनं क्रियते। होराशास्त्रेऽपि भेदाः सन्ति। होराशास्त्रस्य अपरनाम जातकशास्त्रम् अस्ति। जातकशास्त्रे के के भेदाः? तदा सर्वप्रथमं राशिः भवति। राशयस्तु द्वादशः सन्ति। तेषां भिन्नं-भिन्नं स्वरूपं भवति। यथा- सर्वप्रथमं मेषराशिः भवति। मेषराशेः स्वरूपं मेषाकारः, द्वितीयराशिः वृषः वृषाकारः, तृतीयः मिथुनराशिः गदाहस्तः पुरुषः वीणाहस्ता नारी च इति मिथुनराशेः स्वरूपं वर्तते। चतुर्थः राशिः कर्कः सः कर्कटाकारः पञ्चमराशिः सिंहः सिंहाकारः भवति। षष्ठराशिः कन्या नौकास्था सस्येन दहनेन च सहिता कन्यायाः स्वरूपं भवति। सप्तमराशिः तुला तस्य स्वरूपं तुलाधारः पुरुषः। अष्टमराशिः वृश्चिकः तस्य स्वरूपं वृश्चिकाकारः। नवमः राशिः धनुः तस्य स्वरूपं धनुर्धरः अश्वाकाराधश्शरीरार्धः नरः। दशमः राशिः मकरः तस्य स्वरूपं मकराकारः। एकादशः राशिः कुम्भः तस्य स्वरूपं घटाकारः। द्वादशः राशिः मीनः तस्य स्वरूपं मत्स्याकारः भवति। होरास्तु राश्यर्द्धं भवति। राशिमानं त्रिंशदंशात्मकं भवति। राशेः तृतीयः भागः द्रेष्काणः भवति। राशेः नवमांशः नवांशः भवति। ''अजमृगतौलिचन्द्रभवनादिनवांशविधिः'' इति वचनात् मेषमकरतुलाकर्कराशिवशात् मेषादिराशीनां नवांशाः भवन्ति।

राशेः द्वादशभागः द्वादशांशः भवति। ''भवनसमांशकाधिपतयः स्वगृहात् क्रमशः।।'' इति वचनात् तस्य लक्षणं भवति। त्रिंशद्भागः त्रिंशांशः भवति, तस्य कुजरविजेत्यादि लक्षणं भवति। बलाबलस्य निर्धारणं राशीनामेव भवति। पूर्वस्यां दिशि लग्ने बुधांगिरसौ बलवन्तौ स्तः पश्चिमदिशि शनिः बली भवति, चन्द्रशुक्रौ उत्तरदिशि बलवन्तौ स्तः। स्थानबलं स्वोच्च-सुहृद्वशात् भवति। कालबलं समयानुसारं भवति। चन्द्रभौमशनयः रात्रिबलिनः भवन्ति। बुधः सर्वदा बली भवति। अन्ये ये ग्रहाः सन्ति ते दिने बलिः भवन्ति। चेष्टाबलम् अयनवशात् भवति। सूर्यचन्द्रौ उत्तरायणे बलिनौ भवतः। अन्यग्रहाः यदि चन्द्रेण युक्ताः स्युः

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तदा बलिनः भवन्ति। ग्रहाणां वात-पित्त-कफ-प्रकृतिश्च भवन्ति। स्नायु-अस्थि-रक्त-चर्म-वीर्य-मेदा-मज्जाश्च क्रमशः सूर्यादीनां धातवः भवन्ति। ताम्र-मणि-सुवर्ण-कांस्य-रजत-मुक्ता-कृष्णलोहाश्च क्रमशः सूर्यादीनां द्रव्याणि भवन्ति। क्षत्रिय-वैश्य-क्षत्रिय-वैश्य-विप्र-विप्र-शूद्राश्च क्रमशः सूर्यादीनां जातयः भवन्ति। चेष्टायाः तात्पर्यं विशेषविनियोगेन अस्ति। आचार्यः अग्रे निषेकादिवर्णनं करोति। आचार्यः कथयति यत् होराशास्त्रे गर्भाधानं कदा कर्तव्यं, जन्मः कस्मिन् समये भविष्यति, सन्ध्याकाले वा प्रातःकाले, प्रसूतिद्वारस्य निर्धारणञ्च होरास्कन्धे भवति। ततः मृत्युनिर्धारणं, ग्रहाणां दशान्तर्दशावशात् फलनिर्धारणम्, अष्टकवर्गवशात् ग्रहाणां फलनिर्धारणं, राजयोगवशात् जातकस्य फलकथनं, चन्द्रवशात् सुनफादियोगाः भवन्ति तेषां फलकथनं, द्विग्रहादियोगवशात् फलकथनं, नाभसादीनां योगानां फलकथनं, मोक्षादिफलकथनं, तात्कालिकप्रश्नवशात् फलकथनं, विवाहोपनयन-चूडाकरण-गृहप्रवेशानां मुहूर्त्तकथनमित्यादि विषयाः अस्मिन् जातकशास्त्रे सन्ति।

३.१३ यात्राभेदनिरूपणम्

यात्रायां तु तिथिदिवसकरणनक्षत्रमुहूर्त्तविलग्नयोगदेहस्पन्दनस्वप्नविजय-स्नानग्रहयज्ञगणयागाग्निलिङ्गहस्त्यश्वेङ्गितसेनाप्रवादचेष्टादिग्रहषाड्गुण्योपायमङ्गला-मङ्गलशकुनसैन्यनिवेशभूमयोऽग्निवर्णा मन्त्रिचरदूताटविकानां यथाकालं प्रयोगाः परदुर्गोपलम्भोपायश्चेत्युक्तं चाचार्यैः।

व्याख्या – आचार्यः वराहमिहिरः यात्रायाः भेदनिरूपणं करोति। सः कथयति यत् यात्रायां नन्दाभद्राजयारिक्तापूर्णाः तिथयः, सूर्यचन्द्रभौमबुधगुरुशुक्रशनयः वासरः, बवादीनि करणानि भवन्ति। तेषां शुभाशुभफलस्य ज्ञानं क्रियते। अश्विन्यादिसप्तविंशतिनक्षत्राणि भवन्ति तेषां शुभाशुभफलस्य ज्ञानं क्रियते। शिवादित्रिंशद् मुहूर्त्ताः सन्ति, तेषां लक्षणं फलानि च नक्षत्रवशात् भवति। चरस्थिरद्विस्वभावलग्नानि भवन्ति। तेषां फलज्ञानं क्रियते। शरीरस्फुरणस्य विचारः, स्वप्नविचारः, यात्राविचारोऽपि अत्र भवति। ग्रहयज्ञस्य विचारः, गुह्यपूजन-गणयाग-विचारः, अग्निलिङ्गस्य विचारः यात्रायां भवति। दन्तमूलपरिणाहदीर्घतावशात् हस्तिचेष्टायां फलविचारः, बलावकिरणवशात् अश्वचेष्टया फलविचारः यात्रायां क्रियते। सेनापतिना चेष्टा तस्य फलविचारः वायुमेघवर्षादीनां लक्षणं तेषां फलविचारः यात्रायां भवति। सन्धिः, विग्रहः, यानः, आसनम्, द्वैधीभावः, संश्रयणः एते षड्गुणाः भवन्ति। तेषां फलविचारः यात्रायां क्रियते। सामदामदण्डभेदाः चत्वारः उपायाः भवन्ति, तेषां प्रयोगः यात्रायां क्रियते। शुद्ध (साधुः)-दर्पणादिमङ्गलकारी भवति तथा कपासादि अमङ्गलकारी भवति तयोः फलविचारः यात्रायां क्रियते। शकुनस्य फलविचारः यात्रायां क्रियते। शुभाशुभभूमेः लक्षणं सैन्यनिवेशकरणार्थं क्रियते अर्थात् स्निग्धः, स्थिरः, सुरभिः गुल्मः एते शुभं अन्यः अशुभं भवति। तयोः फलविचारः यात्रायां क्रियते। शुक्लकमलकाञ्चनद्युतिधराः अग्निवर्णाः भवन्ति। तेषां फलविचारः यात्रायां भवति। चरदूताटविकानां यथाकालं प्रयोगाः यात्रायां भवति। यात्रायां परदुर्गोपलम्भस्य विचारः क्रियते अर्थात् शत्रोः दुर्गप्राप्तकरणार्थं तस्योपायं परदुर्गोपलम्भः कथ्यते। उपलम्भनहेतुः केतुः, उल्का, तथा शनिग्रहस्य विचारः यात्रायां भवति। एतेषां शुभाशुभफलानां विचारः यात्रायां क्रियते।

३.१४ संहिताशास्त्रस्य प्रशंसा

संहितापारगश्च दैवचिन्तको भवति।

व्याख्याः – आचार्यः संहिताशास्त्रस्य प्रशंसां करोति। सः कथयति यत् दैवज्ञः संहितापारगः भवितव्यम्। अर्थात् ज्योतिषशास्त्रस्य सम्पूर्णतत्त्वानां ज्ञाता संहितापारगः भवति। आचार्य अग्रे संहितापदार्थस्य निरूपणं करोति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

३.१५ संहितापदार्थनिरूपणम्

यत्रैते संहिता पदार्थाः दिनकरादीनां ग्रहाणां चारास्तेषु च तेषां प्रकृतिविकृति-प्रमाणवर्णकिरणद्युतिसंस्थानास्तमनोदयमार्गमार्गान्तरवक्रानुवक्रर्क्षग्रहसमागमचारादिभिः फलानि नक्षत्रकूर्मविभागेन देशेष्वगस्त्यचारः। सप्तर्षिविचारः। ग्रहभक्तयो नक्षत्रव्यूहग्रह-शृङ्गाटकग्रहयुद्धग्रहसमागमग्रहवर्षफलगर्भलक्षणरोहिणीस्वात्याषाठीयोगाः सद्योवर्षकुसुमलतापरिधिपरिवेषपरिघपवनोल्कादिग्दाहक्षितिचलनसन्ध्यारागगन्धर्व-नगररजोनिर्घातार्घकाण्डसस्यजन्येन्द्रचापवास्तुविद्याङ्गविद्यावायसविद्यान्तरचक्रमृगचक्रश्वचक्र-वातचक्रप्रासादलक्षणप्रतिमालक्षणप्रतिष्ठापन वृक्षायुर्वेदोदगार्गलनीराजनखञ्जन-कोत्पातशान्तिमयूरचित्रकघृतकम्बलखड्गपट्टकृकवाकुकूर्मगोऽजाश्वेभपुरुषस्त्रीलक्षणा-यन्तः पुरचिन्तापिटकलक्षणोपानच्छेदवस्त्रच्छेदचामरदण्डशयनाऽऽसनलक्षणरत्नपरीक्षा दीपलक्षणं दन्तकाष्ठाद्याश्रितानि शुभाऽशुभानि निमित्तानि सामान्यानि च जगतः प्रतिपुरुषं पार्थिवे च प्रतिक्षणमनन्यकर्माभियुक्तेन दैवज्ञेन चिन्तयितव्यानि। न चैकाकिना शक्यन्तेऽहर्निशमवधारयितुं निमित्तानि। तस्मात् सुभृतेनैव दैवज्ञेनान्येऽपि तद्विदश्चत्वारः कर्तव्याः। तत्रैकेनेन्द्री चाग्नेयी च दिगवलोकयितव्या। याम्या नैर्ऋती चान्येनैवं वारुणी वायव्या चोत्तरा चैशानी चेति। यस्मादुल्कापातादीनि शीघ्रमपगच्छन्तीति। तस्याश्चाकारवर्णस्नेहप्रमाणादिग्रहर्क्षोपघातादिभिः फलानि भवन्ति।

व्याख्याः – आचार्यः विस्तृतरूपेण संहितापदार्थं वर्णयति। स कथयति यत् संहितास्कन्धे रविचन्द्रराहुभौमबुधगुरुशुक्रशनैश्चरकेतूनां गतिवशेन शुभाशुभफलं भवति। तेषु चारेषु ग्रहाणां स्वभावः, विकारः, प्रयाणं, शुक्लादिकः वर्णः, रश्मयः, तेषां कान्तिः, ऊर्ध्वाधोगामित्वं तोरणदण्डादिसंस्थानं, सूर्यसन्निकर्षविप्रकषाभ्याम् अस्तमनोदयौ, दक्षिणोत्तरमध्यमाः मार्गाः, मार्गमध्यमपञ्चताराग्रहाणां पतीपगतित्वं (वक्रं) एतेषां विषयाणां संहितास्कन्धे विचारः क्रियते। ततः स्पष्टगतितत्त्वम् (अनुवक्रं), नक्षत्रैः सह ग्रहाणां संयोगः, नक्षत्रेषु विचरणं संस्थितिः, नक्षत्रेण कूर्माकारस्थित्या भारतवर्षे नवधा विभक्तेन नक्षत्रत्रयेण देशेषु फलानि, अगस्त्यचारः, सप्तर्षीणां ऋषीणां चारः, देशद्रव्यप्राणिनामाधिपत्यम्, नक्षत्राणां व्यूहः, ताराग्रहाणाम् एकर्क्षगतानां शृङ्गटकादिसंस्थानैः शुभाशुभज्ञानं संहितास्कन्धे भवति। ततः ताराग्रहाणां युद्धं चन्द्रेण सह संयोगः समागमः, ग्रहाणां वर्षाधिपतित्वेन फलानि, गर्भाणां प्रावृट्कालपरिज्ञानार्थं लक्षणम्, रोहिण्याश्चन्द्रमसा सह संयोगः समागमः, स्वातियोगः पूर्वाषाढायोगश्च, सद्योवर्षलक्षणम्, कुसुमलतानां लक्षणं वृक्षादीनां लक्षणं लोके शुभाऽशुभज्ञानम् संहिता स्कन्धे भवति। ततः प्रतिसूर्यस्य लक्षणम्, वायोरुल्कापातदिग्दाह- लक्षणानि, भूकम्पः, सन्ध्ययः रक्तत्वम्, खपुरं तल्लक्षणम्, रजसां पांशूनां लक्षणं, निर्घातलक्षणम् अर्थात् अर्घकाण्डं राशिवशेन प्रण्याणां समर्घत्वं महार्घत्वं च, क्रीत्वा स्थापितानां येन विक्रयकाले लाभालाभौ ज्ञायेते तदर्घकाण्डम्, सस्य जातकम्, इन्द्रध्वजः, इन्द्रचापस्येन्द्रधनुषः लक्षणं संहितास्कन्धे भवति। ततः ग्रहाणां लक्षणम्, प्राणिनाम् अङ्गस्पर्शनेन शुभाऽशुभं ज्ञानम्, काकचेष्टितम्, शाकुने अन्तरचक्रम्, मृगचेष्टितम्, श्वचेष्टितम्, वातचक्रमष्टासु दिक्षु प्रवहतो वातस्य लक्षणम्, देवग्रहाणां लक्षणम्, देवस्थानादिप्रमाणम्, देवप्रतिमाप्रतिष्ठा, वृक्षाणां चिकित्सा, जलोपलब्धिः, नीराजनम्, पक्षिणां लक्षणम्, उत्पातानां दिव्यान्तरिक्षभौमनामुपशमनम्, पुष्यस्नानम्, मयूरचित्रकम्, खड्गलक्षणम्, नृपमुकुटादीनां लक्षणम्, कृकवाकुलक्षणम्, कूर्मलक्षणम्, गौः लक्षणम्, छागलक्षणम्, हस्तीलक्षणम्, एतेषां लक्षणानि संहितास्कन्धे भवन्ति। ततः पुरुषस्त्रीलक्षणानि, अन्तःपुरे स्त्रीणां रक्तानां विरक्तानां च लक्षणम्, पिटकानां लक्षणम्, मूषकादिभक्षणेनोपानहां छेददर्शनाच्छुभाशुभफलम् एवं वस्त्राणाम् छेदः, चामरलक्षणम्, शयनाऽऽसनलक्षणम्, वज्रादीनां रत्नानां परीक्षा, दीपस्य लक्षणम्, दन्तकाष्ठादीनां यान्याश्रितानि तदायत्तानि शुभाशुभानि निमित्तानि चिह्नानि, जगतः सर्वजनानां साधारणानि लक्षणानि, प्रतिपुरुषं अर्थात् पुरुषं, पुरुषम् इति प्रतिपुरुषं लक्षणम्,

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तदा बलिनः भवन्ति। ग्रहाणां वात-पित्त-कफ-प्रकृतिश्च भवन्ति। स्नायु-अस्थि-रक्त-चर्म-वीर्य-मेदा-मज्जाश्च क्रमशः सूर्यादीनां धातवः भवन्ति। ताम्र-मणि-सुवर्ण-कांस्य-रजत-मुक्ता-कृष्णलोहाश्च क्रमशः सूर्यादीनां द्रव्याणि भवन्ति। क्षत्रिय-वैश्य-क्षत्रिय-वैश्य-विप्र-विप्र-शूद्राश्च क्रमशः सूर्यादीनां जातयः भवन्ति। चेष्टायाः तात्पर्यं विशेषविनियोगेन अस्ति। आचार्यः अग्रे निषेकादिवर्णनं करोति। आचार्यः कथयति यत् होराशास्त्रे गर्भाधानं कदा कर्तव्यं, जन्मः कस्मिन् समये भविष्यति, सन्ध्याकाले वा प्रातःकाले, प्रसूतिद्वारस्य निर्धारणञ्च होरास्कन्धे भवति। ततः मृत्युनिर्धारणं, ग्रहाणां दशान्तर्दशावशात् फलनिर्धारणम्, अष्टकवर्गवशात् ग्रहाणां फलनिर्धारणं, राजयोगवशात् जातकस्य फलकथनं, चन्द्रवशात् सुनफादियोगाः भवन्ति तेषां फलकथनं, द्विग्रहादियोगवशात् फलकथनं, नाभसादीनां योगानां फलकथनं, मोक्षादिफलकथनं, तात्कालिकप्रश्नवशात् फलकथनं, विवाहोपनयन-चूडाकरण-गृहप्रवेशानां मुहूर्तकथनमित्यादि विषयाः अस्मिन् जातकशास्त्रे सन्ति।

३.१३ यात्राभेदनिरूपणम्

यात्रायां तु तिथिदिवसकरणनक्षत्रमुहूर्त्तविलग्नयोगदेहस्पन्दनस्वप्नविजय-स्नानग्रहयज्ञगणयागाग्निलिङ्गहस्त्यश्वेङ्गितसेनाप्रवादचेष्टादिग्रहषाड्गुण्योपायमङ्गला-मङ्गलशकुनसैन्यनिवेशभूमयोऽग्निवर्णा मन्त्रिचरदूताटविकानां यथाकालं प्रयोगाः परदुर्गोपलम्भोपायश्चेत्युक्तं चाचार्यैः।

व्याख्या – आचार्यः वराहमिहिरः यात्रायाः भेदनिरूपणं करोति। सः कथयति यत् यात्रायां नन्दाभद्राजयारिक्तापूर्णाः तिथयः, सूर्यचन्द्रभौमबुधगुरुशुक्रशनयः वासरः, बवादीनि करणानि भवन्ति। तेषां शुभाशुभफलस्य ज्ञानं क्रियते। अश्विन्यादिसप्तविंशतिनक्षत्राणि भवन्ति तेषां शुभाशुभफलस्य ज्ञानं क्रियते। शिवादित्रिंशद् मुहूर्त्ताः सन्ति, तेषां लक्षणं फलानि च नक्षत्रवशात् भवति। चरस्थिरद्विस्वभावलग्नानि भवन्ति। तेषां फलज्ञानं क्रियते। शरीरस्फुरणस्य विचारः, स्वप्नविचारः, यात्राविचारोऽपि अत्र भवति। ग्रहयज्ञस्य विचारः, गुह्यपूजन-गणयाग-विचारः, अग्निलिङ्गस्य विचारः यात्रायां भवति। दन्तमूलपरिणाहदीर्घतावशात् हस्तिचेष्टायां फलविचारः, वलावकिरणवशात् अश्वचेष्टाया फलविचारः यात्रायां क्रियते। सेनापतिना चेष्टा तस्य फलविचारः वायुमेघवर्षादीनां लक्षणं तेषां फलविचारः यात्रायां भवति। सन्धिः, विग्रहः, यानः, आसनम्, द्वैधीभावः, संश्रयणः एते षड्गुणाः भवन्ति। तेषां फलविचारः यात्रायां क्रियते। सामदामदण्डभेदाः चत्वारः उपायाः भवन्ति, तेषां प्रयोगः यात्रायां क्रियते। शुद्ध (साधुः)-दर्पणादिमङ्गलकारी भवति तथा कपासादि अमङ्गलकारी भवति तयोः फलविचारः यात्रायां क्रियते। शकुनस्य फलविचारः यात्रायां क्रियते। शुभाशुभभूमेः लक्षणं सैन्यनिवेशकरणार्थं क्रियते अर्थात् स्निग्धः, स्थिरः, सुरभिः गुल्मः एते शुभं अन्यः अशुभं भवति। तयोः फलविचारः यात्रायां क्रियते। शुक्लकमलकाञ्चनद्युतिधराः अग्निवर्णाः भवन्ति। तेषां फलविचारः यात्रायां भवति। चरदूताटविकानां यथाकालं प्रयोगाः यात्रायां भवति। यात्रायां परदुर्गोपलम्भस्य विचारः क्रियते अर्थात् शत्रोः दुर्गप्राप्तकरणार्थं तस्योपायं परदुर्गोपलम्भः कथ्यते। उपलम्भनहेतुः केतुः, उल्का, तथा शनिग्रहस्य विचारः यात्रायां भवति। एतेषां शुभाशुभफलानां विचारः यात्रायां क्रियते।

३.१४ संहिताशास्त्रस्य प्रशंसा

संहितापारगश्च दैवचिन्तको भवति।

व्याख्याः – आचार्यः संहिताशास्त्रस्य प्रशंसां करोति। सः कथयति यत् दैवज्ञः संहितापारगः भवितव्यम्। अर्थात् ज्योतिषशास्त्रस्य सम्पूर्णतत्त्वानां ज्ञाता संहितापारगः भवति। आचार्य अग्रे संहितापदार्थस्य निरूपणं करोति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

३.१५ संहितापदार्थनिरूपणम्

यत्रैते संहिता पदार्थाः दिनकरादीनां ग्रहाणां चारास्तेषु च तेषां प्रकृतिविकृति-प्रमाणवर्णकिरणद्युतिसंस्थानास्तमनोदयमार्गमार्गान्तरवक्रानुवक्रर्क्षग्रहसमागमचारादिभिः फलानि नक्षत्रकूर्मविभागेन देशेष्वगस्त्यचारः। सप्तर्षिविचारः। ग्रहभक्तयो नक्षत्रव्यूहग्रह-शृङ्गाटकग्रहयुद्धग्रहसमागमग्रहवर्षफलगर्भलक्षणरोहिणीस्वात्याषाठीयोगाः सद्योवर्षकुसुमलतापरिधिपरिवेषपरिघपवनोल्कादिग्दाहक्षितिचलनसन्ध्यारागगन्धर्व-नगररजोनिर्घातार्घकाण्डसस्यजन्येन्द्रचापवास्तुविद्याङ्गविद्यावायसविद्यान्तरचक्रमृगचक्रश्वचक्र-वातचक्रप्रासादलक्षणप्रतिमालक्षणप्रतिष्ठापन वृक्षायुर्वेदोदगार्गलनीराजनखञ्जन-कोत्पातशान्तिमयूरचित्रकघृतकम्बलखङ्गपट्टकृकवाकुकूर्मगोऽजाश्वेभपुरुषस्त्रीलक्षणा-यन्तः पुरचिन्तापिटकलक्षणोपानच्छेदवस्त्रच्छेदचामरदण्डशयनाऽऽसनलक्षणरत्नपरीक्षा दीपलक्षणं दन्तकाष्ठाद्याश्रितानि शुभाऽशुभानि निमित्तानि सामान्यानि च जगतः प्रतिपुरुषं पार्थिवे च प्रतिक्षणमनन्यकर्माभियुक्तेन दैवज्ञेन चिन्तयितव्यानि। न चैकाकिना शक्यन्तेऽहर्निशमवधारयितुं निमित्तानि। तस्मात् सुभृतेनैव दैवज्ञेनान्येऽपि तद्विदश्चत्वारः कर्तव्याः। तत्रैकेनेन्द्री चाग्नेयी च दिगवलोकयितव्या। याम्या नैर्ऋती चान्येनैवं वारुणी वायव्या चोत्तरा चैशानी चेति। यस्मादुल्कापातादीनि शीघ्रमपगच्छन्तीति। तस्याश्चाकारवर्णस्नेहप्रमाणादिग्रहर्क्षोपघातादिभिः फलानि भवन्ति।

व्याख्याः – आचार्यः विस्तृतरूपेण संहितापदार्थं वर्णयति। स कथयति यत् संहितास्कन्धे रविचन्द्रराहुभौमबुधगुरुशुक्रशनैश्चरकेतूनां गतिवशेन शुभाशुभफलं भवति। तेषु चारेषु ग्रहाणां स्वभावः, विकारः, प्रयाणं, शुक्लादिकः वर्णः, रश्मयः, तेषां कान्तिः, ऊर्ध्वाधोगामित्वं तोरणदण्डादिसंस्थानं, सूर्यसन्निकर्षविप्रकर्षाभ्याम् अस्तमनोदयौ, दक्षिणोत्तरमध्यमाः मार्गाः, मार्गमध्यमपञ्चताराग्रहाणां पतीपगतित्वं (वक्रं) एतेषां विषयाणां संहितास्कन्धे विचारः क्रियते। ततः स्पष्टगतितत्त्वम् (अनुवक्रं), नक्षत्रैः सह ग्रहाणां संयोगः, नक्षत्रेषु विचरणं संस्थितिः, नक्षत्रेण कूर्माकारस्थित्या भारतवर्षे नवधा विभक्तेन नक्षत्रत्रयेण देशेषु फलानि, अगस्त्यचारः, सप्तर्षीणां ऋषीणां चारः, देशद्रव्यप्राणिनामाधिपत्यम्, नक्षत्राणां व्यूहः, ताराग्रहाणाम् एकर्क्षगतानां शृङ्गटकादिसंस्थानैः शुभाशुभज्ञानं संहितास्कन्धे भवति। ततः ताराग्रहाणां युद्धं चन्द्रेण सह संयोगः समागमः, ग्रहाणां वर्षाधिपतित्वेन फलानि, गर्भाणां प्रावृट्कालपरिज्ञानार्थं लक्षणम्, रोहिण्याश्चन्द्रमसा सह संयोगः समागमः, स्वातियोगः पूर्वाषाढायोगश्च, सद्योवर्षलक्षणम्, कुसुमलतानां लक्षणं वृक्षादीनां लक्षणं लोके शुभाऽशुभज्ञानम् संहिता स्कन्धे भवति। ततः प्रतिसूर्यस्य लक्षणम्, वायोरुल्कापातदिग्दाह- लक्षणानि, भूकम्पः, सन्ध्ययः रक्तत्वम्, खपुरं तल्लक्षणम्, रजसां पांशूनां लक्षणं, निर्घातलक्षणम् अर्थात् अर्घकाण्डं राशिवशेन प्रण्याणां समर्घत्वं महार्घत्वं च, क्रीत्वा स्थापितानां येन विक्रयकाले लाभालाभौ ज्ञायेते तदर्घकाण्डम्, सस्य जातकम्, इन्द्रध्वजः, इन्द्रचापस्येन्द्रधनुषः लक्षणं संहितास्कन्धे भवति। ततः ग्रहाणां लक्षणम्, प्राणिनाम् अङ्गस्पर्शनेन शुभाऽशुभं ज्ञानम्, काकचेष्टितम्, शाकुने अन्तरचक्रम्, मृगचेष्टितम्, श्वचेष्टितम्, वातचक्रमष्टासु दिक्षु प्रवहतो वातस्य लक्षणम्, देवग्रहाणां लक्षणम्, देवस्थानादिप्रमाणम्, देवप्रतिमाप्रतिष्ठा, वृक्षाणां चिकित्सा, जलोपलब्धिः, नीराजनम्, पक्षिणां लक्षणम्, उत्पातानां दिव्यान्तरिक्षभौमनामुपशमनम्, पुष्यस्नानम्, मयूरचित्रकम्, खड्गलक्षणम्, नृपमुकुटादीनां लक्षणम्, कृकवाकुलक्षणम्, कूर्मलक्षणम्, गौः लक्षणम्, छागलक्षणम्, हस्तीलक्षणम्, एतेषां लक्षणानि संहितास्कन्धे भवन्ति। ततः पुरुषस्त्रीलक्षणानि, अन्तःपुरे स्त्रीणां रक्तानां विरक्तानां च लक्षणम्, पिटकानां लक्षणम्, मूषकादिभक्षणेनोपानहां छेददर्शनाच्छुभाशुभफलम् एवं वस्त्राणाम् छेदः, चामरलक्षणम्, शयनाऽऽसनलक्षणम्, वज्रादीनां रत्नानां परीक्षा, दीपस्य लक्षणम्, दन्तकाष्ठादीनां यान्याश्रितानि तदायत्तानि शुभाशुभानि निमित्तानि चिह्नानि, जगतः सर्वजनानां साधारणानि लक्षणानि, प्रतिपुरुषं अर्थात् पुरुषं, पुरुषम् इति प्रतिपुरुषं लक्षणम्,

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

संहितास्कन्धे भवति। ततः राजनि शुभाऽशुभानि। यथा कृष्णा रेखा सवितरीति तानि च प्रतिक्षणं क्षणं क्षणम् न अन्यकर्मा अनन्यकर्मा तेनानन्यकर्मणा एकचित्तेनाभियुक्तेन तत्परेण दैवज्ञेन चिन्तयितव्यानि। न तानि एकाकिनां केवलेनावधारयितुं शक्यानि। नृपेण अतिप्रभूतार्थदानेन परितोषितः चतुर्णां दैवज्ञानां वरणं कर्तव्यम्। तत्र एकेन पूर्वा आग्नेयी च दिग् अवलोकयितव्या। अन्येनैवं याम्या नैऋती च अवलोकयितव्या। अनेन प्रकारेण पश्चिमा, पश्चिमोत्तरा तृतीयेन अवलोकयितव्या। उत्तरा, पूर्वोत्तरा चतुर्थेन अवलोकयितव्या। यतो हि उल्कागन्धर्वनगरकेतुदर्शनानि भवन्ति तानि शीघ्रमेव अदर्शनं यान्ति। एतेषां दर्शनं एकैव दैवज्ञः न कर्त्तुं शक्नोति। तस्या आकारवर्णस्नेहप्रमाणादिग्रहक्षोपघातादिभिः फलानि भवन्ति।

३.१६ तिथिनक्षत्रश्रवणफलम्

दुःस्वप्नदुर्विचिन्तितदुष्प्रेक्षितदुष्कृतानि कर्माणि।
क्षिप्रं प्रयान्ति नाशं शशिनः श्रुत्वा भसंवादम्॥

अन्वयः – दुःस्वप्नदुर्विचिन्तितदुष्प्रेक्षितदुष्कृतानि कर्माणि शशिनः भसंवादम् श्रुत्वा क्षिप्रं प्रयान्ति नाशम्।

प्रतिपदार्थः – दुःस्वप्नम् = दुष्टस्वप्नम्। दुर्विचिन्तितम् = दुष्टचिन्तनम्। दुष्प्रेक्षितम् = दुष्टदर्शनम्। दुष्कृतम् = दुष्टकर्मः। शशिनः = चन्द्रमा। भसंवादकम् = नक्षत्रेण सह संवादम्। क्षिप्रम् = शीघ्रम्। प्रयान्ति = व्रजन्ति। नाशम् = विनाशम्।

व्याख्याः – आचार्यः वराहमिहिरः तिथिनक्षत्रश्रवणफलं कथयति यत् दुष्टस्वप्नम्, दुष्टचिन्तनम्, दुष्टदर्शनम्, दुष्टकर्मम्, एतानि सर्वाणि चन्द्रमो नक्षत्रेण सह संवादं श्रुत्वा शीघ्रं विनाशं व्रजन्ति। आचार्यस्य तात्पर्यम् अस्ति यत् तिथिनक्षत्रं श्रुत्वा सर्वपापानि नश्यन्ति। यथा–

तिथिवारनक्षत्रञ्च योगकरणमेव च।
पञ्चाङ्गस्य फलं श्रुत्वा गङ्गास्नानं फलं लभेत्॥

बोधप्रश्नाः

१९. होराशास्त्रस्य अपरनाम किम्?

२०. एकस्मिन् होरायां कति अंशाः भवन्ति?

२१. बुधः सर्वदा .... भवति।

२२. नक्षत्राणां संख्या लिखत।

२३. ग्रहाणां समागमः केन सह भवति?

२४. तिथिनक्षत्रं श्रुत्वा .... नश्यन्ति।

३.१७ सारांशः

अस्मिन् पाठे भवान् दैवज्ञप्रशंसा, नक्षत्रसूचकस्य निन्दा संहितापदार्थनिरूपणञ्च अधीतवान्। बृहत्संहितायाम् आचार्यः ज्योतिषशास्त्रस्य प्रशंसा सम्यग्रूपेण कृतवान्। स कथयति यत् यदि कदाचित् मनुष्यः वायुवेगेन समुद्रं पारं कर्त्तुं शक्नोति परं कालपुरुषरूपीज्योतिषशास्त्रस्य महासमुद्रं मुनिविधय कोऽपि मनुष्यः पारं कर्त्तुं न शक्नोति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ततः भवान् दैवज्ञप्रशंसा पठितवान्। दैवज्ञप्रशंसाक्रमे आचार्यः कथयति यत् यः गणितस्कन्धस्य ज्ञाता भवति। तस्य वाणी किमपि मिथ्या न भवति, सर्वदा सत्यरूपा भवति। भवान् गर्गाचार्यस्य वचनं पठितवान्। स कथयति यत् सिद्धान्तसंहिता होराः ज्योतिषशास्त्रस्य अङ्गानि सन्ति। एतेषां ज्ञाता दैवज्ञः भवति। दैवज्ञं यो राजा न पूजयते। स नाशं प्राप्नोति। भवान् दैवज्ञस्य महत्त्वं अधीतवान्।

३.१८ शब्दावली

१.	छाया	=	पलभा।
२.	अर्णवः	=	समुद्रः।
३.	अप्रदीपा	=	दीपरहिता।
४.	नभः	=	आकाशः।
५.	श्रियः	=	लक्ष्मी।
६.	भूतिम्	=	समृद्धिम्।
७.	दैवचिन्तकः	=	कालविदः।
८.	द्विजः	=	ब्राह्मणः।
९.	अग्रभुक्	=	प्रथमभोजी।
१०.	नरेन्द्रः	=	राजा।
११.	करिः	=	हस्तिः।
१२.	वाजिनां	=	अश्वानां।
१३.	स्वजनः	=	बन्धुजनः।
१४.	आर्या	=	माता।
१५.	कुहकः	=	इन्द्रजालः।
१६.	नक्षत्रसूचकः	=	नक्षत्रपिशुनः।
१७.	लोष्टः	=	मृत्खण्डः।
१८.	होरा	=	राश्यर्द्धम्।
१९.	पञ्चताराग्रहाः	=	मङ्गलः, बुधः, गुरुः, शुक्रः, शनिः।

३.१९ सन्दर्भग्रन्थः

१. **बृहत्संहिता** –व्या.– डॉ. सुरकान्त झा, चौखम्बा संस्कृत सीरीज ऑफिस, वाराणसी।

३.२० सहायकग्रन्थाः

१. **बृहत्संहिता** –व्या.– प्रो. नागेन्द्रपाण्डेयः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी।

२. **प्राचीनभारतस्य भौगोलिकस्वरूपम्** – लेखकः– डॉ. कृष्णकुमारः, मयंकप्रकाशन, मिश्राबाग, हनुमानगढ़ी, कनखल, हरिद्वार।

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली २०१५

Rinkant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

३. **सूर्यसिद्धान्तः** –व्या.– पं. कपिलेश्वरशास्त्री, चौखम्बा संस्कृत संस्थान, वाराणसी।

४. **सिद्धान्तशिरोमणिः** –व्या.– बापूदेवशास्त्री, सम्पूर्णानन्दसंस्कृतविश्व–विद्यालयः, वाराणसी।

५. **बृहत्संहिता** –व्या.– सुरेशचन्द्रमिश्रः, रञ्जन पब्लिकेशन, दरियागंज, नई दिल्ली।

६. **संस्कृत-हिन्दी-कोशः** –वामनशिवरामआप्टे, मोतीलाल बनारसीदास पब्लिशर्स प्रा. लि., दिल्ली।

३.२१ बोधप्रश्नोत्तराणि

१. गणितम्।

२. वाक्।

३. समासमुद्रः।

४. दैवज्ञस्य।

५. नाशम्।

६. शुभाऽशुभं फलम्।

७. न शोभाम्।

८. षड् (६)।

९. दैवज्ञम्।

१०. पापम्।

११. ब्रह्मलोकः।

१२. प्रथमभोजी।

१३. म्लेच्छा।

१४. दैवज्ञम्।

१५. हस्तिः।

१६. राज्ञः।

१७. विनष्टकारी।

१८. धूर्तदैवज्ञस्य।

१९. जातकशास्त्रम्।

२०. पञ्चदशः।

२१. बलिः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

२२. षडविंशतिः (२६)।

२३. चन्द्रेण।

२४. सर्वपापानि।

३.२२ अभ्यासप्रश्नाः

१. विष्णुगुप्तोक्तज्योतिषशास्त्रस्य प्रशंसां लिखत।

२. गर्गोक्तदैवज्ञस्य प्रशंसा क्रियताम्।

३. नक्षत्रसूचकस्य आलोचना कथं क्रियते?

४. होरापदार्थस्य निरूपणं सम्यक्रूपेण क्रियताम्।

५. यात्राभेदनिरूपणम् वर्णयत।

६. संहितापदार्थनिरूपणं क्रियताम्।

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

चतुर्थः पाठः – "सूर्यचारः"

पाठसंरचना

४.१ प्रस्तावना
४.२ उद्देश्यम्
४.३ अयनलक्षणं तत्परीक्षाविधिश्च
४.४ अयनगतसूर्यस्य फलम्
४.५ त्वष्ट्रादिभिः आच्छादितस्य सूर्यस्य फलम्
४.५.१ त्वष्ट्राग्रहेण आच्छादितस्य सूर्यस्य फलम्
४.५.२ तामसकीलकादिभिः आच्छादितस्य सूर्यस्य फलम्
बोधप्रश्नाः
४.६ तामसकीलकादीनां उदयनिमित्तानि
४.७ तामसकीलकादिकेतूनां शुभाशुभफलम्
४.७.१ सूर्यचन्द्रमण्डलयोः प्रवेशात् फलम्
४.७.२ सूर्यबिम्बस्थकेत्वादीनां फलम्
४.७.३ केतूनाम् आकृतिवशात् फलम्
४.७.४ केतूनां विशेषफलकथनम्
४.७.५ उत्पातानां निष्फलत्वम्
बोधप्रश्नाः
४.८ सूर्यरश्मिवशात् शुभाशुभफलम्
४.९ ऋतुवशात् सूर्यस्य फलम्
४.९.१ ऋतुषु सूर्यवर्णवशात् फलम्
४.९.२ सूर्यवर्णवशात् ब्राह्मणादिभ्यः फलम्
४.९.३ सूर्यवर्णवशात् अशुभफलम्
४.९.४ ऋतौ सूर्यवर्णवशात् अन्यत् फलम्
बोधप्रश्नाः
४.१० सूर्यविम्ववशात् शुभाशुभफलम्
४.११ प्रतिसूर्यस्य फलम्
४.१२ सूर्याक्रान्तनक्षत्रस्य सन्तापशोधनम्
बोधप्रश्नाः
४.१३ सारांशः
४.१४ शब्दावली
४.१५ सन्दर्भग्रन्थाः
४.१६ सहायकग्रन्थाः
४.१७ बोधप्रश्नोत्तराणि
४.१८ अभ्यासप्रश्नाः

४.१ प्रस्तावना

बृहत्संहितायाः चतुर्थे पाठे भवतः स्वागतम् अस्ति। तृतीये पाठे भवान् दैवज्ञप्रशंसां नक्षत्रसूचकस्य निन्दां संहितापदार्थनिरूपणञ्च ज्ञातवान्। सम्प्रति अस्मिन् पाठे भवान् सूर्यचारं पठिष्यति। सूर्यः यस्मिन् राशौ या यस्मिन् नक्षत्रे गच्छति तस्मिन् राशौ तस्मिन् नक्षत्रे वा तस्य चारः भवति। भवान् उत्तरायणं दक्षिणायनं च जानाति। अयं उत्तरायणं दक्षिणायनं च सूर्यचारवशात् भवति अर्थात् यदि सूर्यः मकरराशौ प्रवेशं करोति तदा उत्तरायणस्य प्रवृत्तिः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सूर्यचारः

भवति तथा च सूर्यः यदि कर्कराशौ प्रवेशं करोति तदा दक्षिणायनस्य प्रवृत्तिः भवति। आकाशमण्डले तामसकीलकादयः उपग्रहाः सन्ति। तेषां वर्णः कृष्णवर्गसदृशः भवति। ते यदा कदा सूर्यमण्डलं आच्छादितं कुर्वन्ति। तेषां शुभाशुभफलं भवति। अर्थात् तामसकीलकादयः यदि सूर्यमण्डलं आच्छादयन्ति तदा अशुभफलं भवति, परन्तु यदि चन्द्रमण्डलं आच्छादयन्ति तदा शुभफलं भवति। सूर्यस्य ऋतुवर्णवशात् शुभाशुभफलं भवति। भवान् जानाति यत् षड् ऋतवः भवन्ति। तेषां शुभाशुभफलमपि पाठेऽस्मिन् पठिष्यति।

४.२ उद्देश्यम्

अस्य पाठस्य अध्ययेन भवान्–

- ➢ अमनस्वरूपं वक्तुं शक्ष्यति।
- ➢ तामसकीलकादीनं स्वरूपं प्रकटयितुं शक्ष्यति।
- ➢ तामसकीलकादिभीराच्छादितस्य सूर्ययस्य फलं निरूपयितुं शक्ष्यति।
- ➢ केतूनाम् आकृतिवशात् फलं बोधयितुं कुशलो भविष्यति।
- ➢ बिम्बवशात् ऋतुवशात् रश्मि वशाच्च सूर्यफलं कथने समर्थो भविष्यति।

४.३ अयनलक्षणं तत्परीक्षाविधिश्च

भवान् जानाति यत् अयनं द्विविधं भवति। प्रथमं दक्षिणायनं द्वितीयं उत्तरायणम्। दक्षिणायनं कर्कादितः धन्वन्तपर्यन्तं भवति। उत्तरायणं मकरादितः मिथुनान्तपर्यन्तं भवति। आचार्यः अयनविषये बहुमतं कथयति। अयन लक्षणं तत्परीक्षणविधिश्च–

आश्लेषार्द्धाद्दक्षिणमुत्तरमयनं रवेर्धनिष्ठाद्यम्।
नूनं कदाचिदासीद्येनोक्तं पूर्वशास्त्रेषु॥

अन्वयः – रवेः आश्लेषार्द्धात् दक्षिणायनं धनिष्ठाद्यम् उत्तरमयनं नूनं पूर्वशास्त्रेषु कदाचिदासीद्येनोक्तम्।

प्रतिपदार्थः – रवेः = सूर्यस्य। आश्लेषार्द्धात् = आश्लेषानक्षत्रस्य अन्त्यपादद्वयात्। दक्षिणायनम् = याम्यायनम्। धनिष्ठाद्यम् = धनिष्ठानक्षत्रस्य आदितः। उत्तरमयनम् = सौम्यायनम्। नूनम् = निश्चितम्। पूर्वशास्त्रेषु = पाराशरादिशास्त्रेषु। आसीत् = अभूत्। उक्तम् = कथितम्।

व्याख्या – आचार्यः वराहमिहिरः पूर्वाचार्याणां मतं वर्णयति। सः कथयति आश्लेषानक्षत्रस्य अन्त्यपादद्वयात् दक्षिणायनस्य प्रारम्भः तथा च धनिष्ठानक्षत्रस्य आदितः उत्तरायणस्य प्रारम्भः कदाचित् आसीत्। येन पाराशरादिभिः कथितम्। पाराशरतन्त्रे अस्ति यत् श्रविष्ठाद्यात् पौष्णान्तं चरतः शिशिरः। वसन्तः पौष्णान्ताद्रोहिण्यन्तम्। सौम्याद्यात् सार्पार्द्धं ग्रीष्मः। प्रावृट् सार्पार्द्धाद्धस्तान्तम्। चित्राद्यादिन्द्रार्द्धं शरद्धेमन्तो ज्येष्ठार्द्धाद्वैष्णवान्तमिति।

अर्थात् धनिष्ठानक्षत्रस्य आदितः रेवतीपर्यन्तं सूर्यगमनं शिशिर-ऋतुः, रेवतीनक्षत्रस्य अन्त्याद् रोहिणीनक्षत्रपर्यन्तं वसन्त-ऋतुः, मृगशिरानक्षत्रस्य आदितः आश्लेषानक्षत्रार्द्धपर्यन्तं ग्रीष्म-ऋतुः, आश्लेषानक्षत्रार्द्धात् हस्तनक्षत्रपर्यन्तं वर्षा-ऋतुः, चित्रानक्षत्रस्य आदितः ज्येष्ठा-नक्षत्रार्द्धपर्यन्तं हेमन्त-ऋतुः भवति। इदं पाराशरस्य मतम् अस्ति। वराहमिहिराचार्यः स्वमतं प्रकटीकरोति।

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५
Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

साम्प्रतमयनं सवितुः कर्कटकाद्यं मृगादितश्चान्यत्।
उक्ताभावो विकृतिः प्रत्यक्षपरीक्षणैर्व्यक्तिः॥

अन्वयः – साम्प्रतम् अयनं सवितुः कर्कटकाद्यं मृगादितश्चान्यत् उक्ताभावो विकृतिः प्रत्यक्षपरीक्षणैर्व्यक्तिः॥

प्रतिपदार्थः – साम्प्रतम् = इदानीन्तने काले। अयनम् = सूर्यस्य उत्तरे दक्षिणे वा गमनारम्भः। सवितुः = सूर्यस्य। कर्कटकाद्यम् = कर्कराशेरादिबिन्दोः। मृगादितः = मकरादितः। चान्यद् = द्वितीयः। उक्तः = कथितः। अभावः = अन्यथात्वम्। विकृतिः = विकारः। प्रत्यक्षपरीक्षणै = दृश्यमानौ। व्यक्तिः = स्पष्टता।

व्याख्या – आचार्यः अयनविषये स्वमतं कथयति यत् इदानीं सूर्यस्य अयनं कर्कादितः दक्षिणायनं मकरादितः उत्तरायणं भवति। अनेन कथनेन यदि अन्यथात्वं स्यात् तदा विकारः ज्ञातव्यः। अस्य अयनस्य प्रत्यक्षपरीक्षणैः स्पष्टीकरणं भवति। आचार्यः सम्प्रति प्रचलितं अयनस्य प्रवृत्तिं कथयति। सिद्धान्तग्रन्थेषु अपि अयनस्य प्रवृत्तिः कर्कादितः मकरादितः स्वीक्रियन्ते। यथा–

गोलसन्धेर्नवत्यंशैर्वृत्तं कर्क-मृगादिगम्।
आयनं मण्डलं तत् स्यात् कदम्बध्रुवयोर्गतम्॥

अर्थात् क्रान्तिवृत्तनाडीवृत्तयोः सम्पातस्थानं गोलसन्धिः भवति। ततः नवत्यंशैर्वृत्तम् आयनं मण्डलं भवति। तद् आयनं मण्डलं कर्क–मकरादिगं भवति।

अयनपरीक्षणविधिः

दूरस्थचिह्नवेद्यादुदयेऽस्तमयेऽपि वा सहस्रांशोः।
छायाप्रवेशनिर्गमचिह्नैर्वा मण्डले महति॥

अन्वयः – सहस्रांशोः दयेऽस्तमयेऽपि वा महति मण्डले दूरस्थचिह्नवेद्यात् छायाप्रवेशनिर्गमचिह्नैर्वा।

प्रतिपदार्थः – सहस्रांशोः = सूर्यस्य। उदयेऽस्तमये = सूर्यस्य उदयकाले अस्तकाले। दूरस्थ = दूरे तिष्ठतीति दूरस्थम्। मण्डले = प्रदेशे। चिह्नवेद्याद् = चिह्नस्य रेखायाः वा स्थापनेन सूर्यस्थितिज्ञानं तस्मात्। छायाप्रवेशनिर्गमचिह्नैः = पूर्वाह्णे छाया प्रविशति चापराह्णे छाया निर्गच्छति छायाप्रवेश-निर्गम कालिकचिह्नैः।

व्याख्या – आचार्यः अयनपरीक्षणविधिं कथयति। सूर्यस्य उदयकाले वा अस्तकाले दूरस्थचिह्नस्य वेधद्वारा छायायाः प्रवेशनिर्गमौ ज्ञातव्यौ। अर्थात् समतलभूमौ वृत्तमुत्पाद्य दिगङ्कितं कृत्वा तन्मध्ये शङ्कुं स्थापयेत्। तत्र विषुवद्दिने सूर्योदयास्तमययोः पूर्वापररेखायां तस्य शङ्कोश्छाया पतति। ततो यथा-यथा सूर्यः मिथुनान्तं यावद् याति तथा-तथा सूर्योदयकाले छाया पूर्वापररेखायाः दक्षिणे याति। अस्तकालेऽपि छाया दक्षिणे याति। ततः कर्कादौ कन्यान्तं यावत् स्थिते सूर्ये प्रतिदिनं छाया उत्तरेण याति। तुलादौ पुनः पूर्वापररेखायां पतति ततो धनुरन्तं यावत् प्रतिदिनमुत्तरेण याति। ततो मकरादौ पुनः प्रतिदिनं दक्षिणे याति मीनान्तं यावत्। एवं मत्वा ततोऽयननिवृतेः आसन्न काले तस्मिन् मण्डले यस्मिन् प्रदेशे पूर्वाह्णे छाया प्रविशति तत्र चिह्नं कार्यम्। यत्र चापराह्णे निर्गच्छति तत्र चिह्नं कार्यम्। पुनः द्वितीयदिने तथास्थितस्य शङ्कोश्छायाप्रवेशनिर्गमचिह्ने प्रतिदिनं कार्ये। प्रथमद्वितीयदिनचिह्नयोर्यदि साम्यम् उत्पन्नं तदा तस्मिन् दिने अयननिवृत्तिरेवं तस्यां विचारेत्। अनेन प्रकारेण अयनस्य परीक्षणं भवति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

४.४ अयनगतसूर्यस्य फलम्

अप्राप्य मकरमर्को विनिवृत्तो हन्ति सापरां यान्याम्।
कर्कटकमसम्प्राप्तो विनिवृत्तश्चोत्तरां सैन्द्रीम्॥

अन्वयः – अर्को मकरम् अप्राप्य विनिवृत्तो सापरां याम्यां हन्ति कर्कटकमसम्प्राप्तो विनिवृत्तश्चोत्तरां सैन्द्रीम्।

प्रतिपदार्थः – अर्को = सूर्यः। मकरम् = मकरराशिम्। अप्राप्य = अगत्वा। विनिवृत्तो = व्यावृत्तः। सापराम् = पश्चिमदिशा सह। याम्याम् = दक्षिणां दिशम्। हन्ति = नाशयति। कर्कटकम् = कुलीरम्। असम्प्राप्तः = आगतः। विनिवृत्तः = निवृत्तः। चोत्तराम् = उत्तरां दिशम्। सैन्द्रीम् = पूर्वया सह।

व्याख्या – आचार्यः अयनगतसूर्यस्य फलं कथयति यत् सूर्यः मकरम् अगत्वा यदि व्यावृत्तः तदा पश्चिमदिशि दक्षिणदिशि च स्थितान् देशान् नाशयति। कर्कराशौ प्रवेशं विना सूर्यः यदि उत्तरदिशि निवृत्तः भवति तदा उत्तरदिशि पूर्वदिशि च स्थितान् देशान् नाशयति। यथा गर्गः –

यदा निवर्ततेऽप्राप्तो धनिष्ठामुत्तरायणे ।
आश्लेषां दक्षीणेऽप्राप्तस्तदा विन्द्यान्महद्भयम्॥
उत्तरमयनमतीत्य व्यावृत्तः क्षेमसस्यवृद्धिकरः।
प्रकृतिस्थश्चाप्येवं विकृतगतिर्भयकृदुष्णांशुः॥

अन्वयः – उष्णांशुः उत्तरमयनतीत्य व्यावृत्तः क्षेमसस्यवृद्धिकरः प्रकृतिस्थश्चाप्येवं विकृतगतिर्भयकृद्॥

प्रतिपदार्थः – उष्णांशुः = सूर्यः। उत्तरमयनम् = उत्तरायणम्। अतीत्य = अतिक्राम्य। व्यावृत्तः = निवर्तितः पृष्ठे मिथुनाभिमुखं गच्छति। क्षेमसस्यवृद्धिकरः = धन-धान्यवृद्धिकरः। प्रकृतिस्थः = स्वभावस्थः। विकृतगतिः = सविकारा गतिर्यस्यासौ विकृतगतिः। भयकृद् = भयं करोति।

व्याख्या – आचार्यः अयनगतसूर्यस्य फलं कथयति यत् यदि सूर्यः उत्तरायणं (मकरं) प्राप्य उत्तरदिशि निवर्तितः तदा जनकल्याणस्य मार्गं प्रशस्यति धन-धान्यस्य अभिवृद्धिं करोति। यदि सूर्यः दक्षिणायनं (कर्कटं) प्राप्य दक्षिणदिशि निवर्तितः तदा मार्गं प्रशस्तिकृत्वा धन-धान्यस्य अभिवृद्धिं कृत्वा जनकल्याणं करोति। यदि सूर्यस्य गतिः विकाररहितः तदा धन-धान्यस्य अभिवृद्धिं करोति। यदि सूर्यस्य गतिः विकारयुक्तः तदा लोके भयं करोति। भगवान् वृद्धगर्गः कथयति–

अयने सुप्रभः स्निग्धः सेवते यदि भास्करः।
सुवृष्टिं च सुभिक्षं च योगक्षेमं च निर्दिशेत्॥
अनिवृत्ते समे वापि निवृत्तः शस्यते रविः।
हीने भयावहो लोके दुर्भिक्षमकरप्रदः॥

४.५ त्वष्टादिभिः आच्छादितस्य सूर्यस्य फलम्

वराहमिहिराचार्यः त्वष्टादिभिः उपग्रहैः आच्छादितस्य सूर्यस्य फलं सम्यक्रूपेण प्रतिपादयति। त्वष्टृतामसकीलकाः ये सन्ति ते दुर्भिक्षकारकाः भवन्ति।

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५
Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

४.५.१ त्वष्टा-ग्रहेण आच्छादितस्य सूर्यस्य फलम्

सतमस्कं पर्वविना त्वष्टा नामार्कमण्डलं कुरुते।
स निहन्ति सप्तभूपान् जनांश्च शस्त्राग्निदुर्भिक्षैः॥

अन्वयः – पर्वविना सतमस्कं त्वष्टा नामार्कमण्डलं कुरुते स निहन्ति सप्तभूपान् जनांश्च शस्त्राग्निदुर्भिक्षैः।

प्रतिपदार्थः – पर्वविना = ग्रहणं विहाय। सतमस्कम् = अन्धकारयुक्तः। त्वष्टा नाम् = त्वष्टा इति नामक उपग्रहः। अर्कमण्डलम् = सूर्यमण्डलम्। निहन्ति = घातयति। सप्त भूपान् = नक्षत्रकूर्मोक्तानां नवानां नृपाणां मध्यात् सप्तनृपान्। जनान् = लोकान्। शस्त्राग्निदुर्भिक्षैः = शस्त्रेण सङ्ग्रामेण अग्निना।

व्याख्या – आचार्यः त्वष्टानामकग्रहेण आच्छादितस्य सूर्यस्य अशुभफलं कथयति। पर्वकालं विहाय अर्थात् ग्रहणकालं विहाय अन्यकाले त्वष्टा नामकः उपग्रहः यदि सूर्यमण्डलं आच्छादयति तदा नक्षत्रकूर्मोक्तानां नवानां नृपाणां मध्ये सप्तनृपान् घातयति। शस्त्रेण सङ्ग्रामेण अग्निना दुर्भिक्षेण च लोकान् निहन्ति। भगवान् पराशरः अपि कथयति–

अपर्वणि शशाङ्कार्कौ त्वष्टा नाम महाग्रहः।
आवृणोति तमः श्यामः सर्वलोकविपत्तये॥

४.५.२ तामसकीलकादिभिः आच्छादितस्य सूर्यस्य फलम्

तामसकीलकसंज्ञा राहुसुताः केतवस्त्रयस्त्रिंशत्।
वर्णस्थानाकारैस्तान् दृष्ट्वाऽर्के फलं ब्रूयात्॥

अन्वयः – राहुसुताः केतवः तामसकीलकसंज्ञा वर्णस्थानाकारैः त्रयस्त्रिंशत् तान् दृष्ट्वा अर्के फलं ब्रूयात्।

प्रतिपदार्थः – राहुसुताः = राहुपुत्राः। तामसकीलकसंज्ञा = राहुपुत्राः तामसकीलकसंज्ञा। वर्णाः = श्वेतादयः वर्णाः। स्थानम् = स्थानं शुभाऽशुभफलम्। ब्रूयात् = वदेत्।

व्याख्या – आचार्यः तामसकीलकादीनां राहुपुत्राणां परिचयं ददाति। सः कथयति यत् वर्णभेदात् स्थानभेदात् स्वरूपभेदाच्च राहुपुत्राः केतवः संख्यायां त्रयस्त्रिंशत्तामस-कीलकसंज्ञाकाः सन्ति। तान् तामसकीलकान् सूर्यमण्डले अवलोक्य वर्णस्थानाकारैः अर्थात् श्वेतादयः वर्णाः स्थानं प्रवेशो बिम्बैकभागः ध्वाङ्क्षादिसदृशाकृतिः, एतैः वर्णस्थानाकारैः शुभाऽशुभफलं वदेत्।

बोधप्रश्नाः

१. उत्तरायणं कदा भवति?

२. दक्षिणायनं कदा भवति?

३. यदि सूर्यः उत्तरायणे गच्छति तदा किं भवति?

४. त्वष्टाग्रहेण आच्छादितस्य सूर्यस्य फलं शुभं भवति वा अशुभाम्।

५. तामसकीलकसंज्ञकाः राहुपुत्राः कति सन्ति?

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

४.६ तामसकीलकादीनां उदयनिमित्तानि

तेषामुदये रूपाण्यम्भः कलुषं रजोवृतं व्योम।
नगतरुशिखरामर्दी सशर्करो मारुतश्चण्डः॥
ऋतुविपरीतास्तरवो दीप्ता मृगपक्षिणो दिशां दाहाः।
निर्घातमहीकम्पादयो भवन्त्यत्र चोत्पाताः॥

अन्वयः – तेषां उदये रूपाण्यम्भः कलुषं रजोवृतं व्योम नगतरुशिखरामर्दी सशर्करो मारुतश्चण्डः ऋतुविपरीतास्तरवो दीप्ता मृगपक्षिणो दिशां दाहाः निर्घात महीकम्पादयो भवन्त्यत्र चोत्पाताः॥

प्रतिपदार्थः – तेषाम् = तामसकीलकादीनाम्। उदये = दर्शने। रूपाण्य = एतानि लक्षणानि दृश्यन्ते। अम्भः = जलम्। कलुषम् = दूषितम्। रजोवृतम् = रजसा व्याप्तम्। व्योमः = आकाशः। नगः = पर्वतः। तरुः = वृक्षम्। शिखराः = अग्राः। मर्दयति = लोडयति। सशर्करः = मृत्कणिका। मारुतः = वातः। चण्डः = प्रचण्डः। ऋतुविपरीताः = तेषां ऋतौ स्वकलिकुसुमफलानामभावः। तरवः = वृक्षाः। दीप्ताः = व्याकुलाः। मृगाः = वनपशवः। पक्षिणः = खगाः। दाहाः = दहनाः। निर्घातः = घातः। महीकम्पादयः = भूकम्पादयः॥

व्याख्या – भवान् तामसकीलकसंज्ञकान् राहुपुत्रान् पठितवान्। आचार्यः तामस-कीलकादीनाम् उदयनिमित्तानि फलानि कथयति। तामसकीलकादीनाम् उदये एतानि फलानि भवन्ति- जलं निमित्तं विना दूषितम्, आकाशे रजसः धूलिकणानां व्याप्तिः, वायुवेगवशात् पर्वतानां वृक्षाणां च शिखराणि मर्दयन्ति, मृत्कणिकाभिः सहितः वायुः वहति। वृक्षाः ऋतुविपरीताः अर्थात् स्वकालात् पूर्वं वा पश्चाद् कुसुमफलानि उत्पद्यन्ते, वनपशवः पक्षिणश्च सूर्याभिमुखदीप्तस्थाः भवन्ति। दिग्दाहा असकृद्दृश्यन्ते, घातः भवति, भूकम्पादयः अपि भवन्ति। अर्थात् तामसकीलकादीनाम् उदये सर्वदा अशुभफलं भवति। तामसकीलकादयस्तु कृष्णवर्णसदृशाः भवन्ति। ते सूर्यमण्डलस्य आच्छादनं कुर्वन्ति।

४.७ तामसकीलकादिकेतूनां शुभाशुभफलम्

भवान् तामसकीलकादीनाम् उदयनिमित्तानि फलानि पठितवान् ततः भवान् तामसकीलकादिकेतूनां शुभाशुभफलं पठिष्यति। आचार्यः तामसकीलकादिकेतूनां शुभाशुभफलं सम्यग्रूपेण वर्णयति। सर्वप्रथमं सूर्यचन्द्रमण्डलयोः प्रवेशात् शुभाशुभफलं कथयति।

४.७.१ सूर्यचन्द्रमण्डलयोः प्रवेशात् फलम्

ते चार्कमण्डलगताः पापफलाश्चान्द्रमण्डले सौम्याः।
ध्वाङ्क्षकबन्धप्रहरणरूपाः पापाः शशाङ्केऽपि॥

अन्वयः – ते चार्कमण्डलगताः पापफलाश्चन्द्रमण्डले सौम्याः ध्वाङ्क्षकबन्धप्रग्रहरणरूपाः पापाः शशाङ्केऽपि॥

प्रतिपदार्थः – ते = तामसकीलकाः। अर्कमण्डले = सूर्यबिम्बे। गताः = प्राप्ताः। पापफला = दुष्टफलप्रदा। चन्द्रमण्डले = शशिबिम्बे। सौम्याः = शुभफलप्रदाः। ध्वाङ्क्षः = काकः। कबन्धः = छिन्नशिरः। प्रहरणम् = खड्गम्। रूपाः = आकृतयः। पापाः = पापफलाः। शशाङ्के = चन्द्रे।

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५
Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

व्याख्या – आचार्यः तामसकीलकादीनां शुभाऽशुभं फलं कथयति यत् यदि तामसकीलकाः सूर्यबिम्बे प्राप्ताः तदा दुष्टफलप्रदाः भवन्ति। यदि चन्द्रमण्डले तामसकीलकाः प्राप्ताः तदा शुभफलप्रदा, भवन्ति। परन्तु तेषां ध्वाङ्क्षकबन्धप्रहरणरूपाः अर्थात् काकसदृशा छिन्नशिर्षाः पुरुषसदृशा, खड्गादिसदृशा वा आकृतिः स्यात् तदा चन्द्रमण्डलेऽपि प्राप्ताः अशुभफलप्रदाः भवन्ति। अपि एते तान सकलकाया शब्दः सम्भावनायाम् अस्ति। चन्द्रमण्डले ये अशुभाः ते सूर्यमण्डले अतीवाऽशुभदा भवन्ति।

४.७.२ सूर्यबिम्बस्थ केत्वादीनां फलम्

यस्मिन् यस्मिन् देशे दर्शनमायान्ति सूर्यबिम्बस्थाः।
तस्मिंस्तस्मिन् व्यसनं महीपतीनां परिज्ञेयम्॥
क्षुत्प्रम्लानशरीरा मुनयोऽप्युत्सृष्टधर्मसच्चरिताः।
निर्मांसबालहस्ताः कृच्छ्रेणायान्ति परदेशम्॥
तस्करविलुप्तवित्ताः प्रदीर्घनिःश्वासमुकुलिताक्षिपुटाः।
सन्तः सन्नशरीराः शोकोद्भववाष्परुद्धदृशः॥
क्षामा जुगुप्समानाः स्वनृपतिपरचक्रपीडिता मनुजाः।
स्वनृपतिचरितं कर्म न पुरा कृतं प्रब्रुवन्त्यन्ये॥
गर्भेष्वपि निष्पन्ना वारिमुचो न प्रभूतवारिमुचः।
सरितो यान्ति तनुत्वं क्वचित्क्वचिज्जायते सस्यम्॥

अन्वयः – यस्मिन् यस्मिन् देशे सूर्यबिम्बस्थाः दर्शनमायान्ति तस्मिन् तस्मिन् महीपतीनां व्यसनं परिज्ञेयम्। मुनयो अपि उत्सृष्टधर्मसहचरिताः क्षुत्प्रम्लानशरीरा निर्मासणात्महस्ताः कृच्छ्रेण परदेशम् आयान्ति। तस्करविलुप्तवित्ताः प्रदीर्घनि .... मनुजाः जुगुप्समानाः। अन्ये प्रवुवन्ति स्वनृपतिचरितं कर्म न पुरा कृतम्। गर्भेष्वपि वारिमुचो निष्पन्ना प्रभूतवारिमुचः सरितो तनुलं याति। सस्यं क्वचित्क्वचिज्जायते।

प्रतिपदार्थः – दर्शनमायान्ति = उपगच्छन्ति। सूर्यबिम्बस्थाः = आदित्यमण्डलगताः। महीपतीनां = भूमिपानाम्। व्यसनम् = दुःखम्। परिज्ञेयम् = ज्ञातव्यम्। क्षुत्प्रम्लानशरीराः = क्षुद्बुभुक्षा तया प्रकर्षेणातिशयेन म्लानानि शरीराणि येषां क्षुत्प्रम्लानशरीराः। मुनयोः = ऋषयोः। उत्सृष्टम् = त्यक्तम्। धर्मचरितम् = धर्मानुकूलं सच्चरित्रं। निर्मांसाः = मांसरहिताः। बालाः = शिशवः। हस्ताः = कराः। कृच्छ्रेण = केशेन। परदेशम् = अन्यदेशम्। तस्करैः = चौरैः। विलुप्तम् = छिन्नम्। वित्तम् = धनम्। श्वासमुकुलिता = श्वसनैर्सङ्कुचिता। अक्षिपुटा = नेत्राच्छादनम्। सन्नशरीराः = सन्नान्यवसादं गतानि शरीराणि येषाम्। शोकोद्भवम् = दुःखेन यदुद्भवम्। वाष्पम् = अश्रुः। रुद्धे = वृते। दृशौ = चक्षुषी। क्षामा = कृशा। जुगुप्समाना = निन्दन्तो मानवाः। स्वनृपतिपरचक्रपीडिताः = आत्मीयेन राज्ञा चान्यराष्ट्रेन उपपत्ताः। स्वनृपतिचरितम् = आत्मीयराज्ञा चरितम्। पुरा = पूर्वम्। कृतम् = कार्यम्। ब्रुवन्ति = कथयन्ति। न प्रभूतम् = न बहु। वारिः = पयः। मुञ्चन्ति = त्यजन्ति। गर्भः = गर्भलक्षणयुक्ता। सरितः = नद्यः। यान्ति = गच्छन्ति। तनुत्वम् = स्वल्पतोयत्वम्। सस्यम् = धान्यादिकम्। क्वचित्क्वचित् = कुत्रचित्। जायते = उत्पद्यते॥

व्याख्या – आचार्यः सूर्यबिम्बस्थकेत्वादीनां फलं कथयति। यस्मिन् यस्मिन् देशे सूर्यमण्डले यदि तामसकीलकादयः दर्शयन्ति तस्मिन् तस्मिन् देशे भूमिपानां दुःखं ज्ञातव्यम्। क्षुधासन्तप्तमुनयोऽपि स्वधर्मान् परित्यज्य, मांसरहिताः दुर्बलबालकान् हस्तेषु नीत्वा अन्यदेशं प्राप्नुवन्ति। सज्जनपुरुषाणां धनं तस्करैः लुण्ठ्यते। दीर्घश्वसनेन सङ्कुचिताः अक्षिपुटाः। शरीराः अवसादगतं भवन्ति। तथा च ते दुःखेन उद्भवम् अश्रुनेत्रं भवन्ति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कृशाः मनुष्याः निन्दापरायणं भवन्ति। यतः आत्मीयेन राज्ञा च अन्यराष्ट्रेण पीडिताः भवन्ति। तात्पर्यं अस्ति यत् जनाः स्वराज्ञा तथा च परकीयराज्ञा सन्तप्ताः भवन्ति। ते जनाः पूर्वं कृतं स्वनृपतिचरितम् अन्यजनान् कथयन्ति। स्वकं पूर्वकालं व्यथितमनसा चिन्त्यन्ति। गर्भयुक्ता अपि मेघाः निष्पन्नाः भवन्ति। अर्थात् वृष्टिप्राप्तसमये न बहुपयः त्यजन्ति। नद्यः जलाभावात् स्वल्पजलयुक्तं भवन्ति। क्वचित् क्वचित् धन-धान्यम् उत्पद्यते अर्थात् दुर्भिक्षः भवति।

४.७.३ केतूनाम् आकृतिवशात् फलम्

दण्डे नरेन्द्रमृत्युर्व्याधिभयं स्यात् कबन्धसंस्थाने।
ध्वाङ्क्षे च तस्करभयं दुर्भिक्षं कीलकेऽर्कस्थे॥

अन्वयः – अर्कस्थे दण्डे नरेन्द्रमृत्युर्व्याधिभयं स्यात् कबन्धसंस्थाने ध्वाङ्क्षे च तस्करभयं कीलके दुर्भिक्षम्।

प्रतिपदार्थः – अर्कस्थे = सूर्यमण्डले। दण्डे = दण्डाकारे चिह्ने। नरेन्द्रस्य = राज्ञः। मृत्युः = मरणम्। कबन्धसंस्थाने = छिन्नशिरसाकारे चिह्ने। ध्वाङ्क्षः = काकसदृशः। तस्करभयम् = चोरभयम्। दुर्भिक्षम् = अन्न अत्यल्पता। कीलके = कीलकाकारे।

व्याख्या – भवान् सूर्यबिम्बस्थकेत्वादीनां फलं पठितवान् ततः केतूनाम् आकृतिवशात् फलं पठिष्यति। आचार्यः कथयति यत् यदि सूर्यमण्डले दण्डाकृतिः स्यात् तदा राज्ञः मरणं भवति। यदि सूर्यमण्डले छिन्नशिरस्पुरुषाकृतिः स्यात् तदा रोगभयं भवति। यदि सूर्यमण्डले काकसदृशाकृतिः स्यात् तदा चौरभयं भवति। यदि सूर्यमण्डले कीलकाकारः केतुः स्यात् तदा असुभिक्षं भवति तात्पर्यं अस्ति यत् यदि सूर्यबिम्बस्य विविधाकृतिवशात् भिन्नं-भिन्नं फलं भवति।

राजोपकरणरूपैश्छत्रध्वजचामरादिभिर्विद्धः।
राजान्यत्वकृदर्कः स्फुलिङ्गधूमादिभिर्जनहाः॥

अन्वयः – अर्कः विद्धः राजोपकरणरूपैश्छत्रध्वजचामरादिभिः राजान्यत्वकृद् स्फुलिङ्गधूमादिभिर्जनहा।

प्रतिपदार्थः – अर्कः = सूर्यः। विद्धः = चिह्नितः अवरुद्धः। राजाः = नृपः। उपकरणम् = यन्त्रम्। रूपम् = आकृतिः। छत्रम् = आतपत्रम्। ध्वजम् = पताका। चामरम् = बालव्यजनम्। राज्ञाऽन्यत्वकृत् = राज्ञोऽन्यत्वं करोति। स्फुलिङ्गैः = अग्निकणैः। जनहा = जनान् हन्ति॥

व्याख्या – आचार्यः केतूनां फलं कथयति यत् सूर्यमण्डलः यदि राज्ञः उपकरणैः अर्थात् आतपत्र-पताका-बालव्यजनैः विद्धः भवति अर्थात् एतादृशीष्वाकृतिषु अयतमा काचित् सूर्यमण्डले दृश्यते तदा राजपरिवर्तनं भवति। यदि सः अग्निधूमादिभिः विद्धः भवति तदा जनानां नाशः भवति॥

एको दुर्भिक्षकरोद्वयाद्याः स्युर्नरपतेर्विनाशाय।
सितरक्तपीतकृष्णैस्तैर्विद्धोऽर्कोऽनुवर्णघ्नः॥

अन्वयः – अर्कः एको विद्धो दुर्भिक्षकरोद्वयाद्याः स्युर्नरपतेर्विनाशाय सितरक्तपीतकृष्णैस्तेः अनुवर्णघ्नः॥

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५
Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रतिपदार्थः – अर्कः = सूर्यः। विद्धः = चिह्नितः अवरुद्धः। दुर्भिक्षम् = अन्नस्य अत्यल्पता। स्युः = भवेयुः। नरपतेः = राज्ञः। विनाशाय = विनाशकारकाय। सितैः = श्वेतवर्णैः। रक्तैः = लालवर्णैः। पीतैः = पीतवर्णैः। कृष्णैः = कृष्णवर्णैः। अनु = क्रमेण। वर्णान् = द्विजादीन्।।

व्याख्या – आचार्यः अन्यकेतूनां फलं कथयति यत् उपर्युक्तकथनानुसारं यदि सूर्यः एकेन विद्धः स्यात् तदा असुभिक्षं भवति। द्व्यादिकेन यदि विद्धः स्यात् तदा राज्ञः विनाशाय भवेत्। यदि सूर्यः क्रमशः शुक्ल-रक्त-पीत-कृष्णवर्णैः विद्धः स्यात् तदा क्रमेण ब्राह्मण-क्षत्रिय-वैश्य-शूद्रान् घातयति। यदि रक्तवर्णैः विद्धः स्यात् तदा क्षत्रियान् घातयति। यदि पीतवर्णैः विद्धः स्यात् तदा वैश्यान् घातयति। यदि कृष्णवर्णैः विद्धः स्यात् तदा शूद्रान् घातयति।।

४.७.४ केतूनां विशेषफलकथनम्

दृश्यन्ते च यतस्ते रविबिम्बस्यसोत्थिता महोत्पाताः।
आगच्छति लोकानां तेनैव भयं प्रदेशेन।।

अन्वयः – ते महोत्पाता रविबिम्बस्योत्थिता दृश्यन्ते च यतः तेनैव प्रदेशेन लोकानां भयम् आगच्छति।।

प्रतिपदार्थः – ते महोत्पाताः = ध्वाङ्क्षप्रभृतयः उत्पाताः। रविबिम्बस्योत्थिता = सूर्यमण्डले उत्पन्ना। लोकानाम् = जनानाम्। भयमागच्छति = भयमायाति।।

व्याख्या – आचार्यः केतूनां विशेषफलं कथयति यत् ते ध्वाङ्क्षप्रभृतयः महोत्पाताः सूर्यमण्डले यस्यां दिशि दृश्यन्ते, तस्यां दिशि अर्थात् यदि पूर्वस्यां दिशि दृश्यन्ते तदा पूर्वदिशः जनस्य नाशं भवति। यदि पश्चिमदिशि दृश्यन्ते तदा पश्चिमदिशि जनस्य नाशं भवति। यदि उत्तरदिशि दृश्यन्ते तदा उत्तरदिशि जनस्य नाशं करोति। यदि दक्षिणदिशि दृश्यन्ते तदा दक्षिणदिक्स्थस्य जनस्य नाशं करोति।।

४.७.५ उत्पातानां निष्फलत्वम्

न पृथक् फलानि तेषां शिखिकीलकराहुदर्शनानि यदि।
तदुभयकारणमेषां केत्वादीनां फलं ब्रूयात्।।

अन्वयः – तेषां शिखिकीलकराहुदर्शनानि यदि फलानि पृथक् न एषां केत्वादीनां तदुदयकारणं फलं ब्रूयात्।।

प्रतिपदार्थः – तेषाम् = अम्भकलुषादीनामुत्पातानाम्। शिखि = केतु। कीलक = कीलकसंज्ञः। तामसः = तामससंज्ञा। राहुः = स्वर्भानुः। सूर्यचन्द्रयोरन्यतरस्य ग्रहणं भवतीति अर्थः।।

व्याख्या – सूर्यबिम्बे तामस-कीलकादीनां दर्शनेन ये उत्पाताः जायमानाः भवन्ति ते उपशामिताः भवन्ति यदि तामसकीलकादीनां दर्शनात् सप्ताहाभ्यन्तरे राहोः कैतोर्वा दर्शनं भवेत् अर्थात् रविचन्द्रयोरन्यतरस्य ग्रहणं सम्भवत्।

बोधप्रश्नाः

६. तामसकीलकादीनां उदये वृक्षाणां .... मर्दयन्ति।

७. यदि चन्द्रमण्डले तामसकीलकाः प्राप्ताः तदा .... भवति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

८. तस्करस्य कोऽर्थः?

९. क्वचित् क्वचित् .... उत्पद्यन्ते।

१०. सूर्यमण्डले दण्डाकृतिः स्यात् तदा राज्ञः .... भवति।

४.८ सूर्यरश्मिवशात् शुभाशुभफलम्

ऊर्ध्वकरो दिवसकरस्ताम्रसेनापतिं विनाशयति
पीतो नरेन्द्रपुत्रं श्वेतस्तु पुरोहितं हन्ति।
चित्रोऽथवापि धूम्रो रविरश्मिर्व्याकुलं करोत्यूर्द्धम्
तस्करशस्त्रनिपातैर्यदि सलिलं नाशु पातयति॥

अन्वयः – ऊर्ध्वकरो दिवसकरस्ताम्रः सेनापतिं विनाशयति पीतो नरेन्द्रपुत्रं श्वेतस्तु पुरोहितं हन्ति चित्रोऽथवापि धूम्रो रविरश्मिः तस्करशस्त्रनिपातैर्व्याकुलं करोत्यूर्द्धम् यदि सलिलं नाशु पातयति॥

प्रतिपदार्थः – ऊर्ध्वकरः = ऊर्ध्वरश्मिर्यदा दृश्यते। दिवसकरः = सूर्यः। ताम्रः = ताम्रवर्णः। सेनापतिम् = सेनानायकम्। विनाशयति = घातयति। पीतः = पीतवर्णः। नरेन्द्रपुत्रम् = राजपुत्रम्। श्वेतः = धवलवर्णः। पुरोहितम् = राजपण्डित। हन्ति = मारयति। चित्रः = नानावर्णः। धूम्रः = धूम्रवर्णः। रविरश्मिः = सूर्यकिरणः। व्याकुलम् = सन्तप्तम्। तस्करशस्त्रनिपातैः = चौराः आयुधं तैः तस्करशस्त्रनिपातैः। सलिलम् = जलम्। पातयति = वर्षति।

व्याख्या – भवान् उत्पातानां निष्फलत्वम् पठितवान्। ततः भवान् सूर्यरश्मिवशात् शुभाशुभफलं पठिष्यति। आचार्यः कथयति यत् सूर्यस्य ऊर्ध्वरश्मिर्यदा दृश्यते। अधोभागे तस्य रश्मिः न दृश्यते। ऊर्ध्वरश्मिर्यदा ताम्रवर्णः दृश्यते तदा सेनानायकं घातयति। ऊर्ध्वरश्मिर्यदा पीतवर्णः दृश्यते तदा राजपुत्रम् मारयति। ऊर्ध्वरश्मिर्यदा धवलवर्णः दृश्यते तदा राजपण्डितं मारयति। ऊर्ध्वरश्मिर्यदा विविधवर्णयुक्तः दृश्यते तथा च धूम्रवर्णः दृश्यते तदा चौरेण शस्त्रघातेन वा जनान् सन्तप्तयति। यदि शीघ्रं जलं न वर्षति तदैवम्। यदि शीघ्रं जलं वर्षति तदा कल्याणं भवति, उपर्युक्तोत्पाता न उत्पद्यन्ते॥

४.९ ऋतुवशात् सूर्यस्य फलम्

भवान् सूर्यरश्मिवशात् शुभाशुभफलं पठितवान्। ततः ऋतुवशात् सूर्यस्य फलं पठिष्यति। भवान् जानाति यत् षड् ऋतवः भवन्ति। षट्सु ऋतुषु सूर्यस्य भिन्नं-भिन्नं शुभाशुभं फलं भवति। अतः भवान् अग्रे पठिष्यति।

४.९.१ ऋतुषु सूर्यवर्णवशात् फलम्

ताम्रः कपिलो वार्कः शिशिरे हरिकुङ्कुमच्छविश्च मधौ।
आपाण्डुकनकवर्णो ग्रीष्मे वर्षासु शुक्लश्च॥
शरदि कमलोदराभो हेमन्ते रुधिरसन्निभः शस्तः।
प्रावृट्काले स्निग्धः सर्वर्त्तुनिभोऽपि शुभदायी॥

अन्वयः – अर्कः ताम्रः कपिलो वा शिशिरे हरिकुङ्कुमच्छविश्च मधौ आपाण्डुकनकवर्णो ग्रीष्मे शुक्लश्च वर्षासु शरदि कमलोदराभो हेमन्ते रुधिरसन्निभः शस्तः प्रावृट्काले स्निग्धः सर्वर्त्तुनिभोऽपि शुभदायी॥

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रतिपदार्थः – अर्कः = सूर्यः। ताम्र = ताम्रवर्णः। कपिलः = ईषत्पीतवर्णः। शिशिरे = माघफाल्गुनयोर्यदि सूर्यः स्यात् तदा शिशिरः। हरिः = हरित्वर्णः शुकवर्णश्च। कुङ्कुमः = पीतरक्तयोः मिश्रितः। मधौ = वसन्त-ऋतुः। पाण्डुः = श्वेतपीतमिश्रितः वर्णः। कनकम् = सुवर्णसदृशवर्णम्। ग्रीष्मे = ज्येष्ठाऽऽषाढयोः यदि सूर्यः स्यात् तदा ग्रीष्म-ऋतुः। वर्षासु = वर्षाकाले श्रावणभाद्रयोः। शुक्लः = श्वेतवर्णः। शरदि = आश्विनकार्त्तिकमासयोः। कमलोदराभः = कमलं पद्मं तस्योदरमभ्यन्तरं तत्सदृशा कान्तिर्यस्य स कमलोदराभः। हेमन्ते = मार्गशीर्षपौषमासयोः। रुधिरवर्णः = रक्तवर्णः। शस्तः = शुभप्रदः। प्रावृट्काले = वर्षासमये। स्निग्धो = विमलो। सर्वर्त्तुनिभः = सर्वेषां ऋतूनां सदृशः। शुभदायी = शुभप्रदो॥

व्याख्या – वराहमिहिराचार्यः ऋतुषु सूर्यवर्णवशात् शुभफलं कथयति। यत् यदि माघफाल्गुनयोः सूर्यः स्यात् तदा शिशिर-ऋतुः भवति। तस्मिन् समये सूर्यस्य वर्णः ताम्रवर्णः कपिलवर्णः वा स्यात् तदो शुभफलप्रदः भवति। वसन्त-ऋतुसमये अर्थात् चैत्रवैशाखयोः यदि सूर्यः हरितवर्णः वा पीतरक्तमिश्रितः स्यात् तदा शुभफलप्रदः भवति। ज्येष्ठाऽऽषाढयोः ग्रीष्म-ऋतुः भवति। तस्मिन् समये यदि सूर्यस्य वर्णः पाण्डुवर्णः अर्थात् श्वेतपीतमिश्रितः वा सुवर्णसदृशवर्णः स्यात् तदा शुभफलप्रदः भवति। श्रवणभाद्रपदयोः वर्षा-ऋतुः भवति। तस्मिन् समये यदि सूर्यस्य वर्णः श्वेतवर्णः स्यात् तदा शुभफलप्रदः भवति। आश्विनकार्त्तिकयोः शरदृतुः भवति, तस्मिन् समये यदि सूर्यस्य वर्णः कमलोदराभः अर्थात् पद्मं तस्य अन्तः यः वर्णः तत् सदृशा कान्तिर्यस्य स कमलोदराभवर्णः भवति। स शुभफलप्रदः भवति। मार्गशीर्षपौषयोः हेमन्त-ऋतुः भवति तस्मिन् समये यदि सूर्यस्य वर्णः रक्तवर्णः स्यात् तदा शुभफलप्रदः भवति। वर्षा-ऋतुसमये स्वच्छवर्णः तथा च सर्वऋतुषु कथितवर्णः स्यात् तदा शुभफलप्रदः भवति। समाससंहितायाम् अस्ति यत्–

ताम्रघृतकनकमुक्ताकमलासृक्सन्निभः शुभः सविता।
शिशिरादिषु षट्सु ऋतुषु प्रवृषि सर्वर्त्तुसन्निभः स्निग्धः॥

४.९.२ सूर्यवर्णवशात् ब्राह्मणादिभ्यः फलम्

रुक्षः श्वेतो विप्रान् रक्ताभः क्षत्रियान् विनाशयति।
पीतो वैश्यान् कृष्णस्ततोऽपरान् शुभकरः स्निग्धः॥

अन्वयः – रुक्षः श्वेतो विप्रान् रक्ताभः क्षत्रियान् पीतो वैश्यान् कृष्णस्ततो विनाशयति अपरान् स्निग्धः शुभकरः॥

प्रतिपदार्थः – रुक्षः = स्निग्धरहितः। श्वेतः = शुक्लवर्णः। विप्रान् = ब्राह्मणान्। रक्ताभः = रुधिरवर्णः (रक्तवर्णः)। अपरान् = शूद्रान्। शुभकरः = शुभफलप्रदः। स्निग्धः = हिन्दीभाषायां चमक इत्यनेन युक्तः॥

व्याख्या – आचार्यः सूर्यवर्णवशात् ब्राह्मणादिभ्यः फलं कथयति यत् यदि सूर्यस्य बिम्बः रुक्ष (हिन्दीभाषायां रूखा)-श्वेतवर्णसदृशः स्यात् तदा ब्राह्मणान् विनाशयति। यदि सूर्यस्य बिम्बः रुक्षरक्तवर्णसदृशः स्यात् तदा क्षत्रियान् विनाशयति। यदि सूर्यस्य वर्णः रुक्षपीतवर्णसदृशः स्यात् तदा वैश्यान् विनाशयति। यदि सूर्यस्य बिम्बः रुक्षकृष्णवर्णसदृशः स्यात् तदा शूद्रान् विनाशयति। परन्तु यदि सूर्यस्य बिम्बः स्निग्धः अर्थात् कान्तियुक्तः श्वेतवर्णसदृशः स्यात् तदा शुभफलप्रदः भवति। यदि सूर्यस्य बिम्बः स्निग्धरक्तसदृशः स्यात् तदा क्षत्रियेभ्यः शुभफलप्रदः भवति। यदि सूर्यस्य बिम्बः स्निग्धपीतवर्णयुक्तः स्यात् तदा वैश्येभ्यः शुभफलप्रदः भवति। यदि सूर्यस्य बिम्बः स्निग्धकृष्णवर्णसदृशः स्यात् तदा शूद्रेभ्यः शुभफलप्रदः भवति॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

४.९.३ सूर्यवर्णवशात् अशुभफलम्

ग्रीष्मे रक्तो भयकृद्वर्षास्वसितः करोत्यनावृष्टिम्।
हेमन्ते पीतोऽर्कः करोति न चिरेण रोगभयम्॥

अन्वयः – अर्कः ग्रीष्मे रक्तो भयकृद्वर्षास्वसितः करोत्यनावृष्टिम् हेमन्ते पीतोऽर्कः करोति न चिरेण रोगभयम्॥

प्रतिपदार्थः – अर्कः = सूर्यः। ग्रीष्मे = ग्रीष्म–ऋतौ। रक्तः = लोहितवर्णः (रक्तवर्णः)। भयकृद् = भयं करोति। वर्षासु = वर्षा–ऋतुः। असितः = कृष्णवर्णः। अनावृष्टिम् = वृष्ट्याभावम्। हेमन्ते = हेमन्त–ऋतौ। पीतः = पीतवर्णः। चिरेण = शीघ्रेण॥

व्याख्या – आचार्यः सूर्यवर्णवशात् अशुभफलं कथयति यत् यदि सूर्यस्य बिम्बः ग्रीष्म–ऋतुकाले रक्तवर्णः स्यात् तदा भयं करोति। यदि सूर्यस्य बिम्बः वर्षा–ऋतुकाले कृष्णवर्णः स्यात् तदा वृष्ट्याभावं करोति। यदि सूर्यस्य बिम्बः हेमन्त–ऋतुकाले पीतवर्णः स्यात् तदा शीघ्रमेव रोगभयं करोति॥

४.९.४ ऋतौ सूर्यवर्णवशात् अन्यत् फलम्

सुरचापपाटितनुर्नृपतिविरोधप्रदः सहस्रांशुः।
प्रावृट्काले सद्यः करोति विमलद्युतिर्वृष्टिम्॥
वर्षाकाले वृष्टिं करोति सद्यः शिरीषपुष्पाभः।
शिखिपत्रनिभः सलिलं न करोति द्वादशाब्दानि॥

अन्वयः – सहस्रांशुः सुरचापपाटिततनुर्नृपतिविरोधप्रदः प्रावृट्काले विमलद्युतिः सद्यः वृष्टिं करोति, वर्षाकाले शिरीषपुष्पाभः सद्यः वृष्टिं करोति शिखिपत्रनिभः द्वादशाब्दानि सलिलं न करोति॥

प्रतिपदार्थः – सहस्रांशुः = सूर्यः। सुरचापपाटिततनुः = इन्द्रधनुषस्तत्तुल्येन चिह्नेन खण्डिता मूर्तिर्यस्य स सुरचापपाटिततनुः। नृपतिः = राजा। विरोधप्रदः = वैरप्रदः। प्रावृट्काले = वर्षाकाले। विमलद्युतिः = निर्मलकान्तिः। सद्यः = शीघ्रः। वृष्टिम् = वर्षा। शिरीषपुष्पाभः = शिरीषपुष्पकान्तिसदृशः, नीलपीत इति। शिखि = मयूरः। पत्रम् = पुच्छः। निभः = सदृशः॥

व्याख्या – आचार्यः ऋतुविशेषे सूर्यवर्णवशात् पृथक्–पृथक् फलं कथयति यत् सूर्यस्य बिम्बः यदि सुरचापेन (इन्द्रधनुषसदृशेन) खण्डितः स्यात् तदा राज्ञः विरोधप्रदः भवति। वर्षाकाले (वर्षाऋतौ) यदि सूर्यस्य बिम्बः निर्मलकान्तिसदृशः स्यात् तदा तस्मिनेव दिने वर्षां करोति। वर्षाकाले अर्थात् वर्षा–ऋतुसमये यदि सूर्यस्य बिम्बः शिरीषपुष्पकान्तिसदृशः (नीलपीतमिश्रितसदृशः) स्यात् तदा शीघ्रमेव वर्षां करोति। यदि सूर्यस्य बिम्बः मयूरपक्षसदृशः स्यात् तदा द्वादशवर्षाणि यावत् जलं न करोति॥

बोधप्रश्नाः

११. ऊर्ध्वरश्मिर्यदा ताम्रवर्णः दृश्यते तदा ....।

१२. यदि शीघ्रं जलं वर्षति तदा अम्भः कलुषादि उत्पाताः भवन्ति वा न वा?

१३. ऋतुसंख्यां लिखत।

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

१४. शिशिर-ऋतुः कयोः मासयोः भवति?

१५. यदि सूर्यवर्णः श्वेतः स्यात् तदा .... भवति।

१६. यदि सूर्यबिम्बः रुक्षश्वेतः स्यात् तदा .... विनाशयति।

१७. यदि सूर्यबिम्बः ग्रीष्मऋतुकाले रक्तवर्णः तदा किं करोति?

४.१० सूर्यबिम्बवशात् शुभाशुभफलम्

भवान् ऋतुषु सूर्यवर्णवशात् फलं तथा च सूर्यवर्णवशात् ब्राह्मणादिभ्यः फलम् पठितवान्। सम्प्रति भवान् सूर्यबिम्बवशात् शुभाशुभं फलं पठिष्यति।

श्यामेऽर्के कीटभयं भस्मनिभे भयमुशन्ति परचक्रातः।
यस्यर्क्षे सच्छिद्रस्तस्य विनाशः क्षितीशस्य॥

अन्वयः – अर्के श्यामे कीटभयं भस्मनिभे परचक्रातः भयमुशन्ति यस्यर्क्षे सच्छिद्रस्तस्य विनाशः क्षितीशस्य।।

प्रतिपदार्थः – अर्के = सूर्ये। श्यामे = कृष्णवर्णे। कीटभयम् = कृमिभीतिः। भस्मनिभे = भस्मवर्णसदृशकान्त्याम्। परचक्रात् = अन्यनृपात्। भयमुशन्ति = भीतिं प्राप्नुवन्ति। यस्यर्क्षे = यस्मिन् नक्षत्रे। सच्छिद्रः = छिद्रेण सहितः (सूर्यबिम्बः)। क्षितीशस्य = राज्ञः। विनाशः = मृत्युः।।

व्याख्या – आचार्यः सूर्यबिम्बवशात् अशुभफलं कथयति। यत् सूर्यमण्डलः यदि कृष्णवर्णसदृशः स्यात् तदा जनान् कृमिभीतिः भवति। सूर्यबिम्बः यदि भस्मसदृशः कान्तियुक्तः स्यात् तदा अन्यनृपात् भयं भवति। यस्मिन् नक्षत्रे सूर्यमण्डलः छिद्रयुक्तः दृश्यते तदा तस्मिन् नक्षत्रे राज्ञः मृत्युः भवति।।

शशरुधिरनिभे भानौ नभस्तलस्थे भवन्ति सङ्ग्रामाः।
शशिसदृशे नृपतिवधः क्षिप्रं चान्यो नृपो भवति॥

अन्वयः – नभस्तलस्थे भानौ शशरुधिरनिभे सङ्ग्रामाः भवन्ति। शशिसदृशे नृपतिवधः क्षिप्रं चान्यो नृपो भवति।।

प्रतिपदार्थः – नभस्तलस्थे = मध्याह्नकाले। भानुः = सूर्यः। शशः = हिन्दीभाषायां खरगोशः इति। रुधिरनिभे = रक्तसदृशे। सङ्ग्रामाः = युद्धाः। शशिसदृशे = चन्द्रवर्णसदृशे। नृपति = राज्ञः। वधः = मरणम्। क्षिप्रम् = शीघ्रम्।।

व्याख्या – आचार्यः सूर्यबिम्ववशात् फलं कथयति यत् यदि सूर्यमण्डलः मध्याह्ने शशरक्तसदृशवर्णः अर्थात् अतिरक्तवर्णः स्यात् तदा युद्धानि भवन्ति। यदि सूर्यमण्डलः चन्द्रसदृशः वर्णः स्यात् तदा राज्ञः मरणं भवति, शीघ्रं अन्यो राजा भवति। यथा गर्गः–

शशलोहितवर्णाभौ यदा भवति भास्करः।
तदा भवन्ति सङ्ग्रामा घोरा रुधिरकर्दमा॥
क्षुन्मारकृद्घटनिभः खण्डो जनहा विदीधितिर्भयदः।
तोरणरूपः पुरहा छत्रनिभो देशनाशाय॥

अन्वयः – घटनिभः क्षुन्मारकृद् खण्डो जनहा विदीधितिर्भयदः तोरणरूपः पुरहा छत्रनिभो देशनाशाय।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रतिपदार्थः – घटनिभः = घटाकारः सूर्यः। क्षुन्मारकृत् = दुर्भिक्षं नरकं च करोति। खण्डः = खण्डितः। जनहा = जनान् घातयति। विदीधितिः = दीधितः रश्मिः विगतः रश्मिः यस्मात् सः विदीधितिः। भयदः = भयदायकः। तोरणरूपः = तोरणाकारः (पताका)। पुरहा = नगरं हन्ति। छत्रनिभः = आतपत्रसदृशः। देशस्य = जनपदस्य। नाशाय = विघाताय।।

व्याख्या – आचार्यः सूर्यबिम्बवशात् फलं कथयति यत् यदि सूर्यबिम्बः कुम्भाकारः स्यात् तदा दुर्भिक्षं नरकं करोति। यदि सूर्यबिम्बः खण्डाकारः दृश्यते तदा जनान् घातयति। यदि सूर्यबिम्बः रश्मिविहीनः स्यात् तदा भीतिं ददाति। यदि सूर्यबिम्बः ध्वजाकारः दृश्यति तदा नगरान् नाशयति। यदि सूर्यबिम्बः छत्राकारः स्यात् तदा देशान् नाशयति।।

ध्वजचापनिभे युद्धानि भास्करे वेपने च रुक्षे च।
कृष्णा रेखा सवितरि यदि हन्ति ततो नृपं सचिवः।।

अन्वयः – भास्करे ध्वजचापनिभे वेपने च रुक्षे च युद्धानि सवितरि कृष्णा रेखा यदि ततो नृपं सचिवः हन्ति।।

प्रतिपदार्थः – भास्करे = सूर्ये। ध्वजः = पताका। चापम् = धनुः। निभः = आकृतिः। वेपने = कम्पमाने। रुक्षे = अस्निग्धे। युद्धानि = सङ्ग्रामाः। सवितरि = सूर्ये। कृष्णरेखा = कृष्णवर्णसदृशरेखा। नृपम् = राजानम्। सचिवः = मन्त्री। हन्ति = घातयति।।

व्याख्या – आचार्यः सूर्यबिम्बवशात् शुभाशुभफलकथनप्रसङ्गे कथयति यत् यदि सूर्यबिम्बः ध्वजाकारः वा धनुषाकारः, कम्पनयुक्तः वा अस्निग्धयुक्तः स्यात् तदा सङ्ग्रामो भवति। यदि सूर्यमण्डलः कृष्णवर्णरेखया विद्धः स्यात् तदा राजानं मन्त्रिणमुभौ अथवा उभयोरन्यतरं मन्त्री घातयति।।

दिनकरमुदयास्तसंस्थितमुल्काशनिविद्युतो यदा हन्युः।
नरपतिमरणं विन्द्यात्तदाऽन्यराजप्रतिष्ठा च।।

अन्वयः – दिनकरमुदयास्तसंस्थितमुल्काशनिविद्युतो यदा हन्युः तदा नरपतिमरणं अन्यराजप्रतिष्ठा च विन्द्यात्।।

प्रतिपदार्थः – दिनकरम् = सूर्यम्। उदयास्तसंस्थितम् = उदयकालिकम् अस्तकालिकं वा। अशनिः = वज्रः। हन्युः = ताडयेयुः वेधयेयुः। नरपतिमरणम् = राज्ञः मृत्युः। अन्यराजप्रतिष्ठा = अन्यस्य राज्ञः पदे स्थापना (नियुक्तिः)। विन्द्याद् = विजानीयात्।।

व्याख्या – आचार्यः सूर्यस्य उदयास्तसमयोः फलं कथयति यत् यदि सूर्यबिम्बः उदयकाले वा अस्तकाले उल्कया वज्रेन विद्युतेन वा विद्धः स्यात् अर्थात् सूर्यबिम्बे एतेष्वन्यतमः दृश्यते तदा तस्मिन् काले राज्ञः मृत्युं विजानीयात् तथा द्वितीयस्य राज्ञः तत्क्षणमेव राजपदे नियुक्तिः भवति।।

प्रतिदिवसमहिमकिरणः परिवेषी सन्ध्ययोर्द्वयोरथवा।
रक्तोऽस्तमेति रक्तोदितश्च भूपं करोत्यन्यम्।।

अन्वयः – अहिमकिरणः प्रतिदिवसं परिवेषी सन्ध्ययोर्द्वयोरथवा रक्तोऽस्तमेति रक्तोदितश्च भूपं करोत्यन्यम्।।

प्रतिपदार्थः – अहिमकिरणः = उष्णरश्मिः सूर्यः। प्रतिदिवसम् = दिवसं दिवसं प्रति प्रतिदिवसम्। परिवेषी = मण्डलवान्। सन्ध्ययोः द्वयोः = द्वयोः उदयास्तकालयोः। रक्तोऽस्तमेति = अस्तसमये रक्तवर्णः। रक्तोदितः = उदयसमये रुधिरवर्णः। भूपम् = राजानम्। अन्यं = द्वितीयं, करोति।।

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

व्याख्या – आचार्यः उदयास्तसमये सूर्यबिम्बस्य फलं कथयति यत् उष्णरश्मिः सूर्यः प्रतिदिनं मण्डलवान् भवति। अथवा सन्ध्याकाले अर्थात् उदयकाले अस्तकाले च मण्डलवान् भवति। अथवा रक्तवर्णयुक्तः अस्तं रक्तवर्णयुतश्च उदेति यादृश एव रक्तवर्णस्तादृश एव सकलदिनं भूत्वा रक्तवर्ण एवास्तमेति। प्रतिदिवसं सर्वत्र सम्बध्यते तदा प्रकारत्रये अपरं राजानं करोति।।

प्रहरणसदृशैर्जलदैः स्थगितः सन्ध्याद्वयेऽपि रणकारी।
मृगमहिषविहगखरकरभसदृशरूपैश्च भयदायी।।

अन्वयः – सन्ध्याद्वयेऽपि प्रहरणसदृशैर्जलदैः स्थगितः रणकारी मृगमहिषविहगखरकर-भसृदशरूपैश्च भयदायी।।

प्रतिपदार्थः – सन्ध्याद्वयेऽपि = उदयकाले अस्तकालेऽपि। प्रहरणम् = आयुधं खड्गादि। सदृशैः = आकृतीभिः। जलदैः = मेघैः। स्थगितः = आच्छादितः। रणकारी = सङ्ग्रामकृद् भवति। मृगः = हरिणः। महिषः = हिन्दीभाषायां भैंस इति। विहगः = पक्षी। खरः = गर्दभः (गदहा)। करभः = उष्ट्रः (ऊंट)। भयदायी = भीतिं ददाति।।

व्याख्या – आचार्यः सन्ध्यासमये सूर्यस्य शुभाशुभफलं कथयति यत् सन्ध्याद्वये अर्थात् उदयकालिकसूर्ये अस्तकालिकसूर्ये च सूर्यबिम्बम् आयुधसदृशैः मेघैः यदि आच्छादितः स्यात् तदा सङ्ग्रामकारी भवति अर्थात् युद्धस्य सम्भावना भवति। यदि सूर्यबिम्बः हरिण-महिष-पक्षी-गर्दभ-उष्ट्रतुल्याकारैः मेघैः सन्ध्याद्वये (प्रातः सायंश्च) आच्छादितो भवति तदा भयं ददाति।।

रुधिरनिभो वियत्यवनिपान्तकरो न चिरात्।
परुषरजोऽरुणीकृततनुर्यदि वा दिनकृत्।।
असितविचित्रनीलपरुषो जनघातकरः।
खगमृगीभैरवस्वररुतैश्च निशाद्युमुखे।।

अन्वयः – दिनकृत् वियति रुधिरनिभो न चिरात् अवनिपान्तकरो परुषरजोऽरुणी-कृततनुर्यदि वा असितविचत्रनीलपरुषो जनघातकरः खगमृगभैरवस्वररुतैश्च निशाद्युमुखे।।

प्रतिपदार्थः – दिनकृत् = सूर्यः। वियति = आकाशे। रुधिरनिभो = रक्तवर्ण यदा दृश्यते। न चिरात् = शीघ्रमेव। अवनिपस्य = राज्ञः। अन्तकरः = मृत्युकृद् भवति। परुषेण = रुक्षेण। रजसा = धूलिकणैः। अरुणीकृत = रक्तवर्णयुक्तः। तनुः = मूर्तिः। असितः = कृष्णः। विचित्रः = नानावर्णः। नीलः = नीलवर्णः। पुरुषः = रुक्षः। जनघातकरः = लोकानां घातं करोति। खगाः = पक्षिणः। मृगाः = हरिणाः। भैरवः = भीषणः भयोत्पादकः। स्वराः = शब्दाः। निशामुखे = अस्तमये। द्युमुखे = उदये।।

व्याख्या – ततः अग्रे आचार्यः सूर्यस्य शुभाशुभफलं कथयति यत् यदि सूर्यः आकाशे रक्तवर्णसदृशः अथवा रुक्षधूलिकणवशात् रक्तवर्णः स्यात् तदा राज्ञः शीघ्रमेव मृत्युः भवति। यदि सूर्यबिम्बः आकाशे कृष्णवर्णसदृशः दृश्यते नानावर्णसदृशः दृश्यते अथवा नीलवर्णसदृशः दृश्यते तदा लोकानां घातं करोति। यदि प्रातःकाले वा सायंकाले पक्षिणैः हरिणैः च भीषणशब्दाः स्यात् तदा जनानां घातं करोति।।

अमलवपुरवक्रमण्डलः स्फुटविपुलामलदीर्घदीधितिः।
अविकृततनुवर्णचिह्नभृज्जगति करोति शिवं दिवाकरः।।

अन्वयः – दिवाकरः अमलवपुरवक्रमण्डलः स्फुटविपुलोमलदीर्घदीधितिः अविकृततनु-वर्णचिह्नभृज्जगति शिवं करोति।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रतिपदार्थः – दिवाकरः = सूर्यः। अमला = निर्मलाः। अवक्रमण्डलः = स्पष्टबिम्बः। स्फुटः = स्पष्टः। विपुला = विस्तीर्णाः। अमला = निर्मलाः। दीर्घा = आयामिनः रश्मयः यस्य। अविकृता = निर्विकारा। तनुः = मूर्तिः। वर्णः = कान्तिः।।

व्याख्या – आचार्यः सूर्यबिम्बवशात् शुभफलं कथयति यत् यदि सूर्यबिम्बः निर्मलः स्यात् तदा जगति जनानां कल्याणं करोति। यदि सूर्यबिम्बः स्पष्टबिम्बः स्यात् तदा कल्याणं करोति। अर्थात् आचार्यस्य तात्पर्यम् अस्ति यत् सूर्यमण्डलः स्वच्छः स्यात् तदा जनानां कल्याणं करोति।।

४.११ प्रतिसूर्यस्य फलम्

दिवसकृतः प्रतिसूर्य्यो जलकृदुदग्दक्षिणे स्थितोऽनिलकृत्।
उभयस्थः सलिलभयं नृपमुपरि निहन्त्यधो जनहा।।

अन्वयः – दिवसकृतः प्रतिसूर्य्यो उदग् स्थितो जलकृत् दक्षिणे अनिलकृत् उभयस्थः सलिलभयं उपरि नृपं निहन्ति अधो जनहा।।

प्रतिपदार्थः – दिवसकृत् प्रतिसूर्य्यो = दिनप्रहरैकं यावत् आकाशे कश्चित् पिण्डः सूर्यसमीपे यदा भवति तदा सूर्यरश्मिवशात् तत्र द्वितीयसूर्य इव दृश्यते स एव प्रतिसूर्य इति नाम्ना उच्यते। उदग् = उत्तरदिग्। स्थितः = अवस्थितः। जलकृत् = पानीयं करोति अर्थात् वृष्टिः भवति। दक्षिणे दक्षिणदिशि। अनिलकृत् = वातकरः भवति। उभयस्थः = उत्तरदक्षिणभागद्वयोरपि स्थितः। सलिलभयम् = जलभयम्। उपरि = उपरि स्थितः। नृपम् = राजानम्। निहन्ति = घातयति। अधः = अधः स्थितः। जनहा = जनान् हन्ति।।

व्याख्या – भवान् सूर्यबिम्बवशात् शुभाशुभं फलं पठितवान्। ततः भवान् प्रतिसूर्यस्य बिम्बवशात् शुभाशुभफलं पठिष्यति। आचार्यः कथयति यत् यदि प्रतिसूर्यः अर्थात् बिम्बप्रतिबिम्बभावात् दिनप्रहरैकं यावत् मेघः सूर्यसमीपे यदा भवति तदा सूर्यरश्मिवशात् तत्र द्वितीयः सूर्य इव दृश्यते स प्रतिसूर्यः भवति। एवम् अस्तमयेऽपि सम्भवति। अतः सूर्यस्य उत्तरभागे प्रतिसूर्यः दृश्यते तदा जलं करोति अर्थात् वृष्टिः भवति। सूर्यस्य दक्षिणभागे प्रतिसूर्यः दृश्यते तदा वातकरो भवति अर्थात् वायुर्वहति परन्तु जलं न भवति। सूर्यस्य उत्तरदक्षिणभागयोर्द्वयोरपि प्रतिसूर्यः दृश्यते तदा राजानं घातयति। सूर्यस्य अधः प्रतिसूर्यः दृश्यते तदा जनान् हन्ति।।

४.१२ सूर्याक्रान्तनक्षत्रस्य सन्तापशोधनम्

दिनकरकराभितापादृक्षमवाप्नोति सुमहतीं पीडाम्।
भवति तु पश्चाच्छुद्धिं कनकमिव हुताशपरितापात्।।

अन्वयः – ऋक्षं दिनकरकराभितापात् सुमहतीं पीडाम् प्राप्नोति पश्चात् हुताशपरितापात् तु कनकमिव शुद्धिः भवति।।

प्रतिपदार्थः

ऋक्षम् = नक्षत्रम्। दिनकरः = सूर्यः। कराभितापात् = रश्मिसन्तापात्। सुमहतीम् = अत्यधिकाम्। पीडाम् = कष्टम्। प्राप्नोति = अवाप्नोति। पश्चात् = अनन्तरम्। हुताशनः = अग्निः। परितापात् = सन्तापात्। शुद्धम् = निर्दोषम्। कनकमिव = सुवर्णमिव।

व्याख्या – आचार्यः सूर्याक्रान्तनक्षत्रस्य सन्तापशोधनं कथं भवति इति निरूपयति।

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तस्य वर्णनं करोति। यस्मिन् नक्षत्रे सूर्यः स्थितः तद् नक्षत्रं सूर्यरश्मिसन्तापात् अत्यधिकं कष्टं अवाप्नोति। तदेव नक्षत्रं अनन्तरं (सूर्यमुक्तो भूत्वा) निर्दुष्टं भवति। यथा सुवर्णम् अग्निसन्तापेन निर्मलं भवति।।

बोधप्रश्नाः

१८. सूर्यमण्डलः यदि छिद्रयुक्तः दृश्यते तदा राज्ञः .... भवति।

१९. सूर्यबिम्बः यदि कुम्भाकारः स्यात् तदा .... भवति।

२०. प्रहरणस्य कोऽर्थः?

२१. खरस्य कोऽर्थः?

२२. सूर्यबिम्बः यदि निर्मलः स्यात् तदा जनानां .... करोति।

४.१३ सारांशः

अस्मिन् पाठे भवता सूर्यचारः अधीतः। आचार्येण सम्यग्रूपेण सूर्यचारं अस्मिन् पाठे प्रतिपादितम्। भवान् पठितवान् यत् आश्लेषानक्षत्रस्य अर्द्धभागात् सूर्यस्य दक्षिणायनं आसीत् तथा च धनिष्ठानक्षत्रस्य आदितः उत्तरायणं आसीत्। इदं पूर्वाचार्याणां मतं सन्ति। परन्तु आचार्यः कथयति यत् सम्प्रति सूर्यस्य उत्तरायणं मकरादितः तथा च दक्षिणायनं कर्कादितः भवति। भवान् सम्यग्रूपेण अयनपरीक्षणविधिः अधीतवान्। ततः भवान् पठितवान् यत् सूर्यः मकरराशेः प्रवेशात् पूर्वमेव यदि दक्षिणदिशां प्रति गच्छति स विकृतः भवति। स पश्चिमदक्षिणयोः दिश्योः स्थितानां देशानां नाशं करोति तथा च सूर्यः कर्कराशेः प्रवेशात् पूर्वमेव यदि उत्तरदिशां प्रति गच्छति सापि विकृतः भवति। स पूर्व-उत्तरदिशोः स्थितानां देशानां नाशं करोति। ततः अतिक्रमितायनगतस्य सूर्यस्य फलं अधीतवान्। यदि सूर्यः उत्तरमयनमतिक्रम्य मकरराशिं प्रति गच्छति तदा स वृद्धिकरो भवति। तथा च सूर्यः दक्षिणमयनमतिक्रम्य कर्कराशिं प्रति गच्छति तदा स जनकल्याणस्य मार्गं प्रशस्ति कृत्वा धन-धान्यस्य अभिवृद्धिं करोति। ततः तामसकीलकादिभिः आच्छादितस्य सूर्यस्य फलं पठितवान्। ये तामसकीलकादयः सन्ति ते आकाशमण्डले कृष्णवर्णसदृशः सूर्यं आच्छादयति। भवान् ज्ञातवान् यत् शिशिरादिषड्ऋतवः सन्ति। तस्मिन् काले सूर्यवर्णवशात् शुभाशुभफलं भवति अर्थात् यदि शिशिरऋतौ सूर्यबिम्बः ताम्रवर्णः वा कपिलवर्गः स्यात् तदा शुभफलं भवति। अनेन प्रकारेण यदि सूर्यः वसन्तऋतौ सूर्यबिम्वः हरितवर्णः वा कुङ्कुमवर्णः स्यात् तदा शुभकारी भवति। परन्तु सूर्यबिम्बः ग्रीष्मऋतौ यदि रक्तवर्णः दृश्यते तदा भयप्रदः भवति। अनेन प्रकारेण वर्षाऋतौ सूर्यबिम्बः कृष्णवर्णः दृश्यते तदा अनावृष्टिः भवति ततः सूर्याक्रान्तनक्षत्रस्य सन्तापशोधनम् अधीतवान्। ततः भवान् प्रतिसूर्यस्य फलमपि पठितवान्।

४.१४ शब्दावली

१. सविता = सूर्यः।

२. चिरेण = शीघ्रेण।

३. रोगम् = गदम्।

४. प्रावृट् = वर्षा।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

५.	क्षितीशस्य	=	राज्ञः।
६.	सङ्ग्रामः	=	युद्धः।
७.	चापम्	=	धनुः।
८.	विहगः	=	पक्षी।
९.	करभः	=	उष्ट्रः।
१०.	मृगः	=	हरिणः।
११.	शुद्धम्	=	निर्मलम्।
१२.	शिखिनः	=	केतोः।
१३.	मनुजा	=	मानवाः।
१४.	तस्करः	=	चौरः।
१५.	ध्वजम्	=	पताका।
१६.	कनकम्	=	सुवर्णम्।
१७.	विप्रः	=	ब्राह्मणः।
१८.	सलिलम	=	जलम्।
१९.	शोकम्	=	दुःखम्।
२०.	रजस्	=	धूलिकणम्।

४.१५ सन्दर्भग्रन्थः

१. **बृहत्संहिता** - व्या.- डॉ. सुरकान्त झा, चौखम्बा-संस्कृत-सीरीज-ऑफिस, वाराणसी।

४.१६ सहायकग्रन्थाः

१. **बृहत्संहिता** -व्या.- प्रो. नागेन्द्रपाण्डेयः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी।

२. **प्राचीनभारतस्य भौगोलिकस्वरूपम्** - लेखकः- डॉ. कृष्णकुमारः, मयंकप्रकाशन, मिश्राबाग, हनुमानगढ़ी, कनखल, हरिद्वार।

३. **सूर्यसिद्धान्तः** -व्या.- पं. कपिलेश्वरशास्त्री, चौखम्बा संस्कृत संस्थान, वाराणसी।

४. **सिद्धान्तशिरोमणिः** -व्या.- बापूदेवशास्त्री, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी।

५. **बृहत्संहिता** -व्या.- सुरेशचन्द्रमिश्रः, रञ्जन पब्लिकेशन, दरियागंज, नई दिल्ली।

६. **संस्कृत-हिन्दी-कोशः** -वामनशिवरामआप्टे, मोतीलाल बनारसीदास पब्लिशर्स प्रा. लि., दिल्ली।

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

४.१७ बोधप्रश्नोत्तराणि

१. मकरराशिः।
२. कर्कराशिः।
३. धनधान्यस्य अभिवृद्धिम्।
४. अशुभम्।
५. ३३।
६. शिखराणि।
७. शुभफलप्रदः।
८. चौरः।
९. धन-धान्यम्।
१०. मरणम्।
११. चमूनाथं घातयति।
१२. कल्याणम्।
१३. ६।
१४. माघफाल्गुनयोः ।
१५. शुभफलप्रदः।
१६. ब्राह्मणान् विनाशयति।
१७. भयम्।
१८. मृत्युः।
१९. दुर्भिक्षम्।
२०. आयुधम्।
२१. गर्दभः।
२२. कल्याणम्।

४.१८ अभ्यासप्रश्नाः

१. अयनप्रवृत्तिः कदा भवति?
२. अयनपरीक्षणं कथं क्रियते?
३. अयनगतसूर्यस्य फलम् लिखत।
४. तामसकीलकादीनां उदयनिमित्तानि लिखत।
५. सूर्यवर्णवशात् ब्राह्मणादिभ्य फलं कथं ज्ञायते?

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

६. प्रतिसूर्यस्य फलं लिखत।

७. सूर्याक्रान्तनक्षत्रस्य सन्0तापशोधनं कथं भवति?

—◆—

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पञ्चमः पाठः – "चन्द्रचारः"

पाठसंरचना

५.१ प्रस्तावना
५.२ उद्देश्यम्
५.३ चन्द्रस्य शुक्लाशुक्लत्त्वनिर्णयः
५.३.१ चन्द्रे स्वप्रकाशाभावत्वनिरुपणम्
५.३.२ चन्द्रगोलस्य शुक्लत्ववृद्धिः
५.४ विविधनक्षत्रेषु चन्द्रगमनदिकप्रभावात् शुभाशुभफलम्
५.५ चन्द्रेण सह नक्षत्राणां योगः
५.६ चन्द्रमसो दशविधसंस्थानां लक्षणं तत्फलञ्च
५.६.१ नैसंस्थानम्
५.६.२ लाङ्गलसंस्थानम्
५.६.३ दुष्टलाङ्गलसंस्थानम्
५.६.४ समदण्डसंस्थाने
५.६.५ कामुर्कसंस्थाने
५.६.६ पार्श्वशापिनः संस्थानम्
५.६.७ आवर्जितसंस्थानम्
५.७ अन्यसंस्थानानां सामान्यलक्षणानि
बोधप्रश्नाः
५.८ चन्द्रस्वरुपफलम्
५.८.१ चन्द्रबिम्बस्य विविधस्वरूपफलम्
५.९ कुजादिग्रहैः आहतस्य चन्द्रशृङ्गस्य फलम्
५.९.१ शुक्रजीवभौमभिन्नस्य चन्द्रमसः फलानि
५.९.२ शनिबुधकेतुभिन्नस्य चन्द्रस्य फलम्
५.१० ग्रहणकाले उल्काहवाय चन्द्रस्य फलम्
५.११ चन्द्रस्य वर्णलक्षणं तत् शुभाशुभफलम्
५.१२ पक्षे तिथिवृद्धौ क्षये साम्ये च शुभाशुभफलम्
बोधप्रश्नाः
५.१३ सारांशः
५.१४ शब्दावली
५.१५ सन्दर्भग्रन्थाः
५.१६ सहायकग्रन्थाः
५.१७ बोधप्रश्नोत्तराणि
५.१८ अभ्यासप्रश्नाः

५.१ प्रस्तावना

पूर्वपाठेषु भवान् ज्योतिषशास्त्रस्य त्रिस्कन्धस्वरूपं दैवज्ञलक्षणानि आदित्यचाराञ्च पठितवान्। बृहत्संहिताग्रन्थस्य प्रथमखण्डस्य अयम् अन्तिमः पाठः वर्तते। पूर्वस्मिन् पाठे भवान् सम्पूर्ण रविचारं पठितवान्। तस्मिन् अयनलक्षणं विकृतसूर्यविम्वस्य फलानि च, सूर्यबिम्बोपरि तामस-कीलकसंज्ञकानां राहुसुतानां दर्शनफलम्, सूर्यस्य रश्मिवशात् शुभाशुभफलम्, ऋतुवशात् सूर्यस्वरुपस्य वर्णस्य च फलम्, सन्ध्याद्वये सूर्यस्य शुभाशुभलक्षणम्, प्रतिसूर्यदर्शनस्य फलम्, सन्ध्याद्वये सूर्यस्य शुभाशुभलक्षणम्, प्रतिसूर्यदर्शनस्य फलम्, सूर्यस्य वर्णफलम् एते

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विषयाः भवता पठिताः। पूर्वपठितेषु विषयेषु केचन् विषया आधुनिकवैज्ञानिकैः प्रमाणीकृताः सन्ति। सूर्यबिम्बोपरि कृष्णवर्णीयानां चिह्नानां दर्शनं मेघवशात्, ग्रहस्य (बुधस्य शुक्रस्य वा) पारगमनवशात् तथा सूर्यपृष्ठीयबृहद्विस्फोटवशात् कारणेन भवति। एतेषां समेषाम् अध्ययनं प्राचीनाचार्यैः सूक्ष्मरुपेण कृतमासीत्। तथा सूर्यबिम्बोपरि कृष्णवर्णीयानां चिह्नानां वर्धनेन पृथिव्याम् आपदः भवन्तीति निर्दिष्टम्। तथैव रुसदेशीयेन एकेन वैज्ञानिकेन विषयेऽस्मिन् सम्पूर्णजीवनं यावत् शोधकार्यं कृत्वा प्रतिपादितं यत् प्रति एकादशवर्षे सूर्यबिम्बोपरि कृष्णवर्णीयानां चिह्नानां वृद्धिः भवति तथा यदा अधिकमातायां कृष्णचिह्नानां दर्शनं भवति तदा लोके युद्धानि, जनानां परस्परं कलहः, संघर्षश्च भवति। एतदर्थं तेन 1920 ईसवीपर्यन्तं 700 सप्तशताधिकवर्षेसु घटितानां घटनानां कृष्णचिह्नैः सह संबंधः स्थापितः।

तथा च प्रतिसूर्यस्य दर्शनस्यापि वैज्ञानिकं विवेचनं कृतमस्ति। विविधप्रदेशेषु सूर्यद्वयस्य दर्शनस्य उदाहरणानि प्रायोगिकरुपेण प्राप्यन्ते। तेषां चलचित्राणि अपि प्रमाणरुपेण स्वीकृतानि सन्ति। सूर्यस्य विविधवर्णानामपि दर्शनं प्राप्तमस्ति। इत्येवं प्रकारेण स्पष्टं भवति यत् दूरदर्शकयन्त्राणाम् अभावे प्राचीनाचार्यैः महत्प्रयासेन अस्य सूक्ष्मज्ञानस्य प्रकटनं कृतम्। सूर्यस्य विषये तु तेषां मतानि भवता पठितानि।

पाठेऽस्मिन् चन्द्रस्य विषये प्राचीनाचार्यैः यत्किमपि ज्ञातं तत्सर्वं पठिष्यति। पञ्चसहस्राधिकवर्षात् पूर्वमेव वैदिककाले भारतीयाः ज्ञातवन्तः यत् चन्द्रः सूर्यस्य प्रकाशेन प्रकाशितः भवति। तस्मिन् जलस्य आधिक्यं भवति अतः सूर्यकिरणाः शीतलीभूत्वा पृथिव्योपरि पतन्ति। अतः चन्द्रस्य शीतकिरणाः भवन्ति। चन्द्रस्य चारवशात् शुक्लभागे हानिः वृद्धिश्च जायते। तेषामाधारेणैव तिथीनां निर्धारणं कृतम्। आचार्यवराहमिहिरेण प्राचीनाचार्याणां मतानि एव बृहत्संहिताग्रन्थे सङ्कलितानि सन्ति। चन्द्रबिम्बस्य गोलाकृतिवशात् तस्य शुक्लभागस्य दर्शनं कदाचित् गोलाकारं कदाचित् गोलखण्डस्वल्पं चापात्मकं भवति। तस्य चापस्य आकृतिः उभयोः प्रान्तयोः महिषशृङ्गसदृशा भवति। अतः चन्द्रस्य शुक्लभागस्य वृद्धिः शृङ्गरुपेण दृश्यते। तेषां शृङ्गानां दशविभागेषु विवेचनं कृतम्, ते च चन्द्रस्य दशसंस्थानानि उच्यन्ते। पाठेऽस्मिन् भवान् तेषां दशसंस्थानानां विषये विस्तरेण पठिष्यति। तथा पाठेऽस्मिन् भवान् चन्द्रस्य शुक्लाशुक्लत्वनिर्णयः, विविधनक्षत्रेषु चारवशात् शुभाशुभफलानि, चन्द्रस्वरुपफलम्, कुजादिः पञ्चताराग्रहैः आहतस्य चन्द्रशृङ्गस्य फलानि, ग्रहणकाले उल्काहतस्य चन्द्रस्य फलम्, चन्द्रस्य वर्णलक्षणं फलं च, पक्षे तिथिवृद्धौ, क्षये, साम्ये च शुभाशुभफलम् इत्यादिविषयान् पठिष्यति। प्राचीनाचार्यैः प्रतिपादितानां चन्द्रसंबन्धितानां तथ्यानाम् अध्ययनं करिष्यति।

५.२ उद्देश्यम्

अस्य पाठस्य अध्ययनेन भवान्–

- चन्द्रस्य शुक्लाशुक्लत्त्वनिर्णये समर्थः भविष्यति।
- चन्द्रगोलस्य शुक्लत्त्ववृद्धिप्रतिपादने कुशली भविष्यति।
- विविधनक्षत्रेषु चन्द्रगमनदिक् प्रभावात् शुभाशुभफलप्रतिपादने प्रवीणः भविष्यति।
- कुजादिपञ्चताराग्रहैः आहतस्य चन्द्र शृङ्गस्य फलानि प्रतिपादपितुं शक्ष्यति भविष्यति।
- ग्रहणकाले उल्काहतस्य चन्द्रस्य फलप्रतिपादने पटुः भविष्यति।
- चन्द्रस्य वर्णलक्षणं तत् शुभाशुभफलानि निरूपयितुं शक्ष्यति।
- ज्योतिपशास्त्रस्य वैज्ञानिकत्त्वप्रतिपादने समर्थः भविष्यति।

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

५.३ चन्द्रस्य शुक्लाशुक्लत्त्वनिर्णयः

चन्द्रः गोलाकारः भवति। तस्य शुक्लत्त्वदर्शनस्य कारणं वराहमिहिराचार्येण एवं वर्णितम्–

नित्यमधःस्थस्येन्दोर्भाभिर्भानोः सितं भवत्यर्द्धम्।
स्वच्छाययाऽन्यदसितं कुम्भस्येवाऽऽतपस्थस्य॥

अन्वयः – इन्दोः भानोः अधःस्थस्य नित्यम् अर्द्धम् सितं भवति। कुम्भस्य एव आतपस्थस्य (शुक्लं दृश्यते) अन्यत् स्वच्छायया असितं (दृश्यते)।

प्रतिपदार्थः – इन्दोः = चन्द्रस्य, भानोः = आदित्यात्, अधःस्थस्य = अधोभागे स्थितस्य, नित्यं = सर्वकालम् अर्द्धं = दलं, सितं = शुक्लं भवति। (यथा) कुम्भस्य = घटस्य, आतपस्थस्य = आतपे सूर्यस्य रश्मिसम्मुखे स्थितस्य, (अर्धं शुक्लं दृश्यते) अन्यत् = द्वितीयम् अर्धं, स्वछायया = स्वस्यैव छायाकारणात्, असितं = कृष्णं (दृश्यते)

व्याख्या – चन्द्रस्य सूर्यात् अधःस्थस्य रश्मिभिः नित्यम् अर्द्धभागः शुक्लः भवति। अर्थात् सूर्यकिरणैः सर्वदा चन्द्रबिम्बस्य अर्धभागः शुक्लः भवति तथा अपरः अर्धभागः तस्य बिम्बस्यैव छायया नित्यं कृष्णः भवति। परन्तु जिज्ञासा भवति यत् एतत् कथं सम्भवति? चन्द्रबिम्बस्य शुक्लत्त्वप्रतिपादने आचार्येण लौकिकमुदाहरणमेकं निर्दिष्टम्। तेनोक्तं यत् कुम्भस्य यस्मिन् अर्द्धे रश्मयः पतन्ति तत् अर्धभागं शुक्लं दृश्यते। अन्यत् अर्धभागं स्वच्छायया नित्यमेव कृष्णं भवति। तत्कथं भवतीति जिज्ञासायाः समाधानार्थं वराहमिहिरेण एकं लौकिकमुदाहरणं प्रस्तुतम्। लोके वयं पश्यामः यत् कश्चित् कुम्भः यदि आतपस्थः भवेत् अर्थात् सूर्यप्रकाशस्य सम्मुखे स्थितः स्यात् तदा तस्य कुम्भस्य सूर्यस्य सम्मुखे स्थितः भागः शुक्लः दृश्यते तथा च अपरः भागः स्वच्छायया एव कृष्णः दृश्यते। तथैव चन्द्रस्य शुक्लत्वम् अपि भवति। यथा चित्रेऽस्मिन् स्पष्टः भवति–

तथैव सूर्यसिद्धान्तग्रन्थेऽपि निर्दिष्टमस्ति–

महतश्चाप्यधःस्थस्य नित्यं भासयते रविः।
अर्द्धं शशाङ्कबिम्बस्य न द्वितीयं कथञ्चन॥

ब्रह्मसिद्धान्तेऽपि तथैव निर्दिष्टमस्ति।

५.३.१ चन्द्रे स्वप्रकाशाभावत्वनिरुपणम्

आचार्यवराहमिहिरः न केवलं ज्योतिषशास्त्रे प्रवीणः आसीत् अपितु काव्यशास्त्रेऽपि तस्य अद्भुतप्रतिभा आसीत्। विज्ञानसंबद्धविषयाणामपि विविधोपमाभिः प्रतिपादनं तेन कृतम्। यथा श्लोकेऽस्मिन् निर्दिष्टम्–

सलिलमये शशिनि रवेर्दीधितयो मूर्च्छितास्तमो नैशम्।
क्षपयन्ति दर्पणोदरनिहिता इव मन्दिरस्यान्तः॥

अन्वयः – सलिलमये शशिनि रवेः दीधितयो मूर्च्छिताः नैशं तमः क्षपयन्ति (यथा) दर्पणोदरनिहिता (सूर्यरश्मयः) मन्दिरस्यान्तः (तमः क्षपयन्ति) इव।

प्रतिपदार्थः – सलिलमये = अम्बुमये, शशिनि = चन्द्रमसि, रवेः = आदित्यस्य सम्बन्धिन्यो, दीधितयो = रश्मयो, मूर्च्छिताः = तत्र संलग्नाः, प्रतिफलिता, नैशं = निशाभवं रात्र्युत्पन्नं वा, तमः = अन्धकारं, क्षपयन्ति = नाशयन्ति। यथा दर्पणोदरे = दर्पणस्य मध्ये, (द्वारप्रवेशे), निहिताः = संरुद्धाः, (सूर्यरश्मयः) मन्दिरस्यान्तः = गृहस्य मध्ये (तमः क्षपयन्ति)।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

व्याख्या – वराहमिहिरः विविधलौकिकोदाहरणैः आकाशीय प्रकाशनियमान् प्रतिपादयति। पुरातनकाले गृहाणाम् अन्तवर्तिप्रकोष्ठेषु प्रकाशकरणाय गोलदीपानां दण्डदीपानां च व्यवस्था न आसीत्। अतः दीर्घाकारैः दर्पणैः सूर्यरश्मीनां परावर्तनेन प्रकाशः क्रियते स्म। अतः यथा दर्पणमध्ये प्रविष्टानां सूर्यरश्मीनां परावर्तनवशात् गृहान्तवर्तिनः अन्धकारस्य विनाशः भवति तथैव सूर्यस्य रश्मयः जलमयस्य चन्द्रबिम्बस्य धरातलात् परावर्त्य पृथिव्योपरि पतन्ति तेन रात्रिकाले अन्धकारस्य विनाशः भवति। यथा चित्रेऽस्मिन् दृश्यते –

सूर्यसिद्धान्तेऽपि तथैव निर्दिष्टं वर्तते–

तेजसां गोलकः सूर्यो ग्रहर्क्षाण्यम्बुगोलकाः।
प्रभावन्तो हि दृश्यन्ते सूर्यरश्मिप्रदीपिताः॥

पुनश्च चन्द्रस्य शुक्लभागस्य वृद्धिविषये आचार्येण अग्रे वर्णितम् यत् शशिनः पश्चिमदिग्भागात् सितवृद्धिः भवति–

त्यजतोऽर्कतलं शशिनः पश्चादवलम्बते यथा शौक्ल्यम्।
दिनकरवशात्तथेन्दोः प्रकाशतेऽधः प्रभृत्युदयः॥

अन्वयः – शशिनः अर्कतलं त्यजतो यथा पश्चात् शौक्ल्यम् अवलम्बते तथा इन्दोः दिनकरवशात् अधः प्रभृति उदयः प्रकाशते।

प्रतिपदार्थः – शशिनः = चन्द्रस्य, अर्कतलं = सूर्याधोभागं, त्यजतो = त्यागं कुर्वतः मुञ्चतो वा, यथा = येन प्रकारेण, पश्चात् = पश्चिमायां दिशि, शौक्ल्यं = शुक्लत्वम्, अवलम्बते = तिष्ठति (भवति वा), तथा = तेनैव प्रकारेण, इन्दोः = चन्द्रस्य, दिनकरवशात्= सूर्यकारणात्, अधः प्रभृति = बुध्न्यभागात् अधःभागात् वा आरभ्य, उदयः, प्रकाशते = विराजते।

व्याख्या – अमावस्यान्ते चन्द्रमा सूर्यस्य अधोभागे स्थितः भवति। तस्मिन् काले चन्द्रबिम्बस्य सूर्याभिमुखं गोलार्द्धं शुक्लं भवति। यथा चित्रेऽस्मिन् स्पष्टः वर्तते। तथा पृथिवीतः दृश्यमानं चन्द्रबिम्बस्य भागं कृष्णवर्णं भवति। तत्पश्चात् प्रतिपदादिषु तिथिषु यथा यथा स्वभोगतुल्येन शीघ्रगतित्वात् चन्द्रः गच्छति तथा तथा चन्द्रबिम्बस्य दृष्टिवर्तिनम् अध ोभागम् अवलम्बते। तिथीनां वृद्धिवशात् शुक्लभागे अपि वृद्धिः दृश्यते। सूर्यसिद्धान्ते अपि तथैव निर्दिष्टं वर्तते–

विप्रकर्षं यथा याति ह्यधस्थश्चन्द्रमा रवेः।
तथातथाऽस्य भूदृश्यमंशं भासयते रवेः॥

५.३.२ चन्द्रगोलस्य शुक्लत्ववृद्धिः

प्रतिदिनं चन्द्रगोलस्य शुक्लत्ववृद्धिः अपि लौकिकोदाहरणेन आचार्यवराहमिहिरः प्रतिपादयति –

प्रतिदिवसमेवमर्कात्स्थानविशेषेण शौक्ल्यपरिवृद्धिः।
भवति शशिनोऽपराह्णे पश्चाद्भागे घटस्येव॥

अन्वयः – एवं प्रतिदिवसं शशिनः अर्कात् स्थानविशेषेण शौक्ल्यपरिवृद्धिः भवति। (यथा) अपराह्णे पश्चाद्भागे घटस्य एव (शौक्ल्यपरिवृद्धिर्भवति।)

प्रतिपदार्थः – एवम् = अनेन प्रकारेण, प्रतिदिवसं = प्रतिदिनं, शशिनः = चन्द्रस्य, अर्कात् = आदित्यात्, स्थानविशेषेण = स्थानान्तरगमनेन, शौक्ल्यपरिवृद्धिः =

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शुक्लभावस्य वृद्धिः अधिकतरा भवति। (यथा) अपराह्ने = द्वितीये दिनार्द्धे, पश्चाद्भागे = पश्चिमार्धे, घटस्य = कुम्भस्य एव (आतपस्थस्य शुक्लता भवति)।

व्याख्या – पूर्वोक्तप्रकारेणैव चन्द्रस्य सूर्यात् स्थानान्तरगमनेन शुक्लभावस्य वृद्धिः अधिकतरा भवति। यथा यथा राशिभोगवशेन चन्द्रः अग्रतो याति तथा तथा तस्य बिम्बस्य शुक्लाधिक्यं भवति। अतः अमावस्यातिथित आरभ्य चन्द्रस्य गतिवशात् प्रतिदिनं चन्द्रबिम्बस्य शुक्लतायाः वृद्धिः भवति। अवगमनार्थे आचार्येण लौकिकमुदाहरणमपि निर्दिष्टं यत् यथा अपराह्नकाले द्वितीये दिनार्धे काले आतपस्थस्य कस्यचित् घटस्य पश्चिमार्धे भागे शुक्लता भवति। प्रतिपलं सूर्यस्य गतिवशात् घटस्य शुक्लतायां परिवर्तनं भवति। तथैव यथा यथा चन्द्रः राशिवशेन प्राङ्मुखो याति तथा तथा शुक्लतायां परिवृद्धिः भवति। शुक्लपक्षस्य सप्तम्यर्धे चन्द्रबिम्बस्य अर्धशुक्लता भवति। अमावस्यानन्तरं षड्राश्यन्तरितस्य चन्द्रबिम्बस्य सर्वशुक्लता भवति, अर्थात् पूर्णिमा भवति। ततो यथा यथा चन्द्रः सूर्यसन्निकर्षम् आयाति तथा तथा शुक्लतायाः हानिः भवति। पुनः कृष्णपक्षस्य अष्टम्यर्धे चन्द्रबिम्बस्य अर्धभागः कृष्णः भवति। तथा अमावस्यान्ते सम्पूर्णबिम्बः कृष्णः भवति। एवं प्रकारेण चन्द्रस्य गतिवशात् चन्द्रबिम्बस्य शुक्लतायां हानिः वृद्धिश्च प्रतिदिवसं भवति। चित्रे चन्द्रबिम्बस्य हानिवृद्धिविषये स्पष्टरुपेण ज्ञातुं शक्यते –

५.४ विविधनक्षत्रेषु चन्द्रगमनादिक् प्रभावात् शुभाशुभफलम्

चन्द्रस्य गतिवशात् विविधनक्षत्रेषु तस्य गमनं भवति। केषुचित् नक्षत्रेषु शुभफलं केषुचिच्च अशुफलं भवति। तत्सन्दर्भे आचार्येण एवं वर्णितम्–

ऐन्द्रस्य शीतकिरणो मूलाषाढाद्वयस्य चायातः।
याम्येन बीजजलचरकाननहा वह्निभयदश्च॥
दक्षिणपार्श्वेन गतः शशी विशाखाऽनुराधयोः पापः।
मध्येन तु प्रशस्तः पितृदेवविशाखयोश्चापि॥

अन्वयः – शीतकिरणः ऐन्द्रस्य मूलाषाढाद्वयस्य च याम्येन (यदा) यातः (तदा) बीजजलचरकाननहा वह्निभयदः च (भवति) विशाखाऽनुराधयोः शशी दक्षिणपार्श्वेन गतः पापफलदः भवति। अनयोः द्वयोः मध्येन तु प्रशस्तः (भवति) पितृदेवविशाखयोश्चापि (मध्येन तु प्रशस्तः भवति)।

प्रतिपदार्थः – शीतकिरणः = चन्द्रमा, ऐन्द्रस्य = ज्येष्ठानक्षत्रस्य, मूलाषाढाद्वयस्य = मूलनक्षत्रस्य तथा आषाढाद्वयम् अर्थात् उत्तराषाढापूर्वाषाढानक्षत्रे तयोश्च, याम्येन = दक्षिणेन (यदा) यातः = गतः, (तदा) बीजजलचरकाननहा = बीजानि यानि उप्यन्ते, जलचराः = जलप्राणिनः, काननानि = वनानि एतेषां बीज-जलज-वनप्राणिनां नाशः हननम्, वह्निभयदः = अग्निभयदः च भवति। विशाखाऽनुराधयोः = विशाखानक्षत्रे अनुराधानक्षत्रे च, शशी = चन्द्रः, दक्षिणपार्श्वेन = याम्यभागेन, गतः = यातः, पापः = पापफलदः अनिष्टफलदो वा भवति। (अनयोः द्वयोः) मध्येन = अन्तरेण (गतः चन्द्रमा) प्रशस्तः = शुभफलदः (भवति) पितृदेवविशाखयोः – पितृदेवो मघानक्षत्रस्य, विशाखानक्षत्रस्य च (मध्येन च प्रशस्तः भवति)।

व्याख्या – यदि चन्द्रः ज्येष्ठामूलपूर्वापाढोत्तरापाढानक्षत्रेषु दक्षिणेन गमनं करोति तदा बीजानां जलचराणां वनानां च विनाशं करोति। तथा लोके अग्निभयदायकं भवति। अर्थात् एतेपु ज्येष्ठादिचतुर्षु नक्षत्रेषु दक्षिणदिशातः चन्द्रस्य गमनवशात् अशुभफलानि भवन्ति।

एतेषु नक्षत्रेषु उत्तरदिशातः गमनवशात् चन्द्रः शुभफलं करोति इति भट्टोत्पलटीकायां निर्दिष्टेन उद्धरणश्लोकेन स्पष्टः भवति–

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भानां यथासम्भवमुत्तरेण यातो ग्रहाणां यदि वा शशाङ्कः।
प्रदक्षिणं तच्छुभदं नृपाणां याम्येन यातो न शिवः शशाङ्कः॥

अग्रे निर्दिष्टं यत् यदि चन्द्रः अनुराधाविशाखानक्षत्रयोः दक्षिणभागेन गमनं करोति तदा पापफलानि भवति। अर्थात् अनयोः उत्तरभागेन यदि गमनं करोति तदा तु शुभफलं भवतीति ज्ञेयम्।

पितृदेवो अर्थात् मघानक्षत्रं तथा विशाखानक्षत्रं तु स्पष्टमेव, यदि अनयोः नक्षत्रयोः मध्यभागेन चन्द्रस्य गमनं भवति तदा शुभफलदायको भवति। अनयोः द्वयोः अन्तरेण गतः चन्द्रमा प्रशस्तः भवति। अत्र श्लोके अपि शब्दः विशेषं द्योतयति, तेन मघाविशाखयोरुत्तरेण अपि गतः चन्द्रः शुभफलदः भवति।

आचार्यपराशरेण चन्द्रस्य विविधनक्षत्रेषु सञ्चारस्य फलानि विस्तरेण विवेचितानि। भट्टोत्पलेन श्लोकस्य व्याख्यायां पराशरवचनानि च उद्धृतानि येन विविधनक्षत्रेषु चन्द्रचारस्य फलानि विस्तरेण ज्ञायन्ते –

"अथ मार्गेष्वाग्नेयादुत्तरोऽतिवर्षकरो मैत्रसावित्रभ्यां प्रजाहितकारी। ज्येष्ठाग्नेयमैत्रत्वाष्ट्रणां दक्षिणतश्चरन् पुष्कलाशुभदः। उपरिष्टाद्वैरोधिको धान्यविनाशी। अधो यवसम्पत्करः। मघाऽनुराधाभ्यां मध्येन गमनमतिशोभनम्। शिशिरग्रीष्मयोर्दक्षिणे च शुभदो वर्षास्ववर्षकरः चेति॥"

आग्नेयात् अर्थात् कृत्तिकातः उत्तरादिशि गतश्चन्द्रः यदा भवति तदा अतिवृष्टिः जायते। मैत्रनक्षत्रात् अनुराधानक्षात्रात् उत्तरगतश्चन्द्रः प्रजानां हितं करोति। ज्येष्ठाग्नेयमैत्रत्वाष्ट्रणाम् = ज्येष्ठानक्षत्रात् कृत्तिकातः अनुराधायाः चित्रानक्षत्रात् दक्षिणे गतश्चन्द्रः पुष्कले अतिशयेन अशुभजनकः भवति। पूर्वोक्तेभ्यः नक्षत्रेभ्यः पूर्वगतश्चन्द्रः धान्यं नाशयति तथा एतेभ्यः अधोऽर्थात् पश्चिमगतः शशी यवाद्यन्नै जनान् सम्पूरयति। मघानक्षत्रस्य मध्यगतः अथवा अनुराधानक्षत्रस्य मध्यगतश्चन्द्रः अतिशोभादायकः भवति। शिशिर-ग्रीष्मयोः सामान्यतया दक्षिणगतश्चन्द्रमा शुभञ्जनयति वर्षायां दक्षिणतश्चन्द्रः अवृष्टिजनकः भवति।

५.५ चन्द्रेण सह नक्षत्राणां संयोगः

विविधनक्षत्रैः सह संयोगेन चन्द्रस्य शुभाशुभफलानि वराहमिहिराचार्येण एवं वर्णितानि-

षडनागतानि पौष्णाद् द्वादश रौद्राश्च मध्ययोगीनि।
ज्येष्ठाद्यानि नवर्क्षाण्युडुपतिनतीत्य युज्यन्ते॥

अन्वयः – पौष्णाद् षट् (नक्षत्रणि) अनागतानि, रौद्रात् च द्वादश (नक्षत्रणि) मध्ययोगीनि, ज्येष्ठाद्यानि नवर्क्षाणि उडुपतिना अतीत्य युज्यन्ते।

प्रतिपदार्थः – पौष्णाद् = रेवतीनक्षत्रात्, षट् = षट् नक्षत्राणि, (चन्द्रेण सह) अनागतानि = अप्राप्तानि (युज्यन्ते), रौद्रात् = आर्द्रानक्षत्रात्, द्वादश = द्वादशनक्षत्राणि (चन्द्रेण सह) मध्ययोगीनि = अर्धभोगं भुक्त इत्यर्थः, (युज्यन्ते) ज्येष्ठाद्यानि = ज्येष्ठाप्रभृति, नवर्क्षाणि = नवनक्षत्राणि, उडुपतिना = चन्द्रेण, अतीत्य = अतिक्रम्य, युज्यन्ते = संयोगं यान्ति।

व्याख्या – पौष्णात् अर्थात् रेवतीनक्षत्रात् षट् नक्षत्राणि रेवती-अश्विनी-भरणी-कृतिका-रोहिणी-मृगशिरस इत्येतानि षट्ऋक्षाणि चन्द्रेण सह अनागतसंयोगं यान्ति। अर्थात् एकस्मिन् नक्षत्रे स्थितश्चन्द्रः अग्रिमनक्षत्रेणापि सहसंयोगं करोति। यथा उत्तराभाद्रपदस्थस्य चन्द्रस्य रेवतीनक्षत्रेण सह संयोगो दृश्यते। रेवतीनक्षत्रे स्थितस्य चन्द्रस्य अश्विनीनक्षत्रेण सह संयोगः

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

दृश्यते। एवं रेवत्यादि षट्नक्षत्रेषु ज्ञेयम्। अस्य अप्राप्तसंयोगः इत्यपि संज्ञा भवति।

आर्द्रानक्षत्रात् आरभ्य द्वादशनक्षत्राणि अर्थात् आर्द्रा-पुनर्वसु-पुष्य-आश्लेषा-मघा-पूर्वाफाल्गुनी-उत्तराफाल्गुनी-हस्त-चित्रा-स्वाती-विशाखा-अनुराधा इत्येतानि द्वादशनक्षत्राणि चन्द्रेण सह मध्ययोगीनी संयोगं यान्ति। चन्द्रमा यस्मिन् काले एतेषां नक्षत्राणां मध्ये स्थितो भवति अर्थात् अर्द्धभागं भुक्तं भवति तदा मध्यसंयोगः उच्यते।

ज्येष्ठानक्षत्रादारभ्य नवनक्षत्राणि अर्थात् ज्येष्ठा-मूल-पूर्वाषाढा-उत्तराषाढा-श्रवण-धनिष्ठा-शताभिषा-पूर्वाभाद्रपद-उत्तराभाद्रपद इत्येतानि नवनक्षत्राणि चन्द्रेण अतीत्य संयोगं कुर्वन्ति। अर्थात् चन्द्रः नक्षत्रम् अतिक्रम्य यदा अग्रिमे नक्षत्रे गच्छति तदा पूर्वनक्षत्रेण सह संयोगं करोति। यथा मूलनक्षत्रे स्थितस्य चन्द्रस्य ज्येष्ठा नक्षत्रेण सह संयोगः दृश्यते। पूर्वाषाढानक्षत्रे स्थितस्य मूलनक्षत्रेण सह संयोगः दृश्यते। एवं पूर्वोक्तानां नवनक्षत्राणां चन्द्रेण सह संयोगः दृश्यते।

गर्गादिभिः आचार्यैः कानिचित् नक्षत्राणि अर्द्धभोगीनि उक्तानि, कानिचित् अध्यर्द्धभोगीनि, कानिचित् च समभोगीनि उक्तानि। यानि अर्द्धभोगीनि उक्तानि तानि अतीत्य चन्द्रेण सह युज्यन्ते। यानि अध्यर्द्धभोगीनि तानि आगतानि तथा यानि समभोगीनि तानि मध्यभोगीनि युज्यन्ते। भट्टोत्पलेन गर्गस्य वचनानि एवम् उद्धृतानि–

उत्तराश्च तथादित्यं विशाखा चैव रोहिणी।
एतानि षडध्यर्द्धभोगीनि महाक्षेत्राणि।
मघाश्विकृत्तिकासोमतिष्यपित्र्यभगाह्वयाः।
सावित्रीचित्राऽनुराधा मूलं तोयं च वैष्णवम्।
धनिष्ठा चैकपाच्चैव समभागः प्रकीर्तितः।
एतानि पञ्चदश समभोगीनि मध्यक्षेत्राणि।
याम्येन्द्ररुद्रवायव्यसार्पवारुणसंज्ञिताः।
एतानि षडर्द्धभोगीनि स्वल्पक्षेत्राणि॥

५.६ चन्द्रमसो दशविधसंस्थानां लक्षणं तत्फलञ्च

पूर्वं भवता पठितं यत् प्रतिदिवसं चन्द्रस्य गतिवशात् चन्द्रबिम्बस्य शुक्लतायाः हानिः वृद्धिश्च भवति यथा आतपस्थितस्य घटस्य प्रतिक्षणं शुक्लतायां परिवर्तनं भवति। गोलाकारस्य पिण्डस्योपरि प्रकाशः चापात्मकरुपेण दृश्यते। तेन शुक्लभागः पर्यन्तभागे शृङ्गमिव दृश्यते। तस्य चन्द्रशृङ्गस्य विविधतिथिषु विविधाकाराः दृश्यन्ते। तेन चन्द्रस्य विभिन्नानां स्वरुपाणां दर्शनं भवति। तेषां स्वरुपाणां दशभेदाः प्राचीनैः वर्णिताः। ते च चन्द्रस्य दशविधसंस्थानानि उच्यन्ते। तेषां दशविधसंस्थानां लक्षणानि फलानि च इदानीं भवान् पठिष्यति। तेषां संस्थानानां नामानि एवं सन्ति – १. नौसंस्थानम् २. लाङ्गलम् ३. दुष्टलाङ्गलम् ४. सम ५. दण्ड ६. कार्मुकम् ७. युगम् ८. पार्श्वशायिनम् ९. आवर्जितम् १०. कुण्डाख्यसंस्थानम्। इदानीम् एतेषां विषये विस्तरेण पठामः –

५.६.१ नौसंस्थानम्

नौसंस्थानविषये आचार्येण एवं वर्णितम् –

उन्नतमीषच्छृङ्गं नौसंस्थाने विशालता चोक्ता।
नाविकपीडा तस्मिन् भवति शिवं सर्वलोकस्य॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अन्वय – सर्वेषां संस्थानानां प्रतिपदार्थवर्णने अन्वयः अपि स्पष्टः भवति अतः संस्थानवर्णने सर्वत्र प्रतिपदार्थाः एव दीयन्ते।

प्रतिपदार्थः – ईषत् = किञ्चित्, उन्नतम् = उच्चं, शृङ्गं = विषाणः (हिन्दीभाषायां 'सींग') यस्य (तथा) विशालता = विस्तीर्णता च (भवति तत्) नौसंस्थानम्। तस्मिन् (संस्थाने) नाविकपीडा = नाविकानां पीडा, उक्ता = कथिता (तथा च) सर्वलोकस्य = समस्तजनस्य च, शिवं = श्रेयः भवति।

व्याख्या – यदा चापाकारकस्य चन्द्रबिम्बस्य शृङ्गं किञ्चित् उन्नतं भूत्वा विशालतां च प्राप्य यदि नौकाकारं दृश्यते तदा तस्य संस्थानस्य ''नौसंस्थानम्'' संज्ञा भवति। तस्मिन् संस्थाने नाविकानां पीडा भवति तथा समस्तस्य कल्याणं भवति।

५.६.२ लाङ्गलसंस्थाने

अर्द्धोन्नते च लाङ्गलमिति पीडा तदुपजीविनां तस्मिन्।
प्रीतिश्च निर्निमित्तं मनुजपतीनां सुभिज्ञं च॥

प्रतिपदार्थः – (शशिनी उच्छृङ्गे चोत्तरे) अर्द्धोन्ते = अर्धभागे उन्नते, लाङ्गलमिति = हलनाम तत्संस्थानम् (भवति) तस्मिन् (संस्थाने) तदुपजीविनां = राज्ञां, निर्निमित्तं = कारणं विना, प्रीतिः = स्नेहः (भवति। लोके) सुभिक्षं = धानधान्यादीनां वृद्धिः च भवति।

व्याख्या – यदि चन्द्र शृङ्गस्य अर्धभागम् उन्नतं भवति तदा तस्य संस्थानस्य ''लाङ्गल (हलं)'' संज्ञा भवति। अस्मिन् संस्थाने लाङ्गलोपजीविनः अर्थात् हलमाध्यमेन येषाम् आजीविका भवति (यथा–कृषकाः) ते पीडिताः भवन्ति। परन्तु राज्ञां परस्परं विना कारणमेव स्नेहः परिवर्धयति। लोके धनधान्यादिवृद्धिद्वारा सुभिक्षं कल्याणं च भवति। भट्टोत्पलेन टीकायाम् उल्लिखितं यत् लाङ्गलसंस्थाने चन्द्र शृङ्गम् उत्तरतः उन्नतं भवति। प्रमाणरुपेण वृद्धगर्गस्य मतमपि उल्लिखितम्–

यदा सोमः प्रतिपदि नौस्थायी सम्प्रदृश्यते।
उत्तरोज्जवलशृङ्गो वा लाङ्गली च मनोहरः॥
क्षेमं सुभिक्षमारोग्यं सर्वभूतेषु निर्दिशेत्।
राज्ञां च विजयं ब्रूयाद् वर्द्धन्ते शृङ्गिणस्तथा॥

५.६.३ दुष्टलाङ्गलसंस्थाने

दक्षिणविषाणमर्द्धोन्नतं यदा दुष्टलाङ्गलाख्यं तत्।
पाण्डयनरेश्वरनिधनकृदुद्योगरकं बलानां च॥

प्रतिपदार्थः – दक्षिणविषाणां = याम्यशृङ्गं, यदा, अर्द्धोन्नतं = अर्धभागेन उन्नतं (भवति) तदा दुष्टलाङ्गलाख्यं = दुष्टलाङ्गलं नाम तत्संस्थानम् तत् (च संस्थानं) पाण्ड्यनरेश्वर = पाण्ड्यदेशे योऽसौ, नरेश्वरः = राजा तस्य, निधनकृत् = मरणकृत्, बलानां = सैन्यानाम्, उद्योगकरं = उद्योगकारकं (यात्रायाम्) भवति।

व्याख्या – यदि चन्द्रस्य दक्षिण शृङ्गम् अर्धम् उन्नतं भवति तदा 'दुष्टलाङ्गल' संज्ञकं संस्थानं भवति। तच्च संस्थानं पाण्ड्यदेशस्य यः राजा तस्य निधनं मरणं वा करोति। तथा च सैन्यानां यात्रायाम् उद्योगं करोति। वृद्धगर्गस्यापि मते तथैव उल्लिखितम्

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

५.६.४ समदण्डसंस्थाने

समशशिनि सुभिक्षक्षेमवृष्टयः प्रथमदिवसदृशाः स्युः।
दण्डवदुदिते पीडा गवां नृपश्चोग्रदण्डोऽत्र॥

प्रतिपदार्थः – समशशिनि = तुल्यशृङ्गे चन्द्रे, प्रथमदिवससदृशाः = प्रथमं दिनं प्रतिपत्तत्सदृशाः तत्तुल्याः, सुभिक्षक्षेमवृष्टयः= सुभिक्षं क्षेमं वृष्टिश्च, स्युः = भवेयुः। दण्डवदुदिते = दण्डाकारे, (चन्द्रे) गवां = गोवंशस्य, पीडा = कष्टं (भवति)। अत्र = अस्मिन् संस्थाने, नृपः= राजा, उग्रदण्डः = तीक्ष्णकरो (भवति)।

व्याख्या – यदि चन्द्रशृङ्गे तुल्ये भवतः तदा तस्य संस्थानस्य 'समदण्ड' संज्ञा भवति। अस्मिन् संस्थाने प्रतिपत्सदृशाः सुभिक्षक्षेमवृष्टयः भवेयु अर्थात् प्रतिपद्दिने यादृशः सुभिक्षः, यादृशः क्षेमः, यादृशी वृष्टिः भवति तादृशा एव मासं यावत् स्युः। यदि चन्द्रः दण्डाकरः दृश्यते तदा तस्य 'दण्डसंस्थानम्' संज्ञा भवति। अस्मिन् संस्थाने राजा तीक्ष्णदण्डकरो भवति। वृद्धगर्गेण विस्तरेण विषयेऽस्मिन् वर्णितम् –

सम शृङ्गो यदा दृष्टः शशी क्षेमसुभिक्षकृत्।
प्रतिपत्सदृशं तत्र वासवो वर्षते तदा॥

चन्द्ररेखा यदा चोर्ध्वमृज्वी दण्ड इव स्थिता।
उदक् शृङ्गाधिकसमो दण्डस्थानं तदुच्यते॥

उद्युक्तदण्डा राजानो विनिघ्नन्ति समन्ततः।
गवां पीडां विजानीयाद्दण्डस्थाने यदा शशी॥

५.६.५ कार्मुकयुगसंस्थाने

कार्मुकरूपे युद्धानि यत्र तु ज्या ततो जयस्तेषाम्।
स्थानं युगमिति याम्योत्तरायतं भूमिकम्पाय॥

प्रतिपदार्थः – कार्मुकरूपे = कार्मुकं = धनुः तद्रूपे = तदाकारे संस्थाने, युद्धानि (भवन्ति)। यत्र तु ज्या = युद्धकाले यस्मिन् भागे गुणः, ततो = तस्यां दिशि (ये दिशि राजानः) तेषां जयो = विजयः (भवति) यदि याम्योत्तरायतं = दक्षिणसौम्य भागविस्तीर्णा स्थानं (मध्यलं यदि भवति) तत् युगं = युगसंज्ञकं संस्थानं (भवति। एवं विधं संस्थानं) भूमिकम्पाय = भूमेः कम्पाय (वक्तव्यः)

व्याख्याः – यदि चन्द्रस्य शुक्लत्वं धनुः सदृशं भवति तदा तस्य 'कार्मुकसंस्थानम्' संज्ञा भवति। कार्मुकसंस्थानं यदा दृश्यते तस्मिन् मासे युद्धं भवति तथा यस्यां दिशि धनुषः जीवा भवति तस्यां दिशि स्थितस्य राज्ञः जयः भवति। यदि चन्द्रस्य शृङ्गं दक्षिणोत्तर-दिशि विस्तीर्णं भवति तदा तस्य " युगसंस्थानम्" संज्ञा भवति। भट्टोत्पलमतेन दक्षिणसौम्यभागविस्तीर्णं मध्यमं मण्डलं यदि भवति तद्युगं नाम संस्थानम्। युगसंस्थानदर्शनानन्तरं भूमिकम्पः भवतीति फलं निर्दिष्टम्। आचार्यवराहमिहिरः संक्षिप्तभाषायां विषयप्रतिपादनं करोति। वृद्धगर्गेण द्वयोः संस्थानयोः विस्तरेण वर्णनं विहितम्–

उदये तु यदा सोमं पश्येद्धनुरिवोदितम्।
धनुर्द्धराणामुद्योगो जगद्युद्धकरो भवेत्॥

क्षत्रियाः क्षत्रियान् घ्नन्ति वर्णाश्चैव तथापरे।
अग्रतष्च जयस्तेषां पृष्ठतश्च पराजयः॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

चन्द्ररखा यदा व्यक्ता दक्षिणोत्तरमायमता।
शुक्तलादौ प्रतिपद्येत तद्योगस्थानलक्षणम्॥
सैन्योद्योगा भवन्त्यत्र भूमिकम्पश्च जायते॥

५.६.६ पार्श्वशायिनः संस्थानम्

युगमेव याम्यकोट्यां किञ्चित्तुङ्गं स पार्श्वशायीति।
विनिहन्ति सार्थवाहान् वृष्टेश्च विनिग्रहं कुर्यात्॥

प्रतिपदार्थः – युगमेव = युगनामकसंस्थानम् एव, याम्यकोट्यां = दक्षिण शृङ्गाग्रे, किञ्चित् = ईषत् तुङ्गम् = उच्चं (यदि भवति तदा) स पार्श्वशायीति = पार्श्यशायी इति संज्ञकं चन्द्रस्य संस्थानं (भवति। तच्च संस्थानं) सार्थवाहान् = धनिकान्, विनिहन्ति = घातयति (तथा) वृष्टेः = वर्षणस्य च, विनिग्रहं = विनाशम् अभावं वा, कुर्यात् = करोति।

व्याख्या – युगसंज्ञकसंस्थानमेव यदि दक्षिणशृङ्गाग्रे किञ्चित् उन्नतं भवति तदा तस्य संस्थानस्य पार्श्वशायी संज्ञा भवति। अस्मिन् संस्थाने धनेन सम्पन्नाः व्यापारिणः पीडां प्राप्नुवन्ति, वृष्टेः च अभावं भवति। तथैव वृद्धगर्गस्यापि मतेन–

याम्यकोट्यायतः किञ्चिद्युगकाले यदा शशी।
पार्श्वशायीति संज्ञोऽयं सार्थहा वृष्टिनाशनः॥

५.६.७ आवर्जितसंस्थानम्

अभ्युच्छ्रायादेकं यदि शशिनोऽवाङ्मुखं भवेच्छृङ्गम्।
आवर्जितमित्यसुभिक्षकारि तद् गोधनस्यापि॥

प्रतिपदार्थ – अभि = मुख्येन, उच्छ्रायात् = उन्नतिवशात्, यदि शशिनः = चन्द्रस्य, एकं,शृङ्गम् = विषाणः, अवाङ्मुखम् = अधोमुखं, भवेत् (तदा तत् संस्थानम्) आवर्जितमिति = आवर्जितसंज्ञकम् इति, तत् (संस्थानम्) असुभिक्षकारि = भिक्षा न सुलभा यस्मिन् तादृशं करोति (तथा) गोधनस्य = गोवंशस्य, अपि (दुर्भिक्षकारि भवति)।

व्याख्या – यदि अतिशयेन उन्नतिवशात् चन्द्रस्य एकं शृङ्गम् अधोमुखं दृश्यते तदा तत् आवर्जितसंज्ञकं संस्थानं भवति। तच्च संस्थानं लोके दुर्भिक्षकारि भवति। गोध नस्य तृणानाम् अभावात् अपि पीडाकारकं भवति। वृद्धगर्गस्य मते अपि तथैव वर्तते–

अधोमुखं यदा शृङ्गं शशिनो दृश्यते तदा।
संस्थानमावर्जितकं गोहनं दुर्भिक्षकारकम्॥

५.६.८ कुण्डाख्यसंस्थानम्

अव्युच्छिन्ना रेखा समन्ततो मण्डला च कुण्डाख्यम्।
अस्मिन् माण्डलिकानां स्थानत्यागो नरपतीनाम्॥

प्रतिपदार्थः – समन्ततः = सर्वत्र, (यदि), अव्युच्छिन्ना = अखण्डिता, मण्डला = गोलाकारा, रेखा (चन्द्रमसः दृश्यते तदा तत्संस्थानं) कुण्डाख्यं = कुण्ड इति संज्ञिका (भवति) अस्मिन् (संस्थाने) माण्डलिकानां = नरपतीनां, मण्डले परिमिते देशे ये राजानः तेषां, स्थानत्यागः = स्थानचलनं स्वस्थानात् च्युतिः वा (भवति)

व्याख्या – यदि चन्द्रस्य परितः अखण्डिता गोलाकारा रेखा दृश्यते तदा

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तस्य संस्थानस्य ''कुण्डाख्यं संज्ञा भवति। कुण्डाख्यसंस्थाने मण्डले परिमिते देशे ये राजानः तेषां स्थानचलनं स्वस्थानाच्च्युतिर्वा भवति। परन्तु एतादृशी स्थितिः कदाचित् ग्रहणकाले एव संभवति। पुनः वृद्धगर्गस्य मतं विहितम्-

अच्छिन्ना मण्डले रेखा शशिनो दृश्यते यदा।
कुण्डाख्यं नाम संस्थानं नृपविग्रहदायकम्॥

चन्द्रस्य यानि दशसंस्थानानि आचार्येण वर्णितानि तेषां कानिचित् संस्थानानि गणितविधिना शृङ्गोन्नतिपरिलेखकरणेन न उत्पद्यनते। यदि तानि नोपलभ्यन्ते तदानीं किमर्थम् आचार्येण तेषां फलम् उक्तमिति प्रश्न उत्पद्यते। प्रश्नस्य समाधानार्थे टीकाकारेण भट्टोत्पलेन लिखितं यत् यानि संस्थानानि परिलेखविधौ नोपलभ्यन्ते तानि उत्पातरुपाणि भवन्ति कदाचित् एव तेषां दर्शनं भवति। यतो हि तेषां भगवद् गर्गादिविरचितशास्त्रेषु फलानि दृश्यन्ते तानि च आचार्यवराहमिहिरेण पूर्वशास्त्राचारेण उक्तानि। भट्टोत्पलेन पराशरवचनानि, समाससंहितायाः वचनानि च ग्रन्थे प्रमाणरुपेण उद्धृतानि, तेषां वचनानां वर्णनस्य अत्र आवश्यकता नास्ति।

५.७ अन्यसंस्थानानां सामान्यलक्षणानि

दशविधासंस्थानेभ्यः भिन्ना स्थिति अपि कदाचित् चन्द्रशृङ्गस्य परिदृश्यते। तेषां च सामान्य लक्षणानां वर्णनम् आचार्येण अग्रे एवं विहितम्-

प्रोक्तस्थानाभावादुदगुच्चः क्षेमवृद्धिवृष्टिकरः।
दक्षिणतुङ्गश्चन्द्रो दुर्भिक्षभयाय निर्दिष्टः॥
शृङ्गेणैकेनेन्दुर्विलीनमथवाऽप्यवाङ्मुखं शृङ्गम्।
सम्पूर्णं चाभिनवं दृष्ट्वैको जीविताद् भ्रश्येत्॥

अन्वयः – प्रोक्तस्थानाभावात् उदक् उच्चः (चन्द्रः तदा) क्षेमवृद्धिवृष्टिकरः (भवति) दक्षिणतुङ्ग चन्द्रः दुर्भिक्षभयाय निर्दिष्टः।

इन्दुः एकेनशृङ्गेण विलीनम् अपि अवाङ्मुखंशृङ्गम् अथवा सम्पूर्णं च अभिनवं दृष्ट्वा एक एव जीविताद् भ्रश्येत्।

प्रतिपदार्थः – प्रोक्तस्थान-प्रोक्तानि = कथितानि (यानि) स्थान = संस्थानानि (तेषाम्), अभावात् = असम्भवात् (यदि) उदगुच्चः = उत्तरोन्नतः (चन्द्रः तदा), क्षेमः = कल्याणवृद्धिः =सस्यवृद्धयः, वृष्टिकरः = वर्षणं (करोति), दक्षिणतुङ्गः = याम्योन्नतः, दक्षिणविषाणोन्नतः, चन्द्रः, दुर्भिक्षभयाय = भिक्षा अपि यत्र दुर्लभा अर्थात् धनधान्यादिकस्य अभावः तेनात्पन्नं भयं, निर्दिष्टं = कथितम्।

इन्दुः = चन्द्रः, एकेन,शृङ्गेण = विषाणेन विलीनं = गलितम् अपि, अवाङ्मुखम् = अधोमुखं,शृङ्गम् = विषाणं, (चास्य भवति) अथवा सम्पूर्णं = परिपूर्णम्, अभिनवं = मुख्येन नवम् अथवा अभि मुख्येन नवं (एवंविधं इन्दुं) दृष्ट्वा = विलोक्य, एको (मनुजः), जीविताद् = आयुषो, भ्रश्येत् = पतेत्।

व्याख्या – इतः पूर्वं भवता दशसंस्थानानि पठितानि तेषाम् असम्भवात् यदि उत्तरोन्नतः चन्द्रः दृश्यते तदा लोके क्षेमः, सस्यानां वृद्धिः तथा वर्षणं च करोति। यदि दशविधसंस्थानानाम् अभावः भवति तथा चन्द्रः यदि दक्षिणभागेन उन्नतः भवति तदा लोके दुर्भिक्षभयाय कथितः।

यदि चन्द्रस्य एकं शृङ्गं विलीनं दृश्यते अथवा चन्द्रस्य शृङ्गम् अधोमुखं दृश्यते।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अथवा सम्पूर्णं परिपूर्णम् वा अभिनवं दृश्यते। यदि एवंविध चन्द्रशृङ्गस्य विविधपरिवर्तनान् कश्चित् पुरुषः पश्यति तदा सः चिरं न जीवति अर्थात् तस्य आयुषः क्षयः भवति।

बोधप्रश्नाः

१. कस्य रश्मिभिः चन्द्रस्य अर्धभागं शुक्लं दृश्यते?

२. सलिलमयः ग्रहः कः?

३. ज्येष्ठादिचतुर्षु नक्षत्रेषु दक्षिणगमनेन चन्द्रः किं फलं करोति?

४. रेवतीनक्षत्रात् षट् नक्षत्राणि चन्द्रेण सह कीदृशं संयोगं कुर्वति?

५. नौसंस्थानस्य किं फलं भवति?

६. यदा चन्द्रस्य दक्षिणशृङ्गम् अर्धमुन्नतं भवति तदा किं संस्थानं भवति?

७. आवर्जितसंस्थानस्य लक्षणं लिखत।

५.८ चन्द्रस्वरुपफलम्

प्राचीनाचार्यैः ग्रहपिण्डानां प्रत्येकविषयस्य अत्यन्तसूक्ष्मेक्षिकया अध्ययनं कृतम्। तेषां गति-स्थिति-युतिवशात् फलानि विवेचितानि। ग्रहबिम्बानाम् आकारे वर्णे च यत् परिवर्तनं दृष्टं तस्यापि विशदतया विवेचनं तैः कृतम्। तथैव चन्द्रबिम्बस्यापि विविधस्वरुपाणां फलानि वर्णितानि। तेषां सङ्कलनं कृत्वा आचार्येण स्ववाक्येषु एवं वर्णितम्–

संस्थानविधिः कथितो रुपाण्यस्माद् भवन्ति चन्द्रमसः।
स्वल्पो दुर्भिक्षकरो महान् सुभिक्षावहः प्रोक्तः॥

प्रतिपदार्थः – संस्थानविधिः = संस्थानप्रकारः, चन्द्रमसः = चन्द्रस्य, कथितः = उक्तः। अस्मात् (परतः) रूपाणि = स्वरूपाणि भवन्ति। स्वल्पो = अत्यल्पमूर्त्तिः दुर्भिक्षकरो = धनधान्यादीनाम् अभावकारी, महान् = पृथुमूर्तिः वा दीर्घबिम्बः (चन्द्रः) सुभिक्षावह = धन-धान्यादीनां प्राचुर्यकरः, प्रोक्तः = कथितः।

व्याख्या – इतः पूर्वं चन्द्रस्य दशविधसंस्थानानि वर्णितानि। ततः परं रूपवशात् चन्द्रस्य फलानि विविच्यन्ते। यदि चन्द्रस्य बिम्बः अत्यल्पः लघ्वाकारः वा दृश्यते तदा लोके दुर्भिक्षं, धनधान्यादिकस्य अभावः भवति तथा यदि चन्द्रबिम्बः बृहद्बिम्बः, दीर्घाकारः वा दृश्यते तदा लोके सुभिक्षम् अर्थात् धनधान्यादिकस्य वृद्धिः भवति। एवं प्रकारेण साधारणफलं लिखितम्। अग्रे बिम्बानां विविधस्वरुपवशात् फलानि विस्तरेण विवेचितानि।

५.८.१ चन्द्रबिम्बस्य विविधस्वरूपफलम्

चन्द्रबिम्बस्य विविधस्वरुपाणां फलानि एवं वर्णितानि–

मध्यतनुर्वज्राख्यः क्षुद्भयदः सम्भ्रमाय राज्ञां च।
चन्द्रो मृदङ्गरूपः क्षेमसुभिक्षावहो भवति॥
ज्ञेयो विशालमूर्तिर्नरपतिलक्ष्मीविवृद्धये चन्द्रः।
स्थूलः सुभिक्षकारी प्रियधान्यकरस्तु तनुमूर्त्तिः॥

प्रतिपदार्थः – मध्यतनुः = मध्यमबिम्बः, नातिदीर्घः = नातिलघुबिम्बः, (चन्द्रः) वज्रसंज्ञकः = वज्रददाति, तथा राज्ञां = नरपतीनां सम्भ्रमाय = उद्यमाय भवति।

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मृदङ्गरुपः = मृदङ्गाकारः, चन्द्रः क्षेमसुभिक्षावहो = क्षेमं सुभिखं च करोति।

विशालमूर्तिः = विस्तीर्णबिम्बो, नरपते = राज्ञः, लक्ष्मीविवृद्धये = श्रियः वृद्धत्यर्थ, ज्ञेयः = ज्ञातव्यः। स्थूलः = घनः, सुभिक्षकारी = धनधान्यावृद्धिकारकः सुभिक्षकृत् भवति। तनुमूर्तिः = अघनदेहः विरलबिम्बो वा, प्रियधान्यकरः = यदा धान्यं जनानाम् अत्यधिकं प्रियं भवति, धान्यकृते कलहो भवति अर्थात् दुर्भिक्षकारी भवति।

व्याख्या – यदि मध्यमः चन्द्रबिम्बः दृश्यते तदा सः वज्रसंज्ञकः भवति। वज्रसंज्ञके बिम्बे दृष्टे लोके क्षुद्भयं दुर्भिक्षं च भवति तथा नृपाणां व्यर्थ एव उद्यमः भवति। यदि चन्द्रः मृदङ्गाकारः दृश्यते। तदा लोके कल्याणं धनधान्यादीनां वृद्धिश्च भवति।

यदि चन्द्रः विस्तीर्णबिम्बः दृश्यते तदा सः राज्ञः श्रियः वृद्ध्यर्थं भवति। यदि स्थूलः चन्द्रबिम्बः दृश्यते तदा सः लोके धनधान्यादिवृद्धिकरः सुभिक्षकृत् च भवति। यदि चन्द्रबिम्बः विरलः तनुमूर्तिः वा दृश्यते तदा लोके धान्याल्पता दुर्भिक्षं च भवति। इत्येवं प्रकारेण चन्द्रबिम्बस्य विविधस्वरूपाणां फलानि आचार्येण वर्णितानि। वृद्धगर्गवचनेष्वपि तथैव वर्णितमस्ति–

विलग्नमध्यो मेघाभो वज्रसंस्थानसंस्थितः।
मध्याच्छिद्रो विलीनो वा भयं च जनयेद् महत्॥

५.९ कुजादिग्रहैः आहतस्य चन्द्र शृङ्गस्य फलम्

चन्द्रस्य शृङ्गदर्शनवशात् दशविधसंस्थानां वर्णनं भवता पठितम्। चन्द्रः सर्वाधिकगतिकः ग्रहः वर्तते। अतः विविधग्रहैः सह चन्द्रबिम्बस्य संयोगः शीघ्रतया भवति। चन्द्रेण सह कस्यचिदपि ग्रहस्य योगः 'समागम' संज्ञया ज्ञायते। चन्द्रशृङ्गेण सह ग्रहस्य समागमेन शृङ्गस्य भेदः भवतीति आचार्यैः विहितः। चन्द्रस्य ताराग्रहैः सह संयोगे समागमाध्यायोक्तगणितविधिना ग्रहणवत्कर्मणि जाते अधोभागेन भौमादयः बिम्बभेदनं कुर्वन्ति। तत्र कुजादिताराग्रहैः शृङ्गभेदेन फलानि एवं वर्णितानि–

प्रत्यन्तान् कुनृपांश्च हन्त्युडुपतिः शृङ्गे कुजेनाहते
शस्त्रक्षुद्भयकृद्यमेन शशिजेनावृष्टिदुर्भिक्षकृत्।
श्रेष्ठान् हन्ति नृपान् महेन्द्रगुरुणा शुक्रकेण चाल्पान्नृपान्
शुक्ले याप्यमिदं फलं ग्रहकृतं कृष्णे यथोक्तागमम्॥

प्रतिपदार्थः – उडुपतिः = नक्षत्राणां पतिः चन्द्रः, कुजेन = भौमेन, शृङ्गे = विषाणे, आहते = ताडिते सति, प्रत्यन्तान् = दूरवासिनः, कुनृपान् = कुत्सित-नरपतीन्, हन्ति = घातयति। यमेन = शनैश्चरेण (आहते शृङ्गे) शस्त्रक्षुद्भयकृत् = शस्त्रभयं क्षुद्भयं दुर्भिक्षं च करोति। शशिजेन = बुधेन, अवृष्टिजं = वृष्ट्याभावेन उत्पन्नं (भयं), दुर्भिक्षकृत् = धनधान्यादीनाम् अभावेन उत्पन्नं (भयं) च करोति। महेन्द्रगुरुणा = बृहस्पतिना (हते शृङ्गे) श्रेष्ठान् = प्रबलान् नरपतीन् = राज्ञः, हन्ति = घातयति। शुक्रकेण = सितेन (हते शृङ्गे) अल्पान् = स्वल्पान्, नृपान् = राज्ञः (हन्ति इदं) ग्रहकृतं = ग्रहैः कृतं , फलं =शृङ्गभङ्गफलं शुक्ले = शुक्लपक्षे, याप्यं भवति = किञ्चिद्भवति, कृष्णे = कृष्णपक्षे, यथोक्तागमं = यथा निर्दिष्टं (सकलं फलं भवति)

व्याख्या – यदि चन्द्रशृङ्गं भौमेन वेधितं भवति तदा दूरनिवासिनां कुत्सितराज्ञां विनाशं करोति। यदि चन्द्रशृङ्गं शनैश्चरेण वेधितं भवति तदा क्षुधाजनितं भयं शस्त्रैः भयं दुर्भिक्षभयं च भवति। यदि चन्द्रशृङ्गं बुधेन हतं भवति तदा वृष्ट्याभावेन उत्पन्नं भयं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

धनधान्यादीनाम् अभावेन उत्पन्नं भयं च करोति। यदि चन्द्रशृङ्गं बृहस्पतिना हतं भवति तदा श्रेष्ठान् राज्ञः घातयन्ति। यदि चन्द्रशृङ्गं शुक्रेण आहतं भवति तदा अल्पान् राज्ञः हन्ति। ग्रहैः चन्द्रशृङ्गस्य वेधवशात् यानि फलानि पठितानि तानि शुक्लपक्षे स्वल्पानि भवन्ति तथा कृष्णे पक्षे एतानि फलानि पूर्णरुपेण भवन्ति अर्थात् यथा पूर्वं निर्दिष्टं तत्सकलं भवतीति ज्ञेयम्।

५.९.१ शुक्रजीवभौमभिन्नस्य चन्द्रमसः फलानि

पूर्वस्मिन् श्लोके विविधग्रहैः आहतस्य चन्द्रशृङ्गस्य फलानि संक्षिप्तरूपेण पठितानि। अग्रे चन्द्रबिम्बस्य विविधग्रहैः भेदवशात् फलानि विस्तरेण विवेचितानि। तत्रापि विशेषरूपेण ये ये प्रदेशाः पीड़िताः भवन्ति तेषां वर्णनं विहितम्। सर्वप्रथमं शुक्रभिन्नबिम्बस्य चन्द्रमसः फलम् एवं विहितम् –

भिन्नः सितेन मगधान् यवनान् पुलिन्दान्
नेपालभृङ्गिमरुकच्छसुराष्ट्रभद्रान्।
पाञ्चालकैकयकुलूतकपूरुषादान्
हन्यादुशीनरजनानपि सप्तमासान्॥

प्रतिपदार्थः – सितेन = शुक्रेण (यदा) भिन्नः = वेधितः, मध्यात् विदारितः (तदा) मगधान् = मगधदेशस्य जनान्, यवनान् = यवनजनान्, पुलिन्दान् = पुलिन्ददेशस्य जनान्, एतान् सर्वान् जनान्। नेपालभृङ्गिमरुकच्छसुराष्ट्रमद्रान् = एतेषां देशानां जनान्, पाञ्चालान्, कैकयान्, कुलूतकान् जनान्, पुरुषादान् = पुरुषभक्षान् उशीनरजनान् = उशीनरप्रदेशस्य जनान्, (एतान्) सर्वान् (पाककालादनन्तरं) सप्त मासान् , (यावत्) हन्याद् = घातयेत्।

व्याख्या – यदि चन्द्रबिम्बः शुक्रेण वेधितः भवति मध्यात् विदारितो वा भवति तदा मगधः, यवनः, पुलिन्दः, नेपालः, भृङ्गिः, मरुदेशः, कच्छः, सूरतः, मद्रासः, पाञ्चालः, काश्मीरः, कुलूतकः, पुरुषादः, उशीनरः इत्येतेषां देशानां जनान् सप्तमासाभ्यन्तरे घातयति। अर्थात् यस्मिन् दिने चन्द्रबिम्बः शुक्रेण वेधितः भवति तद्दिनादारम्भ सप्तमासाभ्यन्तरे पूर्वपठितानां देशानां जनानां हानिः भवति।

यदि गुरुणा चन्द्रबिम्बस्य वेधः भवति तदा किं फलं भवतीति आचार्येण अग्रे निर्दिष्टम्–

गान्धारसौवीरकसिन्धुकीरान्
धान्यानि शैलान् द्रविडाधिपांश्च।
द्विजांश्च मासान् दश शीतरश्मिः
सन्तापयेद्वाक्पतिना विभिन्नः॥

प्रतिपदार्थः – शीतरश्मिः = चन्द्रः, वाक्पतिना = गुरुणा, विभिन्नः = विदारितबिम्बः, गान्धारान्, सौवीरकान्, कीरान् एतान् सर्वानेव जनान्, सन्तापयेत् = सम्पीडयेत्। तथा धान्यानि = व्रीहीन्, शैलान् =पर्वतान्, द्रविडाधिपान् = द्रविडदेशीय-अधिपतीन्, च, द्विजांश्च = तथा ब्राह्मणान् (एतान्) दश मासान् (यावत्) सन्तापयेत्।

व्याख्या – यदि चन्द्रबिम्बः बृहस्पतिना वेधितः भवति तदा गुरुणा विदारितबिम्बोऽयं चन्द्रः वा भवति तदा गन्धारः, सौवीरकः, सिन्धः, कीरः, पर्वतीयप्रदेशः, एतेषां प्रदेशानां जनान् दशमासाभ्यन्तरे विनाशयति। तथा धान्यानि, द्रविडदेशीयाधिपतीन्, ब्राह्मणान् चे वेधकालात् दशमासान् यावत् पीडितं करोति। अर्थात् यस्मिन् गुरुणा चन्द्रबिम्बः

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विदारितः भवति। तस्मात् दिवसादारभ्य दशमासाभ्यन्तरे फलानि भवन्ति।

यदि भौमेन चन्द्रबिम्बः वेधितः भवति तदा फलं एवं निर्दिष्टम्–

उद्युक्तान् सह वाहनैर्नरपतींस्त्रैगर्तमान् मालवान्
कौलिन्दान् गणपुङ्गवानथ शिबीनायोध्यकान् पार्थिवान्।
हन्यात् कौरवमत्स्यशुक्त्यधिपतीन् राजन्यमुख्यानपि
प्रालेयांशुरसृग्ग्रहे तनुगते षण्मासमर्यादया॥

प्रतिपदार्थः – प्रालेयांशुः =हिमरश्मिः चन्द्रो वा, असृग्ग्रहे = अङ्गारके भौमे वा, तनुगते = शरीरस्थे भौमभिन्ने इत्यर्थः। उद्युक्तान् = उद्योगस्थितान् विजिगीषून्, वाहनैः =अश्वादिभिः (पुराकाले वाहनानि अश्ववृषीोष्टादिभिः सञ्चालितानि आसन्) सह = समेतं, नरपतीन् =नृपान् (हन्यात्), त्रैगर्तकान् = त्रिगर्तप्रदेशस्य जनान्, मालवान् = मालवाप्रदेशस्य जनान्, कौलिन्दान् = कुलिन्दप्रदेशस्य जनान्, गणपुङ्गवान् = समूहप्रधानान्। अथशब्दः स्वार्थे प्रयुक्तः। शिबीन् = शिबीदेशस्य जनान्, आयोध्यकान् = अयोध्यानिवासिनः, (तथा) पार्थिवान् = नृपान् (एतानपि) हन्यात् = घातयेत्। कौरवमत्स्यशुक्त्यधिपतीन् = कौरवानां मत्स्यानां शुक्तीनां जनानां चाधिपतयः = स्वामिनः (तान्) राजन्यमुख्यान् = क्षत्रियप्रधानान्, अपि, षष्मासमर्यादया = षण्मासावधि यावत् (एतान् हन्यात्)।

व्याख्या – यदि चन्द्रबिम्बः भौमेन वेधितः भवति। चन्द्रशरीरस्थेन अङ्गारकेन चन्द्रस्य बिम्बः विदारितः भवति तदा अश्वादिभिः वाहनैः सह उद्योगस्थितान् (युद्धे उद्युक्तान्), नरपतीन् षण्मासावधि यावत् हन्यात्। तथा त्रिगर्तप्रदेशस्य जनान्, मालवप्रदेशस्य जनान्, कुलिन्ददेशस्य जनान् च विनिहन्ति। समूहप्रधानान्, शिबीदेशस्य जनान्, अयोध्याप्रदेशस्य जनान् नृपान् च वेधदिवसात् षण्मासाभ्यन्तरे हन्यात्। तथा कौरवदेशस्य, मत्स्यदेशस्य, शुतिदेशस्य च राज्ञां, क्षत्रियप्रधानानां वा विनाशः षण्मासाभ्यन्तरे भवति। अत्र विविधाप्राचीनप्रदेशानां नामानि भवता पठितानि, परन्तु देशानां एतानि नामानि इदानीं न प्राप्यन्ते अतः फलज्ञानाय प्राचीनप्रदेशानाम् आधुनिकस्थितेः ज्ञानम् आवश्यकं भवति। अतः बृहत्संहिता ग्रन्थस्य चतुर्थे खण्डे नक्षत्रकूर्मचक्राध्याये एतेषां देशानां नामानि विस्तरेण विवेचितानि सन्ति अतः एतेषां पूर्वपठितानां प्रदेशानां परिचयः आधुनिकसन्दर्भे प्राप्त्यर्थं तत्रैव पठनीयम्।

५.९.२ शनिबुधकेतुभिन्नस्य चन्द्रमसः फलम्

शुक्रगुरुभौमभिन्न चन्द्रबिम्ब फलानि भवता पठितानि। अग्रे आचार्येण शनिबुधकेतुभिन्नस्य चन्द्रमसः फलानि वर्णितानि। तत्र शनैश्चरेण वेधितस्य चन्द्रस्य फलम् एवं वर्णितम्–

यौधेयान् सचिवान् सकौरवान् प्रागीशानथ चार्जुनायनान्।
हन्यादर्कजभिन्नमण्डलः शीतांशुर्दशमासपीडया॥

प्रतिपदार्थः – शीतांशुः = चन्द्रः, अर्कजभिन्नमण्डलः = शनैश्चरविदारित-विम्वः, यौधेयान्=यौधेय प्रदेशस्य जनान्, सचिवान् = प्रदेशस्य जनान्, सचिवान् = मन्त्रिणः, सकौरवान् = कौरवजनैः सहितान्, प्रागीशान् = पूर्वस्यां ये अधिपतयः तान्। अथशब्दः पादपूरणे प्रयुक्तः। च शब्दः समुच्च्यार्थे। अर्जुनायनान् = अर्जुनायन (पाण्डुवंशीय) जनान् च दशमासपीडया = दशमासं यावत् उत्पातेन (एतान् हन्यात्)।

व्याख्या – यदि चन्द्रः शनैश्चरेण विदारितविम्बो भवति अर्थात् यदि शनिः चन्द्रविम्बं भेदयति तदा यौधयप्रदेशस्य जनान्, मन्त्रिणः, कौरवजनैः सह पूर्वस्यां ये अधिपयः तान्, अर्जुनायन (पाण्डुवंशीय) जनान् च वेधदिवसात् दशमासावधिपर्यन्तं नाशयति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अर्थात् यस्मिन् दिवसे शनैश्चरः चन्द्रबिम्बस्य भेदं करोति, तस्मात् दिवसादारभ्य दशमासं यावत् एते जनाः पीडिताः भवन्ति।

यदि चन्द्रबिम्बः बुधेन वेधितः भवति तदा किं फलं भवतीति आचार्येण अग्रे वर्णितम् –

मगधान् मथुरां च पीडयेद्वेणायाश्च तटं शशाङ्कजः।
अपरत्र कृतं युगं वदेद्यदि भित्त्वा शशिनं विनिर्गतः॥

प्रतिपदार्थः – शशाङ्कजः = बुधः, यदि, शशिनं = चन्द्रं, भित्त्वा = विदार्य, विनिर्गतः = विनिःसृतः, तदा मगधान् = मगधप्रदेशस्य जनान् मथुरां = मथुराप्रदेशवासिनो जनान्, वेणायाः = वेणानद्याः, तटं = तत्तीरे ये निवासिनः तान् जनान्, पीडयेत् = घातयति (एतानुक्तान् वर्जयित्वा) अपरत्र = अन्यदेशेषु, कृतं युगं = सतयुगं, वदेत् = ब्रूयात्।

व्याख्या – यदि चन्द्रबिम्बं विदार्य बुधः विनिर्गतः भवति अर्थात् चन्द्रबिम्बं बुधः वेधयति तदा मगधप्रदेशस्य जनान्, मथुराप्रदेशनिवासिनो जनान्, वेणानद्याः तीरे निवासिनः जनान् घातयति। एतान् पूर्वोक्तान् प्रदेशान् वर्जयित्वा अन्यदेशेषु सत्युगं भवति अर्थात् अन्यप्रदेशेषु धनधान्याधिक्यं तथा सर्वप्रकारेण सम्पन्नं भवति। बुधेन पीडिते चन्द्रबिम्बे निश्चितकालान्तरेण फलं न निर्दिष्टम्।

बुधवेधितचन्द्रबिम्बस्य फलवर्णनानन्तरं केतुना विदारितस्य चन्द्रबिम्बस्य फलम् एवं वर्णितम्

क्षेमारोग्यसुभिक्षविनाशी शीतांशुः शिखिना यदि भिन्नः।
कुर्यादायुधजीविविनाशं चौराणामधिकेन च पीडाम्॥

प्रतिपदार्थः – शीतांशुः = चन्द्रः, शिखिना = केतुना यदि, भिन्नः = विदारितबिम्बः (तदा) क्षेमारोग्यसुभिक्षविनाशी– क्षेमम् = कल्याणम्, आरोग्यं = नीरोगत्वं, सुभिक्षं = धनधान्याधिक्यं च विनाशयति (तथा) आयुधजीविविनाशं = आयुधेन ये जीवन्ति तेषाम् विनाशं (कुर्यात्) यथा रक्षकाः, सैनिकाः, चौराणां = तस्कराणाम्, अधिकेन = अतिशयेन, पीडां = रुजं कुर्यात्।

व्याख्या – चन्द्रः यदि केतुना विदारितबिम्बः भवति अर्थात् यदि चन्द्रबिम्ब केतुना वेधितः भवति तदा क्षेमस्य आरोग्यस्य सुभिक्षस्य च विनाशं करोति। अस्त्रशस्त्रद्यायुधैः येषाम् आजीविका भवति (यथा– सैनिकाः, रक्षकाः, आयुधनिर्मातारः) ते सर्वे विनाशम् उपयान्ति। तथा लोके तस्कराणाम् अतिशयेन पीडा भवति। अत्रापि कालनिध रिणं न कृतम्। यथा फलानि ग्रहाणां चन्द्रबिम्ब भेदवशात् वार्णितानि तानि एव पराशरेणापि वर्णितानि। भट्टोत्पलेन अन्ते पराशरस्य वचनानि विस्तरेण उद्धृतानि सन्ति।

५.१० ग्रहणकाले उल्काहतस्य चन्द्रस्य फलम्

चन्द्रग्रहणकालं यदि चन्द्रः उल्कया हतः भवति तदा किं फलं भवतीति अग्रे निर्दिष्टम् –

उल्कया यदा शशी ग्रस्त एव हन्यते।
हन्यते तदा नृपो यस्य जन्मनि स्थित॥

अन्वयः – यदा ग्रस्त शशी उल्कया हन्यते तदा यस्य नृपो जन्मनि स्थितः (सः) एव हन्यते।

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रतिपदार्थः – यदा ग्रस्तः = ग्रहणकालिकः, राहुराशिगतो वा, शशी = चन्द्रः, उल्कया = उल्का द्वारा, हन्यते = वेधितः भवति, तदा यस्य नृपो = राज्ञः, जन्मनि जन्मगतः, स्थितः सः एव हन्यते = म्रियते।

व्याख्या – यदि ग्रहणकालिकचन्द्रः उल्कया हतः भवति अर्थात् चन्द्रबिम्बाभिमुखी उल्का याति, तदा यस्य राज्ञः जन्मनक्षत्रे सः चन्द्रः स्थितः भवति तस्य विनाशः भवति। यथा यदि मघानक्षत्रे स्थितः ग्रस्तचन्द्रः उल्कया वेधितो भवति तदा मघानक्षत्रे प्राप्तजन्माः राजानः (मा, मी, मू, मे जन्माक्षराणि येषां, यथा– महेन्द्रः, मानवेन्द्रः = इत्यादय) म्रियन्ते। यथा चोक्तं समाससंहितायाम्–

'उल्काभिहतो ग्रहणे तन्नक्षत्रं नृपं हन्ति' इति।

५.११ चन्द्रस्य वर्णलक्षणं तच्छुभाशुभफलञ्च

प्राचीनाचार्यैः चन्द्रबिम्बस्य विविधवर्णानां च सूक्ष्मेक्षिकया अध्ययनं कृतम्। वर्णानां फलानि च वर्णितानि। आचार्यवराहमिहिरेण तेषां सङ्कलनं कृत्वा एवं विहितम्–

भस्मनिभः परुषोऽरुणमूर्त्तिः शीतकरः किरणैः परिहीणः।
श्यामतनुः स्फुटितः स्फुरणो वा क्षुड्डमरामयचौरभयाय॥

प्रतिपदार्थः – शीतकरः = चन्द्रः, भस्मनिभः = भस्मवर्णः कलुषः, परुषः= रुक्षः, अरुणमूर्त्तिः = रक्तवर्णः, लोहितशरीरो वा, किरणैः = रश्मिभिः, परिहीणः = वर्जितः, श्यावतनुः = कृष्णवर्णः श्यामशरीरो वा, स्फुटितो = भग्नः, स्फुरणः = कम्पमानः (बिम्बः भवति तदा) क्षुड्डमरामयचौरभयाय- क्षुत् = दुर्भिक्षं, खाद्यान्नस्य अभावः, उमरः = शत्रुकलहः, आमयो = रोगाः, चौराः = तस्कराः एषां सम्बन्धि भयं, भवति।

व्याख्या – यदि चन्द्रबिम्बः भस्मवर्णः, कलुषः, रुक्षः, लोहितशरीरः, रक्तवर्णो वा, रश्मिभिः हीनः, कृष्णवर्णः, श्यामशरीरः, खण्डितबिम्बः, भग्नः, कम्पितबिम्बो वा भवति तदा लोके यतः एतादृशः चन्द्रबिम्बः दृश्यते तत्र दुर्भिक्षं, खाद्यान्नस्य अभावः, शत्रुकलहः, रोगानां वृद्धिः, तस्करैः च जनाः पीडिताः भवन्ति। इत्येवं प्रकारेण चन्द्रवर्णस्य अशुभफलानि वर्णितानि। अग्रिमे श्लोके चन्द्रवर्णस्य शुभफलमपि निर्दिष्टम् –

प्रालेयकुन्दकुमुदस्फटिकावदातो
यत्नादिवाऽद्रिसुतया परिमृज्य चन्द्रः।
उच्चैः कृतो निशि भविष्यति मे शिवाय
यो दृश्यते स भविता जगतः शिवाय॥

अन्वयः – निशि में शिवाय भविष्यति (इति निश्चित्य) अद्रिसुतया यत्नतः परिमृज्य प्रालेयकुन्दकुमुद स्फटिकावदातो चन्द्रः उच्चैः कृतः (तं चन्द्रं) यो दृश्यते स जगतो शिवाय भविता।

प्रतिपदार्थः – निशि = रात्रौ, मे = मम, शिवाय = महेश्वराय, भविष्यति (प्रयसे वेति निश्चित्य) अद्रिसुतया = गौर्या, यत्नात् = यत्नतः, चन्द्रः, परिमृज्य = समन्ततः निर्मलीकृत्य, प्रालेयकुन्दकुसुम स्फटिकावदातो - प्रालेयं = हिमम्, कुन्दकुमुदे = कुन्दपुष्पविशेषशुक्ले (तथा) स्फटिकावदातो = मणिः तद्वत् निर्मलः इत्यर्थः, (तद्वत् विमलीकृत्य) उच्चैः कृत = उपरि न्यस्तः (एवं विधाः चन्द्रः) यो = यः मनुष्यः, दृश्यते = अवलोक्यते सः (जनः) जगतो = जनानां, शिवाय = श्रेयसे कल्याणाय वा, भविता = भविष्यति इत्यर्थः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

व्याख्या – श्लोकेऽस्मिन् आचार्यस्य काव्यप्रतिभायाः परिचयः प्राप्यते। स्वच्छचन्द्रस्य श्वेतकुन्द्रकुमुदपुष्पसदृशेन स्फटिकमणिना तुलना कृताऽऽस्ति। रात्रौ महेश्वराय पार्वतिना चन्द्रस्य निर्मलीकरणं कृतम्। चन्द्रः हिमकुन्दकुमुदसदृशः शुक्लः तथा स्फटिकमणिसदृशः स्वच्छः निर्मलीकृत्य उपरि न्यस्तः। एवं विधः चन्द्रः यः जनः रात्रौ आकाशे अवलोक्यते सः चन्द्रः तस्य मनुष्यस्य कृते कल्याणकारी भवति। अर्थात् आकाशे यदि श्वेतकुन्दकुमुदपुष्पसदृशः स्फटिकसदृशी निर्मल कान्तियुक्तः चन्द्रः यदि दृश्यते तदा लोककल्याणाय भवति। इत्येवं प्रकारेण चन्द्रवर्णस्य शुभफलमपि वर्णितम्। अत्र पार्वती शिवाय (शिवस्य कृते) चन्द्रं निर्मलीकृत्य रात्रौ चन्द्रं स्थापयति स च लोकानां शिवाय (कल्याणाय) भवति इत्यनेन 'शिवाय' शब्दस्य प्रयोगेण आचार्येण काव्यचमत्कार उत्पादितः।

५.१२ पक्षे तिथिवृद्धौ वा हानौ वा साम्ये शुभाशुभफलम्

चन्द्रसूर्ययोः गत्यन्तरेण मासे तिथीनां कदाचित् वृद्धिः कदाचित् च क्षयः भवति। यदि कस्यामपि तिथौ सूर्योदयद्वयं भवति तदा तस्याः 'तिथिवृद्धिः' इति संज्ञा भवति तथा यदि तिथ्यां एकोऽपि सूर्योदयः न भवति तदा तस्याः 'क्षयतिथिः' इति संज्ञा भवति। मासे तिथीनां क्षयवृद्धिवशादपि फलानि वर्णितानि –

शुक्ले पक्षे सम्प्रवृद्धे प्रवृद्धिं ब्रह्मक्षत्रं याति वृद्धिं प्रजाश्च।
हीने हानिस्तुल्यता तुल्यतायां कृष्णे सर्वं तत्फलं व्यत्ययेन॥

प्रतिपदार्थः – शुक्ले पक्षे = श्वेतमासार्द्धे, सम्प्रवृद्धे = तिथिवृद्धिः जाता सति, ब्रह्मक्षत्रं, ब्राह्मक्षत्रं – ब्राह्मणा = द्विजाः, क्षत्रियाः = नृपाः प्रवृद्धिं = प्रकर्षेण वृद्धिं, याति = प्राप्नुवन्ति, प्रजाश्च = उन्नतिं (याति), हीने = तिथिक्षये सति, (ब्रह्मक्षत्रप्रजानां) हानिः = न्यूनता (भवति), तुल्यतायां = समत्वे न हानौ न वृद्धौ (ब्रह्मक्षत्रप्रजानां) तुल्यता = साम्यम् एव (भवति), कृष्णे = कृष्णपक्षे, सर्वं = प्रागुक्तं सर्वं, तत्फलं = पूर्वपठितफलं, व्यत्ययेन = विपरीतेन (ज्ञातव्यम्)

व्याख्या – यदि शुक्लपक्षे तिथिवृद्धिः भवति तदा ब्रह्मणानां क्षत्रियाणां, प्रजानां च वृद्धिः भवति। यदि शुक्लपक्षे तिथिक्षयः भवति तदा ब्रह्मक्षत्रप्रजानां हानिः भवति। यदि पक्षे न तिथिवृद्धिः न च तिथिक्षयः भवति तदा ब्रह्मक्षत्रप्रजानां न हानिर्भवति न च वृद्धिः अर्थात् साम्यता भवति।

कृष्णपक्षे पूर्वोक्तस्य विपरीतं ज्ञेयम्, अर्थात् यदि कृष्णपक्षे तिथिवृद्धिः भवति तदा ब्राह्मणानां क्षत्रियाणां प्रजानां च हानिः भवति। यदि कृष्णपक्षे तिथिक्षयः भवति तदा ब्रह्मक्षत्रप्रजानां वृद्धिः भवति। तथा च यदि पक्षे न वृद्धिः न च हानिः भवति तदा ब्रह्मक्षत्रप्रजानां साम्यता तुल्यता वा भवति।

पुनश्च वर्णविशेषस्य चन्द्रस्य फलम् आचार्यवराहमिहिरेण अध्यायस्य अन्तिमे श्लोके अवशिष्टरुपेण विहितम्–

यदि कुमुदमृणालहारगौरस्तिथिनियमात् क्षयमेति वर्द्धते वा।
अविकृतगतिमण्डलांशुयोगी भवति नृणां विजयाय शीतरश्मिः॥

अन्वयः – यदि कुमुदमृणालहारगौरः अविकृतगतिमण्डलां पशुयोगी शीतरश्मिः तिथिनियमात् क्षयमेति वर्द्धते वा (तदा) नृणां विजयाय (भवति)

प्रतिपदार्थः – यदि कुमुदमृणालहारगौरः – कुमुदं = पुष्पविशेषम्, कमलम्, मृणालं = बिसम्,कमलनालं, हारः = मुक्ताहारः तद्वत् यदि गौरः = श्वेतः इत्यर्थः,

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अविकृतगतिमण्डलांशुयोगी अविकृतगतिः = विकाररहिता गतिः कम्पनादिदोषरहितः, अविकृतमण्डलं = विकाररहितं बिम्बं यस्य, अविकृतांशुयोगी = अविकृतैः अंशुभिः संयोगो यस्य सः (तथाभूतः), शीतरश्मिः = चन्द्रः, तिथिनियमात् = तिथिक्रमेणैव वृद्धिश्च याति अर्थात् शुक्लप्रतिपदातः बिम्बस्य शुक्लतावृद्धिः पूर्णिमा यावत् भवति तथा पूर्णिमातः शुक्लत्वे हानिः अमावस्यापर्यन्तं भवति। एतादृशः चन्द्रः मनुष्याणां विजयसूचको भवति। इत्येवं प्रकारेण भवता चन्द्रचारसम्बद्धाः सर्वे विषयाः पठिताः।

बोधप्रश्नाः

८. स्वल्पमूर्त्तिचन्द्रः किं फलं करोति?

९. कुजेन आहते चन्द्रशृङ्गे किं फलं भवति?

१०. नेपालदेशस्य जनाः कदा पीडिताः भवन्ति?

११. अयोध्याप्रदेशस्य जनाः कदा पीडिताः भवन्ति?

१२. शनिना वेधितस्य चन्द्रविम्बस्य फलं कति मासाभ्यन्तरे प्राप्यते?

१३. उल्कया हतस्य ग्रस्तचन्द्रस्य किं फलम्?

१४. भस्मनिभः शीतकरः किं फलं भवति?

१५. कीदृशः चन्द्रबिम्बः शुभफलं करोति?

५.१३ सारांशः

अस्मिन् पाठे भवान् बृहत्संहिताग्रन्थे वर्णितः सम्पूर्णः चन्द्रचाराध्यायं पठितवान्। प्राचीनाचार्यैः प्रत्येकस्य ग्रहस्य गतिः, स्थितिः, बिम्बवर्णः, युतिः, चारादिविषये गहनतया शोध कार्यं कृतम्। दीर्घकालपर्यन्तम् अन्वेषणेन तेषां फलानि च वर्णितानि। प्राचीनैः चन्द्रस्य विषये यत्किमपि अन्वेषितं तस्य सङ्कलनं कृत्वा स्वभाषया वराहमिहिराचार्येण चन्द्रचाराध्याये विहितम्। सर्वप्रथमं चन्द्रस्य शुक्लत्वदर्शने सूर्यः एव कारणं भवतीति वर्णितं तस्य अवगमनार्थम् आतपस्थितस्य घटस्य लौकिकमुदाहरणं प्रदत्तम्। चन्द्रः सलिलमयः दर्पण इव वर्तते यतः सूर्यरश्मीनां परावर्तनं पृथिव्योपरि भवति। प्रतिदिवसं चन्द्रस्य गतिवशात् शुक्लत्वस्य हानिः वृद्धिश्च भवति। तदनन्तरं विविधनक्षत्रेषु चन्द्रचारस्य सामान्यफलानि पठितानि। चन्द्रस्य रेवत्यादि षट्नक्षत्रेषु अनागतसंयोगं, आर्द्रादिद्वादशनक्षत्रेषु मध्ययोगीनि तथा ज्येष्ठादिनवनक्षत्रेषु अतीत्य संयोगं भवति। चन्द्रमसः शृङ्गस्य दशसंस्थानानि भवन्ति– १. नौसंस्थानम् २. लाङ्गलम् ३. दुष्ट लाङ्गलम् ४. सम ५. दण्ड ६. कार्मुकम् ७. युगम् ८. पार्श्वशायिनाम् ९. आवर्जितम् १०. कुण्डाख्यसंस्थानम् एतेषां दशसंस्थानानां स्वरुपफलानि च भवता पाठेऽस्मिन् पठितानि। तेषु कानिचन् उत्पातरुपाणि सन्ति। विलीन शृङ्गस्य चन्द्रस्य दर्शनेन अशुभफलं निर्दिष्टम्।

तदनन्तरं चन्द्रविम्बस्य विविधस्वरुपाणां फलानि च पठितानि। मध्यमः, मृदङ्गाकारः, विशालमूर्त्तिः, स्थूलः, तनुमूर्त्ति इत्यादयः। अग्रे विविधग्रहैः आहतस्य शुक्रवेधितस्य फलं सप्तमासाभ्यन्तरे, गुरुणा शनिना च दशमासाभ्यन्तरे, भौमवेधितस्य षण्मासाभ्यन्तरे फलानि भवन्ति। बुधवेधस्य एव शुभफलं विहितम् अन्यथा सर्वत्र अशुभफलानि एव विहितानि।

चन्द्रविम्बस्य विविधवर्णानां फलानि च पठितानि। भस्मनिभः, रुक्षः, कृष्णः लोहितः, कलुषः, भग्नः, कम्पितविम्बः, अशुभफलदायको भवति। श्वेतस्वच्छविम्बः शुभफलदायकः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भवति। शुक्लपक्षं तिथिवृद्धिवशात् ब्राह्मणक्षत्रियप्रजानां वृद्धिः, तिथिक्षये एतेषां हानिः तथा तुल्यपक्षे समत्वं भवति, कृष्णपक्षे तद्विपरीतं ज्ञेयमिति विहितम्। अन्ते उक्तं यत् अविकृतगतिमण्डलांशुयुक्तः मुक्ताहार इव श्वेतः चन्द्रः मनुष्याणां जयाय भवति। इत्येवं प्रकारेण द्वात्रिंशत्सु श्लोकेषु निबद्धः चन्द्रचाराध्यायः भवता पठितः।

५.१४ शब्दावली

१. आतपस्थः = सूर्यस्य प्रकाशे स्थितः।

२. दीधितयः = रश्मयः।

३. पितृदेवः = मघानक्षत्रम्।

४. उडुपतिः = नक्षत्राणां पतिः, चन्द्रः।

५. ईषत् = किञ्चित्।

६. लाङ्गलम् = हलम् (येन कृषकाः भूमिं कर्षन्ति)।

७. कार्मुकः = धनुः।

८. अवाङ्मुखम् = अधोमुखम्।

९. तनुमूर्तिः = लघ्वाकारः।

१०. पुरुषादान् = पुरुषभक्षकान्, अरण्यवासिनः बर्बराः जनाः ये मनुष्यान् मारयन्ति।

११. वाक्पतिः = गुरुः।

१२. असृग्ग्रहः = रक्तवर्णीयग्रहः, भौमः।

१३. भित्त्वा = विदारणं कृत्वा।

१४. परुषः = रुक्षः।

१५. डमरः = शत्रुकलहः।

१६. अद्रिसुता = हिमालयपुत्री, पार्वती, गौरी।

१७. प्रालेयं = हिमम्।

५.१५ सन्दर्भः

१. बृहत्संहिता, वराहमिहिरविरचिता, चौखम्बा विद्याभवन, वारणसी।

५.१६ सहायकग्रन्थाः

१. बृहत्संहिता, भट्टोत्पलटीका संहिता सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी।

२. बृहत्संहिता, व्याख्या - डॉ. सुरेशचन्द्रमिश्रः, रंजन पब्लिकेशन, नई दिल्ली।

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

३. सचित्रज्योतिषशिक्षा (संहिताखण्ड) बाबूलालठाकुरः, मोतीलालबनारसीदासः, वाराणसी।

५.१७ बोधप्रश्नोत्तराणि

१. सूर्यस्य रश्मिभिः।

२. चन्द्रः।

३. बीजानां, जलचराणां, वनानां च विनाशः करोति।

४. अनागसंयोगम्।

५. नाविकानां पीडा, समस्तजनस्य च कल्याणं भवति।

६. दुष्टलाङ्गलसंस्थानम्।

७. अतिशयेन उन्नतिवशात् चन्द्रस्य एकं शृङ्गम् अधोमुखं दृश्यते तदा आवर्जितसंस्थानं भवति।

८. दुर्भिक्षकरः भवति।

९. प्रत्यन्तान् कुनृपान् च हन्ति।

१०. यदा चन्द्रबिम्बः शुक्रेण वेधितः भवति।

११. यदा चन्द्रबिम्बः भौमेन वेधितः भवति।

१२. दशमासाभ्यन्तरे।

१३. यस्य राज्ञः जन्मनक्षत्रे ग्रस्तचन्द्रः भवति तस्य राज्ञः विनाशः भवति।

१४. क्षुड्डमरामयचौरभयाय भवति।

१५. स्फटिकमणिसदृशः स्वच्छः कुन्दकुमुदसदृशः श्वेतः बिम्बः।

५.१८ अभ्यासप्रश्नाः

१. चन्द्रे स्वप्रकाशाभावत्वं निरुपयत।

२. दशविधसंस्थानानां नामानि लिखत।

३. लाङ्गलकार्मुकसंस्थानयोः लक्षणं सफलं लिखत।

४. भौमेन वेधितस्य चन्द्रबिम्बस्य फलं लिखत।

५. चन्द्रस्य वर्णलक्षणं शुभाशुभफलानि च लिखत।

६. ग्रहणकाले उल्काहतस्य चन्द्रबिम्बस्य फलं वर्णयत।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

...zation by eGangotri

स्वप्नः

संस्कृते पारम्परिक-आधुनिकज्ञानवैदुष्यस्य समन्वयनदृशा संस्कृतशिक्षायाः वैश्विकपरिप्रेक्ष्यस्य उपस्थानम्।

सङ्कल्पः

- संस्कृतनिष्ठज्ञानसरण्याः उत्तमावबोधस्य सर्जनम्।
- संस्कृतशिक्षान्तर्गतानाम् अभिनवविषयाणां संवर्धनम्।
- आधुनिकसमाजोत्कर्षाय सम्भावनानां प्रकाशनदृष्ट्या संस्कृतभाषायाः तत्साहित्यस्य च प्रासङ्गिकतायाः आविष्करणम्।